In Public domain. Digitization Muthulakshmi Research Academy

ISSN- 0976 089X

The Journal of Sanskrit Academy

Volume XXI - 2011

Chief Editor
Prof. T. Keshava Narayana
Director I/c

Editor
Dr. V. Subrahmanyam
Deputy Director

SANSKRIT ACADEMY
(Adarsha Shodha Sanstha, Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University, Hyderabad - 500 007
Phone & Fax 040-27070281
Email : sanskritacademyhyd@gmail.com

2011

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

The Journal of Sanskrit Academy

(Volume XXI – 2011)

Chief Editor
Prof. T. Keshava Narayana
Director I/c

Editor
Dr. V. Subrahmanyam
Deputy Director

In Public domain. Digitization Muthulakshmi Research Academy

The Journal of Sanskrit Academy – Volume XXI - 2011

ISSN- 0976 – 089X

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) Ministry of Human Resource Development Govt. of. India, New Delhi.

Publisher &
General Editor : Prof. T. Keshava Narayana
Director I/c,
Sanskrit Academy
Coordinator : Dr. V. Subrahmanyam
Dy. Director,
Sanskrit Academy

© Sanskrit Academy

Year : 2011
Copies : 300
Price : Rs 150
$ 15

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

Printed at : Sandeep Graphics, Hyd.

Editorial Board
Prof. P. Sriramachandrudu
Prof. B.Narasimhacharyulu
Prof. R.Shrihari
Prof. P.Shashirekha
Prof. A.Ramulu
Prof. Neelakantham
Prof. V.Muralidhara Sharma
Prof. B.V.Rama Rao
Prof. V. Pandurangi
Prof. Sripada Subrahmanyam
Dr. Virupaksha Jaddipal
Dr. V.Srinivasa Sharma
Dr. JSRA Prasad

Chief Editor
Prof. Keshava Narayana
Director I/c

Editor
Dr. V.Subrahmanyam
Deputy Director

Email: jsaeditor@gmail.com

In Public domain. Digitization Muthulakshmi Research Academy

सम्पादकीयम्

गत्यर्थकात् सृ धातोः असुन् प्रत्यये मतुपि च स्त्रियां सरस्वतिशब्दस्य निष्पत्तिः। सरन्ति प्राप्नुवन्ति सर्वाः विद्याः येन तत् सरः ज्ञानम्। सा विद्यते यस्यां सा ज्ञानाधिष्ठात्री वाग्देवी सरस्वतीति नाम्ना अभिधीयते स्तूयते च। सरः गमनं निरन्तरप्रवाहः विद्यते यस्यां सा नदी च सरस्वतीत्युच्यते। यथा नदी, जलं स्थानात् स्थानान्तरं प्रापयति, तथैवेयं सरस्वती निरन्तरं सरन्ती ज्ञानं सर्वाः विद्याः वा जनात् जनान्तरं प्रापयति। सा च सरस्वती शब्दाश्रिता। उक्तं च भर्तृहरिणा –

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्वावबोधः शब्दानां नास्तिव्याकरणादृते।।

शब्दाश्रितायाः सरस्वत्याः वाहकानिव शोधपत्राणि महतीं भूमिकां निर्वहन्ति। तस्मादेव कारणात् सर्वैरपि शोधसंस्थानैः शोधपत्राणि प्रकाश्यन्ते। उस्मानिया विश्वविद्यालयीय संस्कृतपरिषदा च 1979 तमात् वर्षादारभ्य The Journal of Sanskrit Academy इति नाम्ना शोधपत्रं प्रकाश्यते। दुर्भाग्यवशात् सर्वकारस्य अनादरकारणात् मध्ये इयं पत्रिका स्थगिता अपि 2008 वर्षादारभ्य वार्षिकं शोधपत्रं निर्विघ्नं प्रकाश्यते। तामेव परम्परामनुसृत्य 2011-12 वर्षाय च तच्छोधपत्रं प्रकाश्यत इति भृशं मोमुद्यते मे मनः।

अस्मिन् शोधपत्रे बहुभिः प्रामाणिकैः विद्वद्भिः लिखितानि महत्वपूर्णानि 28 पत्राणि भिन्न भिन्न विषयकानि प्रकाश्यन्ते। तानि पत्राणि विदुषां, विद्यार्थिनां, जिज्ञासूनाञ्च ज्ञानपिपासा–निवारणक्षमानि भवन्तीति आशासे।

अस्य शोधपत्रस्य प्रकाशनार्थमनुदानप्रदानाय राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यः, कुलसचिवेभ्यः आचार्यसुब्बरायुडुमहोदयेभ्यः, संस्कृतपरिषदः उपाध्यक्षेभ्यः, उस्मानियाविश्वविद्यालयस्य उपकुलपतिभ्यः आचार्य–सत्यनारायणमहोदयेभ्यः, कुलसचिवेभ्यः आचार्यकिशनरावमहोदयेभ्यः सश्रद्धं हार्दिकं कार्तज्ञ्यं वितरामि।

अस्याः सञ्चिकायाः सम्पादकसमिति सदस्येभ्यः, शोधपत्रलेखकेभ्यः, सम्पादकेभ्यः डा. वि. सुब्रह्मण्यं महोदयेभ्यः, पत्रप्रकाशने सहकृतवद्भ्यः संस्कृतपरिषदः कर्मकर्तृभ्यः सर्वेभ्यश्च साधुवादान् वितरामि।

प्रधानसम्पादकः
JSA

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

शोधलेखानुक्रमणिका

S.No	Name of The Article	Name of the Author	Page No
1.	न्यायशास्त्रीयविचारपद्धत्या देहात्मवादस्य सम्भाव्यता	आ. बदरीनाथशुक्लः	01-11
2.	वैदिककर्मप्रबोधः	डा. वंशीकृष्णः घनपाठी	12-28
3.	भगवत्पादशङ्करस्य विवेकचूडामणौ आत्मानात्मविवेकः	आ. डि. हिमालयनाथः	29-37
4.	वस्तुनिष्ठा सारस्वतप्रतिष्ठा	डा. राणी सदाशिवमूर्तिः	38-46
5.	आधुनिकाचार्याणां काव्यप्रयोजनसन्दर्भे मिश्रोऽभिराजराजेन्द्रः	आ. सत्येन्द्रपाण्डेयः	47-55
6.	आधुनिकसाहित्येऽन्योक्तिविलासः	आ. डॉ. राजकुमार मिश्रः	56-61
7.	पुराणदृष्ट्या ग्रहाणां गतिविचारः	डा. भूपेन्द्र नारायण झा	62-67
8.	धातुसम्बन्धे प्रत्ययाः	डा. दत्तात्रेयशर्मा	68-70
9.	ज्योतिषशास्त्रे कुजदोषविचारः	नारायणन् नम्पूतिरि	71-74
10.	सुधानिधौ "अथ शब्दानुशासनमिति विचारः"	डा.पङ्कजकुमार व्यासः	75-82
11.	संस्कृतवाङ्मयम् – शास्त्रकाव्यम्	के. आञ्जनेयुलु	83-89
12.	Aspects of Social Welfare in Five Mahayajnas, Sixteen Samskaras and Srauta Yajna	Lt Col N.V.S.S.S. Prakasa Rao	90-102
13.	Concept of Shakti in Shaivasiddanta	Dr.T.Ganeshan	103-112
14.	Prerequisites of Vedanta and its Educational Implications	Dr.Ramachandrula Balaji	113-116
15.	Application of Dependency parsing model on the first verse of Kiratārjunīya and discussion on the issues emerging thereof	Dipesh Katira and Dr.Malhar Kulkarni	117-123
16.	The different shades of love of the Heroes of the three dramas of Kālidāsa	Dr. S.R. Ivaturi	124-128
17.	Sandhāna Kalpanā in Arthaśāstra: an experimental study on Maireya	R.Phalguna Rao	129-141
18.	Modern and traditional Indian systems of year numbering	Shriramana Sharma	142-154

In Public domain. Digitization Muthulakshmi Research Academy

19.	*An overview of Philosophy of Language in the Context of Agama and Nigama*	*Shruti Rai*	*155-163*
20.	*Significance of Rasa Shastra in Ayurveda*	*Siva Panuganti*	*164-172*
21.	*Explosion of Cosmological Mysteries by Brahmakumaris Spiritual Science*	*Sureswar Meher*	*173-182*
22.	*Yoga in the Principal Upanisads with a Reference to the Ashtānga Yoga of Patañjali*	*Surjya Kamal Borah*	*183-191*
23.	*Śābdabōdha according to Panini's Grammar*	*S V B K V Gupta*	*192-194*
24.	*A Jaina perspective of the Universe*	*Kakali Ghoshal*	*195-205*
25.	*The concept of नित्यसमास*	*V. Ramyasai*	*206-213*
26.	*Maharshi Vedavyasa*	*Prof.T.S.Krishna Murthy*	*214-216*
27.	*Features of Sanskrit Compounds*	*Anil Kumar*	*217-225*
28.	हेमचन्द्र–प्रोक्त 'वर्तमाना' आदि क्रियावस्थाएँ–एक विवेचन	आशा रानी	*226-241*
29.	सोम एक वैज्ञानिक अध्ययन	उमा आर्या	*242-249*
	कृतिपरिचयः		
30.	रचनाप्रेरणा प्रकृतिवर्णनश्च	डा. ए. कुमारस्वामी	*250-253*
31.	उपसर्गवृत्तिः	*Dr. Dhaval Patel, IAS*	*254-260*
	कृतिसमीक्षा		
32.	भाणवाङ्मयचरितम्	डा.जे.एस्.आर्.ए.प्रसादः	*261-262*
	शोधलेखकानां सङ्केतसूची		*263-264*

In Public domain. Digitization Muthulakshmi Research Academy

न्यायशास्त्रीयविचारपद्धत्या देहात्मवादस्य सम्भाव्यता

आचार्यः बदरीनाथशुक्लः

न्यायवैशेषिकशास्त्रयोः प्रामाणिकग्रन्थानां पर्यालोचनेन आत्मनो विषये एष निष्कर्षः प्राप्यते यत् आत्मा क्षित्यप्तेजोमरूद्व्योमदिक्कालमनोभ्यो भिन्नं नवमं द्रव्यम्। स च द्विविधः – जीवात्मा परमात्मा च। तत्र जीवात्मा प्रतिशरीरं भिन्नः शरीरेन्द्रियमनःप्राणेभ्यो व्यतिरिक्तः सर्वमूर्तद्रव्यसंयोगी कर्तृत्वभोक्तृत्वाश्रयः कृत्स्नैर्मूर्तद्रव्यैः सयुंज्यमानोऽपि पूर्वार्जितादृष्टवशात् येन देहेन सह विजातीयसंयोगलक्षणभोगनियमाकसम्बन्धं लभते, तेनैव देहेन पूर्वकर्मणाम् उच्चावचानि सुखदुःखात्मकफलानि भुङ्क्ते। नवनवानि च कर्माणि कुर्वन् पुण्यपापापर-पर्यायधर्माधर्मयोः स्वकीयं कोषं वर्द्धयते। अभिनवैः अनुभवैः उत्पाद्यमानं संस्कारराशिं च उपचिनुते। सर्वेष्वेषु कर्मसु तदीयाकृष्टं मनः तस्य साचिव्यं बिभर्ति। जीवात्मा हि एतन्नये ज्ञानेच्छाद्वेषप्रत्यत्नधर्माधर्मभावनासुखदःखात्मकानां नवविशेषगुणानां संख्यापरिमाण–पृथक्त्वसंयोगविभागाभिधानां पञ्चसामान्यगुणानाञ्चाश्रयः, स्वकीयकर्मानुसारेण विविधासु योनिषु जायते। मनुष्यशरीरेण च स्वात्मतत्त्वसाक्षात्कारमासाद्य अपवर्गापरनाम्नो निःश्रेयसस्याधिकारी देहिप्राणिजीवप्रभृतिशब्दैः व्यपदेश्यश्च। परमात्मा पुनः जीवात्मभ्यो भिन्नः, अद्वितीयः, जगत्कर्ता, वेदप्रणेता, स्वोपासनया च जीवेभ्यो भौमदिव्यसुखप्रदाता, जीवानाञ्च तदर्जितकर्मफलभोगे मोक्षलाभे च तेषां सहायकः नित्यज्ञानेच्छाप्रयत्नानां सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागमहितानां नवगुणानामाधारः। ईश्वरप्रभुभगवत्प्रभृतिशब्दैः व्यपदेश्यः। सृष्टिरक्षासंहारकर्मानुरोधेन ब्रह्मविष्णुशङ्करसञ्ज्ञाभिः बोध्यश्च।

बाल्ये अनुभूतस्य वार्द्धक्ये स्मरणानुपपत्त्या मृतदेहे च अविद्यमानतया ज्ञानं न देहाश्रितम्। ज्ञानमूलकत्वादेव अन्येऽपि विशेषगुणाः न देहाश्रिताः। एकेन इन्द्रियेण अनुभूतस्य तदिन्द्रियनाशेऽपि स्मरणस्य जायमानतया एकदेहे अनेकज्ञानिनां सत्त्वे तेषां विपरीतासु दिक्षु युगपद् देहनयनप्रभृतिसम्भवेन देहोन्मथनापत्त्या च ज्ञानादिकं, नेन्द्रियाश्रितम्। मनसोऽणुतया ज्ञानादीनां तदाश्रितत्वे तेषां प्रत्यक्षानुपपत्त्या ज्ञानादयो न मनोनिष्ठाः। किन्तु एभ्यो भिन्नः आत्मैव ज्ञानादीनामाश्रयः।

अत्र चिन्त्यते – न्यायवैशेषिकग्रन्थेषु उपलभ्यमान एष आत्मवादो विमृश्यमानो नावकाशं लभते, मनसः सहयोगेन शरीरस्यैव आत्मत्वाभ्युपगमसम्भवात्। तथाहि– आत्मा नातिरिक्तं द्रव्यम्। देहमनोभ्यामेव तत्साधनीयस्य निखिलप्रयोजनस्य निर्वर्तयितुं शक्यत्वात्।

In Public domain. Digitization Muthulakshmi Research Academy

तदेवमेतन्नये देह एव बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां प्रत्यक्षयोग्यगुणानामाश्रयः। अयोग्यानां धर्माधर्मभावनानामाश्रयो मनः। पृथिव्याः विशेषगुणानां कारणगतैः सजातीयगुणैः पाकेन वा उत्पाद्यमानतया बुद्ध्यादयः पार्थिवस्य मनुष्यादिदेहस्य विशेषगुणाः न भवितुमर्हन्ति, देहावयवानां जडतया बुद्ध्यादिराहित्येन तदीयगुणैः देहे बुद्ध्यादीनामुत्पत्त्यसम्भवात्। पाकेनापि देहे तदुत्पत्तेः पाकजगुणानां सजातीयगुणध्वंसपूर्वकतया दुर्घटत्वात्, इति न शङ्कनीयम्। बुद्ध्यादीनां शरीरस्य सामान्यगुणत्वाभ्युपगमात्। पृथिव्याः सामान्यगुणानामुत्पतौ च अवयवगतसजातीयगुणानां पाकस्य वा अनपेक्षितत्वेन शरीरे अन्यसामान्यगुणानामिव बुद्ध्यादीनामपि प्रकारान्तरेण उत्पत्तिसम्भवात्। बुद्ध्यादीनां शरीरस्य सामान्यगुणत्वाभ्युपगमे रूपादीनामिव यावच्छरीरं तदवस्थानमपि नापादयितुं शक्यम्। शरीरगतानां संयोगादि–सामान्यगुणानामिव तद्गतानां बुद्ध्यादिसामान्यगुणानामपि शरीरसत्त्वे निवृत्तिसम्भवात्।

बुद्ध्यादीनां शरीरगुणत्वे तेषां कुतो न तदीयविशेषगुणत्वमिति न शङ्कनीयम्। विशेषगुणलक्षणेन तत्सङ्ग्रहासम्भवात्। तथाहि– विशेषगुणत्वं नाम द्रव्यविभाजकोपाधि–विशिष्टजातिमद्गुणत्वम्। वैशिष्ट्यञ्च स्वाश्रयवृत्तितावच्छेदकत्वस्वानाश्रयवृत्तितानवच्छेदक–त्वोभयसम्बन्धेन। गन्धत्वं रूपत्वव्याप्यनीलत्वादिकम् अनुष्णाशीतस्पर्शत्वव्याप्यं पाक–जन्यतावच्छेदकं वैजात्यम्, अभास्वरशुक्लत्वव्याप्यं पाकजन्यतावच्छेदकं वैजात्यम्, मधुरत्वव्याप्यं पाकजन्यतावच्छेदकं वैजात्यञ्च उक्तोभयसम्बन्धेन द्रव्यविभाजकोपाधिना पृथिवीत्वादिना विशिष्टं भवतीति तदाश्रयाः गन्धादयः पृथिव्यादीनां विशेषगुणाः। शीतत्वस्य स्नेहत्वस्य सांसिद्धिकद्रवत्वत्वस्य पाकजन्यतानवच्छेदकस्य मधुरत्वव्याप्यवैजात्यस्य च द्रव्यविभाजकोपाधिना जलत्वेन उक्तसम्बन्धाभ्यां विशिष्टतया तद्वन्तःशीतादयः जलस्य विशेषगुणाः। उष्णत्वस्य भास्वरशुक्लत्वस्य उक्तसम्बन्धाभ्यां द्रवयविभाजकोपाधिना तेजस्त्वेन विशिष्टतया तद्वन्तः उष्णादयः तेजसो विशेषगुणाः। पाकजन्यतानवच्छेदिकायाः अनुष्णाशीतस्पर्शत्वव्याप्यायाः जातेः द्रव्यविभाजकोपाधिना वायुत्वेन विशिष्टतया तद्वान् अपाकजानुष्णाशीतस्पर्शः वायोः विशेषगुणः। शब्दत्वस्य द्रव्यविभाजकोपाधिना आकाशत्वेन उक्तसम्बन्धाभ्यां विशिष्टतया तद्वान् शब्दः आकाशस्य विशेषगुणः। बुद्ध्यादीनां देहगतत्वे तेषां पार्थिव, जलीय, तैजस, वायवीयदेहेषु वृत्तितया बुद्धित्वादिजातयः पृथिवीत्वादिषु न केनापि द्रव्यविभाजकोपाधिना उक्तसम्बन्धद्वयेन विशिष्टाः, अत एव तद्वतां बुद्ध्यादीनां पृथिव्यादिविशेषगुणत्वासम्भवेन बुद्ध्यादयो शरीरस्य न विशेषगुणाः अपि तु सामान्यगुणा एव इति सुस्पष्टम्।

In Public domain. Digitization Muthulakshmi Research Academy

धर्माधर्मभावनानामेतन्मते मनोनिष्ठतया धर्मत्वादिजातीनां द्रव्यविभाजकोपाधिना मनस्त्वेन उक्तसम्बन्धाभ्यां विशिष्टतया तद्वन्तो धर्मादयः मनसो विशेषगुणाः।

बुद्ध्यादीनां शरीरगुणत्वे रूपादीनामिव तेषामपि चक्षुरादिभिः ग्रहणेन भाव्यमित्यपि न शङ्कार्हम्। शरीरगुणानां केनचिदेकेनैवेन्द्रियेणग्रहणमिति नियमाभावेन चक्षुषा रूपस्य, त्वचा स्पर्शस्य घ्राणेन गन्धस्य रसनया रसस्य, इव मनसा बुद्ध्यादेः ग्रहणाभ्युपगमे बाधकाभावात्। शरीरगुणानां बाह्येन्द्रियेणैव ग्रहणमिति नियमेन मनोग्राह्याणां बुद्ध्यादीनां शरीरगुणत्वं न सम्भवतीत्यपि न वक्तुमर्हम्। शरीरस्य ज्ञानादिमत्त्वे तद्ग्राहकस्य मनसोऽपि बाह्यद्रव्यगुण-ग्राहकतया बहिरिन्द्रियशब्दव्यपदेशयत्वस्य स्वीकारसम्भवात्। तस्य अन्तरिन्द्रियशब्दव्यप-देशस्य अन्तस्थितत्वमात्रानुरोधित्वात्। किञ्च शरीरस्य बहिर्भागे विद्यमानानामेव गुणानां बहिरिन्द्रियग्राह्यत्वनियमः, बुद्ध्यादयस्तु शरीराभ्यन्तरभागे जायन्ते, अतस्तद् ग्रहणार्थम् अन्तरिन्द्रियस्यैव आवश्यकतया न रूपादीनामिव श्य्यादिसंयोगादीनामिव वा बहिरिन्द्रियेण ग्रहणमापादयितुं शक्यम्।

अयमाशयः – साङ्ख्यदर्शने इन्द्रियाणां ज्ञानकर्मरूपप्रयोजभेनदेन द्विविधतया उभय-विधेन्द्रियाणां सहकारितया यथा मनः ज्ञानेन्द्रियकर्मेन्द्रियोभयात्मकमुच्यते तथैव बुद्ध्यादेः देहादिगुणत्वे मनः बाह्यद्रव्यगुणग्राहकतया बहिरिन्द्रियं शरीराभ्यन्तरस्थिततया अन्तरिन्द्रियञ्च इति वक्तुं शक्यम्। शरीरस्य ज्ञानादिमत्त्वं रूपादयो यथा अन्येन दृश्यन्ते तथैव तस्य ज्ञानाद-योऽपि अन्येन अनुभूयेरन् इत्यपि न शङ्कनीयम्। एकशरीरगतस्य रूपादेः अन्यशरीरस्थ-चक्षुरादिभिः सन्निकृष्टत्वेन अन्येन तद्ग्रहणसम्भवेऽपि एकशरीरगतस्य ज्ञानादेः अन्यशरीरस्थेन अणुना मनसा असन्निकृष्टतया उक्तापत्त्यसम्भवात्। प्रत्यक्षानुभवस्य इन्द्रियसन्निकृष्टमात्र-विषयकत्वात्। शरीरस्य ज्ञानादिमत्त्वे बाल्ये अनुभूतस्य वार्द्धक्ये स्मरणानुपपत्तिः। बालवृद्ध-शरीरयोः भिन्नतया बालशरीरानुभवजन्यसंस्कारस्य वृद्धशरीरे अभावादित्येषापि शङ्का नोचिता। शरीरात्मवादे शरीरगतेनानुभवेन संस्कारोत्पत्तेः मनसि स्वीकारेण बालशरीरगतमनसो वृद्धशरीरेऽपि सत्त्वेन मनोनिष्ठसंस्कारमहिम्ना बाल्येऽनुभूतस्य वृद्धशरीरेऽरपि स्मरणस्योत्पत्ति-सम्भवात्। देहात्मवादे अनुभवस्य संस्कारं प्रति स्वाश्रयविजातीयसंयोगसम्बन्धेन, संस्कारस्य च स्मृतिं प्रति स्वाश्रयविजातीयसंयोगसम्बन्धेन हेतुत्वाभ्युपगमात्। इन्द्रियैः सह शरीरावयवैः वा सह मनसो यः संयोगः स न मनोदेहसंयोगगतसंयोगत्वव्याप्यवैजात्यभाजनम्। अतो न इन्द्रियेषु शरीरावयवेषु वा संस्कारस्य स्मृतेर्वा उत्पत्त्यापत्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

वर्तमानशरीरसहयोगिनो मनसः तच्छरीरजन्यादृष्टवशाद् उत्पन्ने नितान्तं नूतनबालशरीरेऽपि विजातीयसंयोगेन प्रविष्टतया तत्रापि पूर्वशरीरानुभूतार्थस्य स्मरणोत्पत्तौ बाधकाभावेन सद्यो जातस्य शिशोः स्तन्यपाने प्रवृत्तिरपि निर्बाधा, पूर्वशरीरस्थमनसः पूर्वशरीरगतस्तन्यपानेष्टसाधनताऽनुभवजन्यसंस्कारवतः शिशुशरीरे अनुप्रविष्टतया तन्निष्ठोक्त-संस्कारमहिम्ना तत्र स्तन्यपानेष्टसाधनतास्मरणस्य निरूपद्रवत्वात्।

देहात्मवादे पूर्वशरीरेणानुभूतार्थस्य उत्तरशरीरेण स्मृतेरूपगमे चैत्रेणानुभूतस्य मैत्रे स्मरणापत्तिरित्यपि नापादयितुं शक्यं, चैत्रानुभवजन्यसंस्कारस्य चैत्रमनस्येव सत्त्वात् तस्य च मैत्रशरीरेऽसत्त्वात्।

वर्तमानदेहस्वरूप आत्मा आजीवनं विविधेषु कर्मसु व्यापृतो भवति, न च समेषां कर्मणां फलं लभते। मृते तस्मिन् तद्भुक्तफलककर्मणां वैयर्थ्यरूपं कृतहानं,नूतनदेहस्वरूपं आत्मा च जन्मकालादेव सुखदुःखात्मकानि फलानि भुङ्क्ते इति अकृतकर्मणामपि फलोदयरूपोऽकृताभ्यागमश्च देहात्मवादे दुष्परिहरे इत्यपि न वक्तुमर्हम्। वर्तमानशरीरेण कृतानामभुक्तफलानां कर्मणां धर्माधर्मव्यापारभाजनस्य तदधिष्ठातृमनसो नूतने तदर्जिताज्जनिते देहे प्रवेशेन तत्र तत्कर्मणां फलभोगसम्भवेन तेषां सार्थक्यात् सर्वथा नूतने देहेऽपि पूर्वदेहकृतकर्मणामेव फलोदयेनाकृताभ्यागमस्याभावाच्च। देहात्मवादे नायं नियमो यद्यः यत्कर्म करोति स एव तत्फलं भुङ्क्ते तस्यातिरिक्तात्मवादस्य चिरप्ररूढवासनामूलकतया प्रकृतवादेऽनभ्युपगमात्। तत्स्थाने यनमनोऽधिष्ठतेन देहेन यत्कर्म क्रियते तत्फलं तन्मनोऽधिष्ठितेनैव देहेन भुज्यते इति नियमोपगमात्। मनसि देहाधिष्ठातृत्वं देहानुयोगिक-विजातीयसंयोगप्रतियोगित्वं देहस्य मनोऽधिष्ठत्वं च मनः प्रतियोगिकविजातीय-संयोगानुयोगित्वम्।

शरीरेण कृतयोः विहितनिषिद्धकर्मणोः मनस्यसत्त्वेन कुतस्तत्र ताभ्यां पुण्यपापोदयः? कथञ्च मनोनिष्ठाभ्यां ताभ्यां तद्रहिते नूतने शरीरे सुखदुःखात्मकफलोदय इत्यपि नाऽशङ्कितुं शक्यम्। शरीरकर्मभिः स्वाश्रयविजातीयसंयोगेनादृष्टं प्रति, मनोनिष्ठादृष्टस्यपि तादृशसम्बन्धेन सुखदुःखात्मकफलं प्रति कारणत्वोपगमेनोक्तशङ्काया अनवकाशत्वात्। अनुभवसंस्कार-स्मृतिषु कर्मादृष्टफलेषु च साक्षात् सामानाधिकरण्येन कार्यकारणभावस्य उक्तसम्बन्धेन तेषु कार्यकारणभावापेक्षया लघुतया तदनुरोधेनातिरिक्तात्मवाद एवं स्वीकर्तुमुचित इति वचनमपि न चारूतामञ्चति। क्लृप्तपदार्थाश्रयेणैव लघुगुरुकार्यकारणभावयोरुपस्थियौ लघुकार्यकारण-

In Public domain. Digitization Muthulakshmi Research Academy

भावस्यादरात्। यथा मीमांसकमते साध्यव्याप्यो हेतुः हेतुमान् पक्ष इति द्वयोः ज्ञानयोः वादिप्रतिवादिसम्मतयोः अनुमितिं प्रति कारणता, नैयायिकनये च साध्यव्याप्यहेतुमान् पक्ष इति ज्ञानस्य वादिप्रतिवादिसम्मतस्यानुमितिं प्रति कारणतेति पक्षद्वयोपस्थितौ लाघवेन नैयायिकसम्मत एव कार्यकारणभावो मन्यते। तन्मते कार्यकारणतावच्छेदकगर्भे तत्तत्पुरुषाप्रवेशात् समवायसम्बन्धेनानुमितिं प्रति तज्ज्ञानस्य हेतुत्वाभ्युपगमेनान्यदीयतादृश-ज्ञानादन्यस्यानु-मित्यापत्तेरसम्भवात्।

मीमांसकमते च एकस्य व्याप्तिग्रहे अन्यस्य पक्षधर्मताग्रहे एकत्र हेतौ व्याप्तिग्रहे अन्यहेतौ पक्षधर्मताग्रहऽनुमित्यापत्तिवारणाय तत्तत्पुरूषीयतत्साध्यपक्षहेतुकानुमितौ तत्तत्पुरुषीयतद्धेतुधर्मिकतत्साध्यव्याप्तिग्रहस्य तत्तत्पुरुषीयतत्पक्षधर्मिकतद्धेतुमत्ताग्रहस्य च हेतुताया अभ्युपगन्तव्यतया पुरुषभेदेन कार्यकारणभावानन्त्यप्रयुक्तगौरवान्मीमांसासम्मतः कार्यकारणभावस्त्यज्यते। यथा वा अन्यधर्मितावच्छेदककयोग्यताज्ञानादन्यधर्मितावच्छेदक-कशाब्दबोधापत्तिवारणाय कार्यकारणभावावच्छेदकगर्भे धर्मितावच्छेदक-निवेशस्याऽवश्य-कतया शाब्दबोधयोग्यताज्ञानयोः आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावो धर्मितावच्छेदक-भेदमूलकानन्त्यप्रयुक्तगोगौरवग्रस्तः। धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या च तयोः कार्यकारणभावः एकपुरुषीययोग्यताज्ञानादपरपुरुषस्य शाब्दबोधापत्तिपरिहाराय तत्तत्पुरुषीयत्वगर्भोऽपितत्तत्पु-रषातिरिक्तधर्माणां कार्यकारणभावावच्छेदकगर्भेऽप्रवेशेन लाघवललित इति आत्मनिष्ठ-प्रत्यासत्त्या तयोः कार्यकारणभावमस्वीकृत्य धर्मितावच्छेदकनिष्ठप्रत्यासत्त्यैव तयोः कार्य-कारणभावः स्वीक्रियते।

प्रकृते तु नैषा स्थितिः। अतिरिक्तात्मनः वादिप्रतिवादिभ्यामनभ्युपगतत्वेन अनुभवसंस्कारस्मृतिषु कर्मादृष्टफलेषु च साक्षात् सामानाधिकरण्येन हेतुहेतुमद्भावपक्षः प्राप्त एव नास्ति, तत्प्राप्तये चानन्तानां विभुद्रव्यात्मकानां जीवानां कल्पना चातीवगौरवग्रस्ता, अतः तेषु उक्तसम्बन्धेन कार्यकारणभावात्मन एकमात्रपक्षस्यैव प्राप्ततया तदभ्युपगम एव न्याय्यः। किञ्च अतिरिक्तात्मवादे अहं गच्छामि, अहं जानामि इत्यादिप्रयोगेषु आख्यातार्थभेदकल्पनाप्रयुकतमपि गौरवं दुर्वारम्। प्रथमस्थले कृतेः द्वितीयस्थले च आश्रयत्वस्य आख्यातार्थतायाः स्वीकार्यत्वात्। देहात्मवादे च उभयत्र आश्रयत्वमात्रस्यैव तदर्थत्वसम्भवात। किञ्च चैत्रादिपदस्य शरीरगतचैत्रत्वादिजातिप्रवृत्तिनिमित्तकतया चैत्रादिपदार्थस्य शरीररूपतया चैत्रो गच्छति इति वाक्यतः चैत्रे गमनाश्रयत्व-

In Public domain. Digitization Muthulakshmi Research Academy

बोधोपपत्तिसम्भवेऽपि "चैत्रो जानाति" इति वाक्यतः चैत्रे ज्ञानाश्रयत्वबोधस्य अतिरिक्तात्मवादे दुर्घटत्वम्। 'ज्ञा' धातूत्तराख्यातस्यावच्छेदकत्वमर्थमङ्गीकृत्य तद्वाक्यतः यथार्थशाब्दबोधोदयः नोपपादयितुं शक्यः। तथा सति ईश्वरीयज्ञानस्य नित्यतया अनवच्छित्वेन ईश्वरःसर्वं जानातीति वाक्यार्थबोधस्यानुपपत्तिप्रसङ्गात्। चैत्रादिपदानां स्वाश्रयत्वस्वाश्रयावच्छेद्यत्वान्यतरसम्बन्धेन शरीरगतचैत्रत्वादिजातिप्रवृत्तिनिमित्तकत्वाभ्युपगमेन शरीरात्मोभयपरतामभ्युपेत्य आख्यातस्य च आश्रयत्वार्थकतां स्वीकृत्यापि चैत्रो गच्छति चैत्रो जानाति इत्येतद्वाक्यार्थबोधः नोपपादयितुं शक्यते। चैत्रो न जानातीति वाक्यार्थवोधस्य सत्त्वेऽपि चैत्रो जानातीति बोधस्याऽपत्तिप्रसङ्गात् प्रथमस्य शरीरमाश्रित्य द्वितीयस्य च आत्मानमाश्रित्य द्वयोरपि युगपदुत्पत्तिसम्भवात्।

देहात्मवादमाश्रित्य कश्चिदेवमाशङ्कते यत् संस्कारस्य स्वाश्रयसंयोगसम्बन्धेन स्मृतिं प्रति कारणत्वे तेन सम्बन्धेन तस्य शरीरनिष्ठताया इव इन्द्रियनिष्ठताया अपि सत्त्वेन इन्द्रियेऽपि स्मृत्युत्पादापत्तिः। इन्द्रियेऽपि स्मृत्याश्रयत्वस्वीकारे ज्ञानाश्रत्वेन तस्याप्यात्मत्वापत्तिः। परमिंयं शङ्का नोचिता, इन्द्रियदेहावयवादिव्यावृत्तेन स्वाश्रयविजातीयसंयोगेनैव संस्कारं प्रत्यनुभवस्य, स्मृतिं प्रति च संस्कारस्य हेतुत्वोपगमेनोक्तापत्त्यसम्भवात्।

अतएव घटपटादिष्वपि मनस्संयोगसम्भवेन तत्रापि स्मृतेरुत्पत्तेः सम्भाव्यता तेषामपि आत्मत्वापत्तिरित्यपि नाऽशङ्कितुं शक्यम्। कारणतावच्छेदकसम्बन्धतयाऽभ्युपगतस्य मनोविजातीयसंयोगस्य तेष्वभावात्। समानकलीनत्वैकज्ञानविषयत्वादीनामपि स्वाश्रयसंयोग-समकक्षतया तत्सम्बन्धैरपि स्मृतिं प्रति संस्कारस्य हेतुत्वापत्त्या सम्पूर्णस्य जगत एव ज्ञानाश्रयत्वेन आत्मत्वापत्तिशङ्का तु शङ्कितुः दुस्साहसमात्रसूचिका, अतिरिक्तात्मवादे मूर्तद्रव्यमात्रे आत्मनः संयोगसत्त्वेऽपि तत्समकक्षस्य समानकालीनत्वादिसम्बन्धस्यापि घटादिषु सत्त्वेऽपि यथा न घटाद्यवच्छेदेन आत्मनि ज्ञानोत्पत्तिः अपि तु तत्तदात्मविजातीय-संयोगाश्रयतत्तद्देहावच्छेदेनैव ज्ञानोत्पत्तिर्भवतीति शरीरस्यैव ज्ञानाद्यवच्छेदकत्वं न घटपटादीनाम्, तथैव देहात्मवादे मनस्संयोगस्य तत्तुल्यस्य सम्बन्धान्तरस्य च घटपटादिषु सत्त्वेऽपि न तत्र स्मृत्याद्युत्पत्तिः। किन्तु संस्काराद्याश्रयमनसो विजातीयसंयोगाश्रये शरीरे एव स्मृत्याद्युत्पत्तिः, इति तत्त्वस्य अनायसवेद्यस्य अज्ञानमूलकत्वादुक्तशङ्कायाः।

देहात्मवादमाक्षेप्तुकामः कश्चिदेवं ब्रूते यत् देहमनोभ्यां जीवात्मनो निराकारणप्रयासः देहमनसोरुभयोरात्मात्वाभ्युपगमं पर्यवस्यति।

In Public domain. Digitization Muthulakshmi Research Academy

न चैवं स्वीकर्तुमर्हम्। देहस्यानित्यतया मनसश्च नित्यतया आत्मनि विरूद्धयोः नित्यत्वानित्यत्वयोः समावेशप्रसङ्गात्। कदाचिदहं नित्यः कदाचिदहं नश्वर इत्यनुभव-विरुद्धस्य प्रतीतिभेदस्य प्रसङ्गाच्च परमिदं वचनं न चारु, देहात्मवादे गौतमेन इच्छाद्वेष-प्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्, इति सूत्रेण आत्मलिङ्गतया उक्तानामिच्छादिगुणानां देहात्मवादे देह एव स्वीकारेण तत्रैव आत्मत्वस्य मनसि च तदाश्रयत्वमस्वीकृत्य धर्माधर्म-भावनामात्राभ्युपगमेन तदुपकरणत्वस्य स्वीकृत्या देहमनोभ्यां जीवात्मनो निराकरणप्रयासस्य देहमनसोरुभयोरात्मत्वाभ्तुपगमपर्यवसायिताबुद्धेरनवधानमूलकत्वात्।

मनसोऽणुपरिमाणतया तस्य शरीरव्यापित्वाभावेन नखशिखान्तं समग्रं शरीरं व्याप्य उत्पत्तिमत्त्वेनानुभूयमानाया बुद्धेः समग्रशरीरव्यापिनः अतिरिक्तात्मनोऽस्वीकारे देहात्मवादे उपपत्तिर्न भवितुमर्हतीति शङ्काऽपि नोचिता।

अतिरिक्तात्मवादे आत्ममनस्संयोगस्य एकदा शरीरस्य कस्मिंश्चित् मनस्सम्मिते भाग एव सत्त्वेऽपि यथा समग्रं शरीरं व्याप्य उत्पत्तिमत्तयाऽनुभूयमाना बुद्धिरूपपद्यते तथैव देहात्म-वादेऽपि तदुपपत्तिसम्भवे बाधकाभावात्।

आपामरसाधारणानुभवानुसारं मनः अन्तरिन्द्रियम्। मनसा करोमि मनसा अवधारयामि इत्यादि प्रतीतिबलेन च करणमात्रम्। अतः करणमात्रस्य तस्याऽत्मत्वाभ्युपगमः सर्वलोकसिद्धस्याऽत्मकर्तृत्वाभ्युपगमस्य विरुद्ध इति शङ्काऽपि नोचिता। देहात्मवादे देहमात्रस्यैवाऽत्मत्वं मनसश्च तदुपकरणत्वमात्रं , नात्मत्वमिति पूर्वमेव स्पष्टीकृतत्वात्।

मनोगतस्यादृष्टस्य शरीरे चैतन्याधायकत्वस्वीकारे मृतशरीरे नियमतः चैतन्या-भावानुपपत्तिः। शरीरमरणोत्तरमपि चैतन्याधायकादृष्टविशिष्टस्य मनसः विद्यमानत्वादिति शङ्का तु न सुलभावकाशा। शरीरस्य मरणकाल एव नियमेन तेन सह मनसः सम्बन्धविनाशस्य अतिरिक्तात्मवादे शरीरस्य मरणकाल एव तेन सह आत्मनो विजातीयसंयोगविनाशस्येव जायमानत्वात्।

यदि शरीरमात्मा तर्हि राहोः शिर इतिवद् मम शरीरमित्यादिप्रयोगाणां भाक्तत्वेन कथञ्चित् समर्थनेऽपि अहं शरीरमित्येतादृशप्रयोगः कदाऽपि कुतो न प्रवर्तते इत्येष प्रश्नःदुरुत्तर इति कथनमपि नौचित्यमञ्चति। शब्दप्रयोगस्य शब्दार्थज्ञानाधीनतया अहं शरीरमिति ज्ञानाभावेन तादृशप्रयोगस्य प्रवृत्त्यभावात्। शरीरस्याऽत्मत्वे तादृशज्ञानमेव कुतो न जायत

In Public domain. Digitization Muthulakshmi Research Academy

इत्यपि न शङ्कितुं शक्यम्। अहमर्थस्य स्वगतयोग्यगुणाश्रयेणैव ग्राह्यत्वनियमेन अहं स्थूलः अहं कृशः अहं सुखी अहं दुःखी इत्यादिरूपेणैव अहमाकारज्ञानस्य आनुभाविकत्वेन अहं शरीरमित्याकारकज्ञानस्यातिरिक्तात्मवादे अहमात्मेति ज्ञानस्येव अनुदयात्। अतिरिक्तात्मवादेऽपि अहमात्मेत्यनुभवस्य आपामरसाधारण्येन स्वीकरणं न सम्भवति। अन्यथा तस्य विवादविषयत्वानुपपत्तेः अत एवोक्तम् भाषापरिच्छेदे विश्वनाथेन - 'अध्यक्षो विशेषगुणयोगतः' - योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेन आत्मनः प्रत्यक्षत्वं सम्भवति नान्यथा।

क्षिप्तविक्षिप्तादिचित्तभूमिषु शरीरावयवेभ्यः समग्रात् शरीराच्च सर्वानुभवासिद्ध आत्मबुद्धेरपसारः देहात्मवादे समर्थयितुं न शक्य इत्येषाऽपि चिन्ता निराधारा। देहात्मवादेऽपि तादृशीनां चित्तभूमीनां सम्भवेन तन्मूलकस्य उक्तात्मबुद्धेरपसारस्य सम्भवे बाधकाभावात्।

अहं वा नवेति न कश्चित् सन्दिग्धे। शरीरमात्मा वा नवेति विचारवन्तो मनीषिणोऽपि संशेरते। यदि शरीरमेवाऽत्मा तदा तत्रात्मत्वसन्देहे कुतो न कस्यापि अहं वा न वेति सन्देह इति प्रश्नोऽपि नोचितः। यतः अतिरिक्तात्मवादे शरीरमनात्मेति निश्चयः देहात्मवादे च शरीरमात्मेति निश्चयः अतो वादद्वय एवोक्तसन्देह आहार्यः, अहमाकारनिश्चयश्चानाहार्यः अतिरिक्तात्मवादे देहात्मवादे चोभयत्र समानः। स च अहं वा न वेति संशयस्य निरोधी। अतः शरीरे आहार्यात्मत्वसन्देहेऽपि अहमाकारनिश्चयस्य निर्बाधितया तत्प्रतिबन्धवशान्नोदेतुमर्हति तादृशः संशयः। अत्रायमाशयो यत् अहमिति शब्दस्योच्चारणकर्तैव अहमर्थो भवति, अतोऽतिरिक्तात्मवादे अहमिति शब्दप्रयोक्ता अतिरिक्त आत्मा अहमर्थः, देहात्मवादे अहमिति शब्दप्रयोक्ता देहः अहमर्थः। उभयोरेव स्वस्वमतानुसारेण अहमर्थस्य अस्तित्वं निश्चितम्। अतः अहमस्मि वा न वेति स्वरूपे पर्यवसायिनः अहं वा न वेति संशयस्य अहमस्मीति निश्चयप्रतिबद्ध्यतया न तदुत्पत्तिसम्भवः। शरीरे आत्मत्वस्योक्ताहार्यसंशये सत्यपि अहमस्मीति निश्चयस्य अक्षुण्णत्वात्।

शरीरमेव अहं शरीरं वा न वेति विमृशतीति कथनं देहात्मवादेऽतिविचित्रमति वचनमपि देहात्मवादाक्षेप्तुर्न चारुतां धत्ते। यतोऽतिरिक्तात्मवादे अहं न शरीरमिति निश्चयः, देहात्मवादे च अहं शरीरमिति निश्चयः, अत उभयोरेव वादयोरूक्तविमर्शस्याऽहार्यत्वेन देहात्मवादे शरीरस्य अहं शरीरं वा न वेति विमर्शकर्तृत्वकथनं कुतो विचित्रमिति स एव वक्तुमर्हति।

In Public domain. Digitization Muthulakshmi Research Academy

अहमिति प्रतीतिः कदाचिन्मूर्धतो जायते, कदाचित् तदीयमज्ञातन्तुभ्यो जायते, अतो देहात्मवादे अहं मे मूर्धा मज्ञातन्तवो वा एतादृशानुभवस्योदयोऽनिवार्य इति कथनमपि न पाण्डित्यानुरूपम्। मूर्धादितो जायमानाया अपि प्रतीतेस्ततो भिन्ने देहाभिधे अवयविन्येव विद्यमानतया तस्यैवाहमर्थत्वाद् अहमर्थताया ज्ञानाश्रयत्वनियतत्वात्।

अहम्प्रतीतिः अन्यसकलशरीरसुखदुःखादिप्रतीतिभ्यो नितरां भिन्नेति सर्वानुभवगोचरा, अतः शरीरतो मनसोऽपि भिन्नं किमपि तस्या अधिष्ठानमावश्यकमिति कथनमपि न मनीषानुरूपम्। केवलाया अहम् इत्यकारायाःप्रतीतेरतिरिक्तात्मवादिभिरप्यस्वीकारात्। अहमितिशब्दा अहमुच्चारययितृनिष्ठो देहेऽधिश्रित एवेति कुतस्तस्या अधिष्ठानान्तरापेक्षेति दुर्ग्रहम्।

स्वप्नसदृशीषु कासुचित् चैतन्यावस्थासु बाह्यपदार्थानां स्वशरीरस्यापि च सत्यत्वं सन्दिग्धं तिरोहितं विपर्यस्तं प्रतिषिद्धं च भवदुपलभ्यते। परमात्मनः सत्यत्वं तथा भवन्नोपलभ्यते। यदि शरीरमेव आत्मा तदा तस्यापि सत्त्वं कुतो न तादृशं भवदुपलभ्यते एषा शङ्काऽपि निःसत्त्वा, सतां पदार्थानां सत्यतायास्तथा प्रतीतेः भ्रमतया यादृशदोषजन्यत्वं तादृशदोषणैव तत्काले शरीरे आत्मत्वबुद्धेः प्रतिबन्धेनानात्मरूपतया शरीरस्य सत्यतायाः सन्दिग्धत्वाद्यसम्भवात्। सत्यं शरीरमेव आत्मा, न तौ मिथोऽन्यौ। किन्तु चेष्टाश्रयत्वलक्षणं शरीरत्वं ज्ञानाद्याश्रयत्वरूपमात्मत्वं परस्परं भिन्नम्। उक्तासु चैतन्यावस्थासु तादृश-प्रतीत्याधायकदोषवशान्न तदानीं देहे आत्मत्वबुद्धिः। किन्तु शरीरत्वस्यैव बुद्धिरतः शरीरत्वेन गृह्यमाणस्यैव देहस्य सत्यत्वं सन्दिग्धवादिभाक्, न तु आत्मत्वेन गृह्यमाणस्येति विभावनीयम्।

देहात्मवादे शरीरस्य सुखसमृद्धिसम्पन्नतासम्पादनमेव परमः पुरूषार्थः, तदुपेक्षया लोककल्याणाय खेदस्वीकारे दृश्यमाना मानवप्रवृत्तिः अस्मिन् वादे कथमुपपद्येत? अयं प्रश्नोऽपि देहात्मवादे न दुरुत्तरः। यतो यथा अतिरिक्तात्मवादे लोकप्रवृत्तिः प्रायेण स्वस्य सुखताया निर्दुःखतायाश्च सम्पादनायैव भवति, कतिपयविवेकिनामेव च स्वसुखनिरभिलाषतापूर्वकं लोकहिताय खेदस्वीकारे प्रवृत्तिः भवति तथैव देहात्मवादेऽपि तदुत्पत्तौ न कश्चित् प्रत्यूहः। अतिरिक्तात्मवादी यथा स्वभिन्नानां हिताय स्वसुखाभिलाषं शिथिलीकृत्य प्रवर्तते खेदं च सहते तथैव देहात्मवादी अपि यदि सुशिक्षितः सुसंस्कृतो विवेकी तदा स्वसुखे निरभिलाषः सन् स्वभिन्नानां देहात्मनां हिताय प्रवर्तिष्यत एव खेदं च

In Public domain. Digitization Muthulakshmi Research Academy

सहिष्यत एव, संसारेऽस्त्येव विपुलो देहात्मवादिवर्गः यस्य सदस्येषु बहवो लोकहिताय आत्मनो महान्तं धनराशिमुत्सृज्य विद्यालयचिकित्सालयादीनां निर्मापणे आनन्दमनुभवन्ति।

कश्चिद् विपश्चिदेवमाशङ्कते यद् देहात्मवादे अदृष्टभावनयोर्मनोनिष्ठत्वस्वीकरे सुषुप्तौ मनसः पुरीतत्यां प्रवेशे तत्काले श्वासप्रश्वासयोः गतिः दुरुपपादास्यात्। अतोऽदृष्टाद्याश्रयस्यातिरिक्तात्मनः स्वीकार आवशयकः, तत्सत्त्वे तत्प्रयत्नेन श्वासप्रश्वासयोः गतिसम्भवात्। परमेषाऽपि शङ्का निर्जीवप्रायैव। त्वङ्मनस्संयोगस्य ज्ञानमात्रं प्रत्येव कारणत्वात्। सुषुप्तौ ज्ञानानुदयादेव तन्मूलकेच्छाद्वेषादीनामनुदयस्य सुसम्पन्नत्वात्। जीवनयोनियत्नस्य श्वासादिगतिसम्पादकस्य ज्ञानानपेक्षतया जीवनादृष्टमात्रमूलकतया पुरीतति स्थितस्यापि मनसो जीवनादृष्टजन्येन शरीरयत्नेन श्वासादीनां गत्युपपादनसम्भवात्।

देहात्मवादे आजीवनं मनुष्यस्य कर्मव्यापृतिः नोपपद्यते, चरमे वयसि क्रियमाणानां तत्काल एव फलाजनकानां कर्मणां जीवने फलप्राप्तेरसम्भाव्यत्वादित्यपि न शङ्कनीयम्। स्वतोऽधिकजीविनामुत्तरकाले जनिष्यमाणानां च तादृशकर्मफलप्राप्त्यभिप्रायेण आप्राणान्तं कर्मव्यापृतेः सम्भवात्। मनुष्यः स्वस्य लाभायैव कार्यं कुरुत इति न वक्तुं शक्यम्, लोकहितार्थमपि बहुषु कार्येषु मनुष्यस्य प्रवृत्तिदर्शनात्। यानि लोकहितावहानि कार्याणि कर्तुः वर्तमाने जीवने तल्लाभाय न भवन्ति, तत्साध्यपुण्यस्य जन्मान्तरे फलाशयैव तानि कार्याणि क्रियन्ते इत्यपि वक्तुं न शक्यम्। वर्तमानजीवनान्तमेव स्वास्तित्वं मन्यमानैः जन्मान्तरे विश्वासरहितैरप्यनेकैः आजीवनं क्रियमाणानां परैरेव प्राप्यलाभानां बहुवित्तव्ययायास–साध्यकार्याणां प्रत्यक्षसिद्धत्वात्।

'शरीरं परार्थं सङ्घातरूपत्वात् शय्यावत्' इत्यनुमानेन सिद्ध्यन् परः शरीरभिन्न आत्मा न वाङ्मात्रेण युक्त्याऽऽभासजालेन वा निराकर्तुं शक्य इत्यपि वक्तुमनर्हम्। परार्थत्वस्य दुर्वचत्वात्। तथाहि – परार्थत्वं यदि स्वभिन्नस्य भोगसाधनत्वं तदा दृष्टान्ते शय्यादौ तद् दुर्घटम्। स्वभिन्नतया उक्तानुमानात् पूर्वमात्मनः ग्रहीतुमशक्यत्वात्। शरीरादेः ग्रहणे चातिरिक्तात्मवादे तदीयभोगाप्रसिद्धेः परार्थत्वं यदि भोगानाश्रयत्वे सति भोगसाधनत्वं तदा पक्षे शरीरे हेतुरूच्यते तदा व्याप्यत्वासिद्धिः। अतिरिक्तावयविवादे शरीरस्य सङ्घातत्वं त्यक्त्वा जनयत्वं हेतुरूच्येत तदा व्याप्यत्वासिद्धिः। जडत्वस्योपाधित्वात्।

देहात्मवादे यागादिषु प्रवृत्तिरनुपपन्नेत्यपि न वक्तुं युक्तम्। वर्तमानजीवन एवं फलप्रदेषु पुत्रेष्ट्यादियागेषु प्रवृत्तौ बाधकाभावात्। ये यागाः स्वर्गफलकतया निर्दिष्टाः तेष्वपि

In Public domain. Digitization Muthulakshmi Research Academy

प्रवृत्तिर्नानुपपन्ना। यथा वर्णितस्य स्वर्गस्य सर्वस्पृहणीयतया देहात्मवादिनामपि तत्कामनायाः सम्भवेन तदर्थं तादृशयागेष्वपि प्रवृत्तिसम्भवात्। यदि देहात्मवादे सति देहे स्वर्गो न लभ्यते, मा लभ्यताम्, आनुषङ्गिकं लोकप्रशस्त्यादिफलं तु लभ्यत एव। उद्धेश्यभूतं पलमपि कर्तृदेहस्थितमनः प्रवेशास्पदे उत्तरभाविनि देहे च भवितैव। परेभ्यो लाभप्रदेषु कर्मस्वपि सहृदयानां प्रवृत्तिबाहुल्यस्य लोकसिद्धतया तादृशयागेष्वपि मानवप्रवृत्तिः सुघटैव।

देहात्मवादे पुनर्जन्म नोपपद्यत इत्यपि शङ्का नोद्भावयितुमर्हा। अतिरिक्तात्मवादेऽपि पुनर्जन्मनः समर्थनासम्भवात्। स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपस्य जन्मनो नित्यात्मनो दुर्घटत्वात्। तदधिकरणस्य सर्वस्यैव क्षणस्य पूर्वपूर्वतदधिकरणक्षणध्वंसाधिं-करणतया तस्य स्वाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्धेः। यदि च नवोत्पन्नेन देहेन आत्मन आद्यो विजातीयः संयोग एव तज्जन्मत्वेनोपचर्यते तदा तादृशो जन्मोपचारो मनोद्वारेण देहात्मवादेऽपिशक्योपपत्तिक एव। तद्वादे देहस्य तथा जन्माभावेऽपि तज्जन्यादृष्टविशिष्टमनसो भाविना नवेन देहेन सह तादृशसम्बन्धसम्भवात्। तादृशसम्बन्धस्यैव तज्जन्मत्वेनोपचरितुं शक्यत्वात्।

देहात्मवादे बन्धमोक्षव्यवस्थाया अनुपपत्तिरपिनाऽपादयितुं शक्या, शरीरान्तर-भोग्यफलौपयिकादृष्टजनककर्मकर्तृत्वमेव बन्धः, तदभाव एव मोक्ष इत्येवं बन्धमोक्षयोः निर्वचनसम्भवात्। तथाहि– यस्मिन् देहे न देहात्मत्वस्वरूपतत्त्वस्य योगप्रभवः साक्षात्कारः स शरीरान्त रभोग्यफलौपयिकादृष्टजनककर्मकर्तृत्वाद् बद्धः। यश्च तादृशं तत्त्वं साक्षात्कृत्य तादृशकर्मीविमुखःस मुक्तः। बद्ध इव मुक्तोऽपि यदि निरन्वयं नश्यत्येव तदा कुतः कोऽपि देहो मुक्तये तत्त्वसाक्षात्काराय वैषयिकं सुखमुपेक्षेत इत्यपि न शङ्कनीयम्। अतिरिक्तात्मवादेऽपि मुक्तात्मनो मृतोपमतया तादृश्याः शङ्कायाः सम्भवात्। देहगतानुभवजन्यं संस्कारं देहकृतकर्मजन्यमदृष्टं च वहतो नित्यस्य मनसः सम्बन्धेन नवनवेषु देहेषु पूर्वपूर्व-देहैरनुभूतस्यार्थस्य स्मरणं कृतकर्मणां फलभोगं चोपपाद्य देहात्मवादस्थापनया न कोऽपि लाभ इत्यपि वचो नोचितम्। न्यायवैशेषिकनये नित्यानां विभूनामनन्तजीवात्मनां स्वीकारेण तदपेक्षया देहात्मवादे बहुलाघवात्।

In Public domain. Digitization Muthulakshmi Research Academy

वैदिककर्मप्रबोधः

डा. वंशीकृष्णः घनपाठी

सुविदितमेवैतत् बुधजनैर्यत् कृत्स्नां मानवजातिं श्रेयः प्रापयितुं ब्रह्मणो निर्गतो ज्ञानपुञ्जो वेद इत्याख्यायत इति। सर्वेषामास्तिकानामनिष्टविनाशनाय, दुःखव्यावर्तनाय, इष्टार्थसाधनाय, निरन्तरसुखजीवनोद्भावनाय च प्रकाममलौकिकानुपायान् वेदयत्ययं वेदग्रन्थः। ततोधिकं येनकेनचित् सुकृतविशेषेमसम्प्राप्तमनुष्यजनुषः सार्थक्यमवेप्सूनां, विचिकित्सूनां, जननमरणरूपसंसारचक्रस्य षड्भावविकारनिवृत्तिपूर्वकं, पुनरावृत्तिरहितनिरतिशयसुखास्पद–ब्राह्मीस्थिति साधनभूतान् पथश्च सन्दर्शयति वेदः। एवं ऐहिकसुखप्रापणाय, स्वर्गादि परलोकसाधनाय चोपायान् बोधयित्वा, आत्यन्तिकसुखं ब्रह्मानन्दात्मकम् अधिगन्तुं पथदर्शिका वर्तते श्रुतिः।

वेदः कर्मकाण्डज्ञानकाण्ड इति द्विविधः। इह लेके, परलोके च सुखप्रापकाणि, दुःखनिर्मूलकानि वेदोक्तानि कर्माणि कर्मकाण्डनाम्ना सुप्रथितानि। तथा च संसार–चक्रभयमुन्मूल्यशाश्वतींपरब्रह्मावाप्तिमुपदिशब्द्भागः ज्ञानकाण्ड इति प्रसिद्धः। परिमाणदृष्ट्या कर्मकाण्डसम्बन्धिग्रन्थो वेदेऽधिकतरो वर्तते। तथा चायं कर्मकाण्डः क्रिया बाहुल्यवत् चकास्ति।

पाञ्चभौतिकदेहोपादानप्रभृति, देहोत्सर्गपर्यन्तं मनुष्यो यत्किञ्चिदाशासान एव वर्वर्ति। ब्रह्मचर्यसमये विद्यासमुपार्जनदशायां वा, गार्हस्थ्यजीवने वा मनुष्यस्य वाञ्छाः अनन्ताः अपाराश्च। तासु काश्चन धर्माविरुद्धाः भवन्ति। अवशिष्टाः प्रायेण लोभपूर्णा भवेयुः। सर्वासां वाञ्छानां परिपूर्तये, यं कमप्युपायमवगन्तुं सर्वोपीच्छुको भवति। लौकिकैरुपायै रनवाप्तकामनापरिपूर्त्यर्थम्, अध्वानमन्विच्छद्भ्यो जनेभ्यश्श्रेयस्करं मार्गमुपदिशन् विपुलो विभाति वैदिककर्मकाण्डः। संसारे प्रवर्तयतीति प्रवृत्तिकर्मनाम्ना चायं कर्मकाण्डः विश्रूयते। साधारण्येन जनानां जीवने अत्यधिको भागः प्रवृत्तिकर्मभिरेव व्यापृतो विद्यत इति निस्सन्दिग्धम्।

एवं सति, कर्माचरणे समभिप्रवृत्तस्य, कर्मकाण्डे गृहीताभिनिवेशस्य मनुष्यस्य संसारनिवर्तकत्वभावना (निवृत्त्यनुकूलमानसिकव्यापारः) उत स्वयं सिध्यति? आहोस्वित् परप्रेरिता परोपदिष्टा भवेद्वा? वैदिककर्मणां चोदकवाक्यानि, तदंगमर्थवादादिकं च पौनःपुन्येन

In Public domain. Digitization Muthulakshmi Research Academy

कर्तारमभिप्रवर्तयन्ति, तत एव कर्मण्यो यायजूको भवेत् किल मनुष्यः। एवं तर्हि सर्वात्मना प्रवृत्तिमार्गविरुद्धं संसारनिवर्तकपथं कथमवलम्बते मनुष्यः? इत्याशङ्का।

तथैव वेदवाक्यविचारकशास्त्रं मीमांसानामकं पूर्वोत्तरभेदेन प्रवृत्तिनिवृत्त्यनुकूलानि कर्माणि व्याख्यातृद्विधा दरीदृश्यते। तत्प्रणेतारौ जैमिनिव्यासाभिधानौ महर्षी स्वीयमतानुकूलसूत्राणि मिथो विरोधाभासानि रचयामासतुः। इत्थं परस्परं विभिन्नयोः कर्मकाण्डज्ञनकाण्डप्रस्थानयोरपरिहार्या वा विरुद्धार्थता? अथवा विद्येत वाऽवकाशस्साध्यसाधनभावस्य? उत मानसिकव्यापारमात्रसापेक्षं (ब्रह्म) ज्ञानमेव कर्मसाधनम्? अथवा गुणक्रियाद्रव्यसापेक्षं कर्मैव ज्ञानवाप्तेस्साधनम्? नाद्यः। कारणव्यतिरेकेण कार्यस्यासद्भावो विख्यात एव। अतः साधनानन्तरनपेक्षं (ब्रह्म) ज्ञानं कर्मकारणं न भवितुमर्हति। नापि द्वितीयः। कारणान्तरानपेक्षस्य (ब्रह्म) ज्ञानस्य कर्म कदाचिदपि हेतुर्न भवतीति आचार्यैर्विनिश्चितम्।

एवं तर्हि कर्मज्ञानकाण्डयोस्सम्बन्धस्सर्वात्मना निरस्तो वा? कर्मणो ज्ञानावाप्ते स्साक्षात्साधकत्वं यद्यपि वेदान्तशास्त्रप्रवर्तकैर्निराक्रियते, तथापि कर्माचरणफलकचित्तशुद्धिसम्पादनद्वारा परम्परा साधनभूतत्वं शिष्टैर्नप्रत्याख्यायते। चित्तसंशुद्धये कर्म न तु वस्तूपलब्धये। इत्यपि शिष्टवचः। तर्हि परम्परया अपि कर्मसु निवर्तकत्वभावः, कुत्रचिदपि वर्तेत खलु? न चेदाजीवनं कर्माण्याचरता जनेन झटित्यहेतुकज्ञानेप्सा कथमुद्बुध्येत? निवृत्तिमार्गस्संसेव्य इति परप्रचोदनेनापि कथं निश्चिन्वीत? सोयं निवर्तकत्वभावोद्भासकः तत्त्वबोधः वैदिककर्मसु बहुधानेकत्राभिव्यज्यत इति परिशोधनपूर्वकं निरूपणे सम्प्रवृत्त एष परिशोधनप्रबन्धः।

भावाभिव्यक्तिप्रकाराः

भावव्यञ्जनाय तिस्रः फक्किकाः साहित्यशास्त्रे प्रसिद्धाः। वाच्योक्तिः, व्यङ्ग्योक्तिः, (वक्रोक्तिः, काकूक्तिप्रकाराः) ध्वनिश्चेति तिस्रोपि यथोचितं कवीश्वरैः काव्यनाटकप्रबन्धेषु हृद्यङ्गमं प्रयुक्ताः। आनन्दवर्धनजगन्नाथादि विपश्चिद्भिः ध्वन्यादि भावव्यक्तीकरणपद्धतयः स्वीयग्रन्थेषु युक्तिपूर्वकमुपनिबद्धाः। परन्तु एतत्प्रसङ्गस्य मातृका वेदग्रन्थेष्वेव वर्तत इत्यवश्यं स्मर्तव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

वेदग्रन्थेषु, उत्पत्तिवाक्यविधाने (चोदकवाक्येषु), तदङ्गविधाने च वाच्योक्तिरुपयुज्यते। परन्तु, वाच्योक्त्यपेक्षया इतरे व्यङ्ग्योक्तिध्वनिफक्किके वैदिककर्मोपदेशे तत्त्वबोधनाय भूयो भूय उपयुयुजिरे। वाच्योक्तिः श्रोतरि अथवा कर्तरि कश्चित् प्रभावं जनयति। किन्तु तदपेक्षया व्यङ्ग्योक्तिः, ततोधिकं ध्वनिश्च विचारणाहेतुकौ तत्त्वावधारणजिज्ञासां प्रयोजयतः। तस्मादेव इतिकर्तव्यता विधाने वा, उत्पत्तिवाक्यविधाने चावलम्बिता वाच्योक्तिफक्किका, कर्मप्रसङ्गान्तर्गततत्त्वबोधावसरे विरलं प्रयुक्ता सती, व्यङ्ग्योक्तिध्वन्योरवकाशं प्रकल्पितवती।

व्यङ्ग्योक्तिध्वनी, कर्माचरणात्प्राक्, तदनन्तरमपि कर्तरि विचारणां प्रयोजयतः। इतोऽप्यधिकं करणीयं वर्तते वा? पुनःपुनरिदमेव कर्म कर्तव्यं वा? कदास्य फलमनुभविष्यामि? फलावाप्तिमनु कर्माचरणम्, तदनु फलाकाङ्क्षा? कुत इयं परम्परा सम्प्रवृत्ता? आश्चर्यकरशृङ्खलाबद्धो ननु भवामि, कथमनया परिमुक्तो भूयासमित्यादि जिज्ञासां प्रचोद्य, कर्मोपदेशान्तर्गततत्त्वबोधकध्वनिः संसारनिवर्तकदिशायां यजमानं प्रस्थापयति।

व्यङ्ग्योक्तिध्वनिप्रकारयोः प्रयुक्तौ हेत्वन्तरमेवं भाति। देवानां परोक्षप्रियत्वं श्रुतिप्रसिद्धमेव हि। परोक्षप्रिया इव हि देवाः। इति श्रुतिः। अधुना प्रत्यक्षपरोक्षपदे विचारयामः। अक्षिणी प्रति प्रत्यक्षमिति विग्रहः। अक्ष्णोरभिमुखं प्रत्यक्षं भवतीति स्पष्टार्थः। एवमक्ष्णोः परं परोक्षमिति विग्रहे अक्षिभ्यां व्यवहितमित्यर्थःफलति। अव्ययीभावसमासे, समासान्तप्रत्ययष्टच् उभयत्र विधीयते। वस्तुतः, अक्षिशब्दस्त्विन्द्रियाणामुपलक्षणम्। सर्वेन्द्रियाणां नयनं प्रधानमिति किलोच्यते बुधैः। अत एव श्रूयमाणं सङ्गीतादि ध्वनयः, स्पर्शद्वारेणानुभूयमाना मृदुशय्यादयः, घ्राणेन्द्रियघ्रातानि सुरभिलपुष्पादीनि, रसनयावलीढानि फलादीनि च प्रत्यक्षज्ञानगम्यान्येव भवन्ति।

देवाः प्रत्यक्षतापेक्षया पारोक्ष्यं प्रीणन्तीति श्रुत्या ज्ञायते। अत एव देवानां दर्शनेन व्यवहितोपि जनः परोक्षं तेषामनुग्रहपात्रं भवति। परम्ब्रह्मव्यवहारस्तु किञ्चित् एतस्मात् भिद्यते। प्रत्यक्षभिन्नं परोक्षं, परोक्षभिन्नं प्रत्यक्षमिति सामान्यनियमः। अर्थात् अक्ष्णोः व्यवहितमव्यवहितं वस्तु भवतीति। परम्ब्रह्म तु नापि प्रत्यक्षमिन्द्रियातीतत्वात्, नैव परोक्षं सर्वानुभूतियोग्यत्वात्। ब्रह्म यद्यपि इन्द्रिययोगाभावादिन्द्रियाभिमुख्यव्यवहारातीतं, मनः प्रधानेन्द्रियव्यवहितमपि नास्ति।

In Public domain. Digitization Muthulakshmi Research Academy

अतो ब्रह्मानुभूतिः अपरोक्षेत्याख्यायते। एवमेव मनःपथातिगो ब्रह्म (वेद) गतविचारोपि दैविकत्वात्, श्रवणमात्रेण परोक्ष इत्येवाभाति। तथापि विचारणेन, तदभिव्यक्तध्वनिजन्यज्ञानेन, मननेन च अव्यवहितस्तद्विचारः, अपरोक्षो भवति।

कर्मफलप्रयोजयिता

कर्त्रा कृतं व्ययप्रयाससाध्यं कर्म दृष्टप्रयोजनवद्भवति लौकिकविषयेषु। कदाचित् कृतं कर्म निष्फलमपि भवति। एवं च वेदोक्तमलौकिकोपायप्रयुक्तं कर्मापि, नश्वरमेव। एकस्मिन् दिने, एकस्यां घटिकायां, विघटिकायां वा कृतं कर्म अपरस्मिन् मुहूर्ते नश्यति। ('णश अदर्शने' इति वैयाकरणमर्यादामनुसृत्य नश्यतीत्युक्तौ न दृश्यत्यभिप्रायः।) कर्मापि न दृश्यते, कर्मफलं च प्रायेण लुप्तमिव न दृश्यते। अर्थात् फलप्राप्तिस्सहसा न सिध्यति।

वेदवाक्यप्रचोदितेष्वलौकिकविषयिकर्मसु तावत् द्वेधा विभाति फलानुभवव्यवस्था। ऐहिकः प्रथमः – प्रजा, पशु, रयि काम प्रधानानां कर्मणां कदाचित् क्वचित् क्वचित् स्वीयप्रारब्धकर्मानुरूपं फलं, सद्यो वा बहोः कालादनन्तरं वा लभ्येत निर्णयः। अयमर्थो जीवति यजमाने, सदेहं प्राप्यमाण इति मन्तव्यः। द्वितीयः फलानुभवः पारॅलौकिकः देहावसाने सम्भवनीयः। यथा स्वर्गादि लोकप्राप्तिः, नक्षत्रमण्डलादि ज्योतीरूपापत्तिः। उभयत्रापि कर्मसमाप्त्युत्तरक्षण एव फलप्राप्तिः दुश्शका। तर्हि कर्मफलप्रदाता यः कश्चन प्रयोजको भवेत्। तस्य नियामकव्यवस्था कीदृशी? इत्थं विजिज्ञासोः कर्तुर्मनसि, अस्मत्कृतकर्मफलप्रदाता (प्रयोजको वा) 'ईश्वर' नामकः परमपुरुषो वर्तते इति प्रकल्प्य, कर्माचरणकाले, तदनन्तरमपि ईश्वरप्रणिधानात्मकं विधेयभावं प्रचोदयति कर्मविध्यन्तर्गततत्त्वबोधः।

1. उदाहरणम् – ईश्वरार्पणम्

याज्ञिकसमाख्या च कर्मकर्तुः फलभोक्तृत्ववाञ्छां विहापयन्ती, आचरितकर्मफलं परमेश्वरार्पणमस्त्विति वाचयति। अत्रोत्पद्यते पुनर्विचिकित्सा। इयन्तं प्रयासं, इयतीं सम्पत्तिं विधाय, कृतस्य कर्मणः फलमदृष्टाय कस्मैचित् परमेश्वराभिधाय समर्पणे का वा युक्तिः? तेन कर्तुः को वा भवति लाभः? अर्थव्ययः, शरीरकार्श्यं, समयव्यर्थीभाव एवावशिष्यत इति च कदाचिद्वा मनसि विमथ्नानो यजमानो विचारणां कर्तुमारभते। तादृश परिपक्वमनाः

In Public domain. Digitization Muthulakshmi Research Academy

गुरूपदेशं लब्ध्वा, परवस्तु ज्ञानेप्सुः कृतार्थोपि भवेत्। इत्थं परमेश्वरार्पणमस्त्विवति वाक्ये ध्वनिः यजमानं तत्त्वावगमने प्रचोदयति।

एवमेव कर्मण्यस्य यजमानस्य तत्त्वबोधकारकान् प्रसङ्गानन्वेष्टुं, तदुपबृंहणाय चोपक्रम्यतेयं प्रबन्धः।

2. सर्वगतब्रह्मदर्शानाभ्यासः

चैतन्यहीनं वस्तु नास्ति जगत्यामिति, ब्रह्मणस्संस्थानान्तरमेवेदं जगदिति राद्धान्तः। परिदृश्यमाणमश्मादिकं, वृद्धिमदप्यचलं वृक्षादिकं चैतन्यवदिति न विश्वसन्ति जनाः। उपनिषद्ग्रन्थेषु ब्रह्मलक्षणनिरूपणे, भूतभौतिकसृष्टयः, तल्लक्षणं च प्रपञ्चितं वर्तते।

किन्तु आरम्भदशायां माणवकाः, यज्वानः (सर्वं चैतन्यवदिति) वाक्यश्रवणादनन्तरमपि न विजानीयुः अर्थात् अनुभवविहीनाः न प्रतीयासुः। अव्यक्तं, दुर्ग्राह्यं ब्रह्मलक्षणमवगन्तुं सूक्ष्मेक्षिकामतिः शास्त्राभ्यासः, गुरूपदेशादि सहकारि हेतवः आवश्यकाः। कालक्रमेण युक्ते वयसि, परिणतायां मतौ, स्वानुभव पूर्वकं वस्तुस्थितिं विजानाति जनोयम्। यावत् तत्त्वज्ञानसम्प्राप्तिः, तावत् पर्यन्तं प्रतिवस्तुनि परब्रह्मचैतन्य-दर्शनमभ्यासयितुं कर्मकाण्डे बहूनि विधानानि प्रोक्तानि।

आधुनिकविज्ञानशास्त्रवेत्तारश्च बहुश्रमं कृत्वा औपनिषदसिद्धान्तप्रबोधिता एव अणुगतं चैतन्यं प्रत्यभिज्ञातवन्तः। एवं च जगदीशचन्द्रवसु (बोस्) नामको भारतीयशास्त्रेक्षकः वृक्षस्सजीव इति निरूप्य अन्तर्जातीयप्रशस्तिं समाप। एवं परिशोध्य, सर्वगतचैतन्यसत्त्वं समभिज्ञातवन्तोप्याधुनिकवैज्ञानिकाः, तदनुयायिनो जनाश्च ब्रह्मरूपे जगति पृथिवीजलवाय्वादिषु, तद्रचितजीवगणे च सम्मानमवलम्बनीयमिति कार्याकार्यविवेचनमुग्धाः प्रवर्तन्ते। कार्यकार्यज्ञानिनोऽपि लोभापहृतविवेकाः, स्वल्पकालिकसुखप्रणयिनः, नैसर्गिकधातु, सस्य, वृक्ष, प्राणिसम्पद्विनाशायोद्यच्छन्ति। शतसहस्राब्दिषु अस्मत्पूर्वजैः परिपालिता, संरक्षिता भूवायुजलादि सम्पत्तिः, आधुनिकविज्ञानाविष्कृतसुखजीवनलालसैः अस्मदादिभिः द्विशतवत्सराभ्यन्तरे विनाशदिशं प्रस्थापितेति महतो विषादस्य स्थानम्।

परन्तु, पूर्वकाले वैदिककर्मसु श्रद्दधाना अनुष्ठातारो यज्वानः, अध्येतारश्च च आचार्यसकाशात् बाल्यादेव नितरां सर्ववस्तुगतचैतन्यावगमनं प्रशिक्षन्ते स्म। तादृशं सदाचारं,

In Public domain. Digitization Muthulakshmi Research Academy

तद्द्वारा परवस्तुज्ञानं च शिक्षयति वैदिककर्मकाण्डः। वैदिकाख्यानेषु ब्रह्म वै पर्णः, ब्रह्म वै चतुर्होतार इत्यादिना सर्वगतब्रह्मप्रसिद्धिरभिव्यज्यते। यथा नानावेषालंकृतं शैलूषं तत्सम्बन्धी सर्वेष्वाकारेष्वभिजानाति, तथैव वैदिककर्मसम्प्रदायपटुना यज्वनापि सर्वगतं ब्रह्म प्रत्यभिज्ञायते। वैदिककर्मगततत्त्वबुभुत्सया, तत्कर्मप्रकाराणि विविच्य, तद्गततत्त्वबोध-प्रसङ्गांश्च वेत्स्यामः।

3. वैदिककर्माणि चतुर्विधानि

नित्यनैमित्तिककाम्यनिषिद्धभेदात्। तेषां स्वरूपं तद्युक्तीश्चाथ चिन्तयामः। नित्यकर्माणि आजनुषो विहितानि कर्माणि, नित्यं कर्तव्यानि च भवन्ति। एषामनुष्ठानात् न लभ्यते(अ)पूर्व नामकपुण्यविशेषः। अकरणेतु प्रत्यवायो भवत्येव। सन्ध्यावन्दन, औपासन, वैश्वदेव, अग्निहोत्र, दर्शपूर्णमासेष्टि, चातुर्मास्येष्टिप्रभृतीनि एतेषां दृष्टान्तभूतानि। निरन्तरबहुश्रमसाध्यं नित्यकर्म अपूर्वं न जनयति चेत्, निष्फलं वैतत्? इति, विचारयामः।

सर्वेषां जीविनां कल्पादेरद्यतनपर्यन्तं वैयक्तिककर्मविशेषस्त्रिविधमेव भवितुमर्हति। सञ्चितप्रारब्धमागामि चेति तत्प्रभेदः।

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।। गीता ।।

जन्मादितः शुभं वा अशुभं वा कर्म समाचरन्नेव प्राणिति सकलोऽपि जीवी। एवमसङ्ख्याकजन्मसु, अनेनाचरितं कर्मजातं सञ्चितमिति प्रसिध्यति।

बहुजन्म सञ्चितकर्मणां फलमेकस्मिन्नेव जन्मनि येनकेनाप्यनुभवितुं दुश्शकम्। अशुभकर्मफलभूतक्लेशं कार्त्स्न्येन सोढुं, जन्मन्येकस्मिन् दुःखी जीवी न शक्नुत इति, परमकारुणिको भगवान् 'अस्मिन् योनौ सञ्जातोयं जीवः, इयदेव कर्मानु भवेत्' – इति प्रभूतसञ्चितकर्मराशेः एकं भागमेकैकस्मै जन्मने प्रदत्ते। अयमेव कर्मभागः जन्मना सह (मातृगर्भवासादितः) समारब्ध इति हेतुना, 'आरब्ध कर्म इति, (प्रकर्षेण जनुषा आरब्धं) प्रारब्धमिति वा कथ्यते। एकैकेन जीविना अनुभवाय सङ्गृहीतमिति हेतुना, 'उपात्त' कर्मेति चेदमुच्यते।

In Public domain. Digitization Muthulakshmi Research Academy

एकैकेन इह जीवने, अनागतजन्मसु कामसङ्कल्पपूर्वकं करिष्यमाणं कार्यजातं आगामिकर्म। उपात्तकर्मफलेन सार्धमस्मिन् जनुषि समाचरितपुण्यपापावह कर्मणामपि फलमनुभवति जीवी।

अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते इति आर्योक्तिः। तत्तज्जन्माचरितकर्मसु अत्युत्कटानि शुभाशुभकर्माणि सद्यः फलः प्रदानि भवन्तीति च व्यवस्था। अस्तु नामैतत्। यः कोऽपि जनः, स्वीयं कर्मफलप्राप्तं सुकृतजन्यं सुखं परिहर्तुं कदापि न वाञ्छति। अतः उपात्तकर्मसु सुकृतकर्मणां फलानुभवे परित्यागे), उपात्तदुष्कृतानि (दुरितानि) परिहरणेच्छया अवशिष्यन्ति। तेषामेव 'उपात्त दुरितानां' क्षपणार्थं नित्यकर्म समाचरणीयमिति चोदयति वेदः। अतः पूर्वाचरितदुरितक्षपणफलकं नित्यकर्म।

नित्यकर्म अपूर्वं न जनयति। अपि च नित्यकर्मणामननुष्ठानात् प्रत्यवायभूतः पापस्सम्भवतीत्युच्यते खलु? सत्यम्। प्रत्यवायरूपः क्लेशः नित्याकर्मस्वनभिप्रवृत्तं जनं प्राप्नुयादिति निर्णयो वर्तते। वस्तुतस्तु नित्यकर्मणा मननुष्ठानात्, नूतनतया दुरितं न सञ्चीयते। आजन्मोपात्तमेव यद्दुरितं कदेमं ग्रसानीति प्रतीक्षते।

तदुपात्तदुरितफलभूतः व्याधि-वियोग-द्रव्य नष्टरूपः प्रत्यवायरूपक्लेशः विहित नित्यकर्मानुष्ठाने अप्रयतमानं जनमुपैतीति सिद्धान्तः। एतमेवाभिप्रायं नित्यकर्मानुष्ठानविधाने, अवान्तरकर्मोपदेशगतमन्त्रैः, तद्व्याचिख्यासु ब्राह्मणभागेन, इतिकर्तव्यता निरूपणे च स्मारयन् तत्त्वं बोधयति वेदः।

श्रौतस्मार्तपौराणिककर्माणि

कर्माणि श्रौत, स्मार्त, पौराणिकनामानि नानात्वेन वर्तन्ते।

अ) श्रुत्या समग्रोपदेशो येषां कर्मणामुपलभ्यते, तानि श्रौतकर्माणीति समाख्यातानि।

आ) परम्परा सम्प्राप्तानाम् अनेकानामाचारव्यवहाराणां स्मृति मूलमेवोपलभ्यते। तेषां कर्मणां प्रवर्तकाः मन्वादयः स्वकीयातीन्द्रियशक्तिसहकृता अत्यन्तबृहत्तमवेदविज्ञानराशेः, आवश्यकवाक्यान्युपादाय, स्मृतिसूत्रादीनि ग्रन्थयामासुः। सर्वासां वेदशाखानामद्यतन कालेनुपलभ्यमानत्वात् मन्वाद्यृषि कर्तृकत्वेन पौरुषेयत्वापत्तावपि, स्मृतिग्रन्थानामपि परम्परया वेदमूलकत्वमनुमेयम्। वेदोक्तविषया अनुक्रमणिकया स्मर्यन्त इति, स्मृतिरिति तेषामन्वर्थनामधेयम्। तत्स्मृतिग्रन्थोपदिष्टं कर्मजातं स्मार्तकर्म इति प्रख्यातमस्ति।

In Public domain. Digitization Muthulakshmi Research Academy

इ) वेदानधिकृतानां तरणोपायप्रबोधनाय सम्प्रवृत्तानि पौराणिककर्माणि, अष्टादशपुराणेषु, पञ्चमवेदनाम्ना प्रसिद्धे महाभारते च वेदोक्तधर्मकर्मणामनुवादरूपेण उपनिबद्धानि। श्रुतिस्मृतिमूलकत्वात्वात् पौराणिककर्माण्यपि प्रमाणभूतान्येव।

परन्त्वस्मिन् परिशोधनप्रबन्धे श्रौत, स्मार्तानामेव कर्मणां वैदिककर्मव्यवहारात्, तद्गता एव विषया विचार्यन्ते।

3) विहितकर्मणाम् अग्निसाध्यता – तदौचित्यम्

विहिततस्याननुष्ठानात् निषिद्धस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।। इत्यार्षवचनम्।

चत्वारो वर्णाश्रमास्सनातनधार्मिकपरम्पराप्राप्तास्सन्ति। एकैकस्य वर्णाश्रमिणः कर्मजातमधिकारिभेदेनोपदिश्यते वैदिकग्रन्थैः। तत्राश्रमिषु गृहस्थ एवान्येषामाश्रमिणामाधारभूत इति तस्य धर्मा अधिकतरा वेदेनोपदिष्टाः। सर्वेषां श्रौतकर्मणामधिकार्यपि गृहस्थ एवेति, क्रत्वनुष्ठाने तस्यैव प्राधान्यमभिमतम्।

निजदारापत्यपोषणाय, गृहकल्पनाय, वृद्धजनसंरक्षणाय, बुधजनसेवनाय, यतिभिक्षु ब्रह्मचर्यादीनामभ्यवहार प्रदानाय, स्वस्य सुखजीवनादिभ्यश्च नित्यं प्रयतते गृहस्थः। एवं, गृहस्थस्य व्यवहारः स्वस्य, स्वीयानां, परेषां च कृते सदा धर्मोपेतो वर्तते। गृहस्थस्य जीवने वह्निसाध्यान्येव कर्माणि बहूनि भवन्ति। अतस्तस्याग्निमत्ता उपनयनं प्रभृति अन्त्येष्टिपर्यन्तं विहिता भवति।

विवाहे जाययासह प्राप्तो गृह्याग्निः, अग्न्याधानकर्मणा त्रित्वं (त्रेताग्नित्वं) पक्षे पञ्चविधत्वमापद्य, गृहस्थस्य गेहे मित्रमिव पालक इव, पोषक इव सर्वकर्मसु सदा विराजते। यजमानेन आद्रियमाणस्सोग्निः सेवनीय आजीवम्। वेदमन्त्रेषु यजमानस्य वह्निना सह वर्तमान उत्कृष्टसम्बन्धोऽसकृत् प्रपञ्चितः। यजमानपदं च यजदेवपूजायाम् इति धातोर्निष्पन्नं (शानजन्तरूपं) गृहस्थस्य सार्वकालिककर्मण्यत्वं संस्मारयति।

अयमग्निर्गृहपतिस्सुसगँसत् पुष्टिवर्धनः इति मन्त्रोक्तरीत्या गृहस्थस्य निवासस्थानाधिपत्यम् अग्नेरेव भवेत्। अतः अस्याग्नेर्नाम च गृहपतिरिति, गृहपतेस्सम्बधी गार्हपत्य इति च विज्ञेयम्)। तस्मात् गार्हपत्याग्निः यजमानस्य अग्निहोत्रशालायां सदा विराजते।

In Public domain. Digitization Muthulakshmi Research Academy

तस्य दक्षिणभागे प्रदीप्यमानो (दक्षिणेन वर्तत इति) दक्षिणाग्निरिति, तत्तत्कर्मनिर्वृत्त्यर्थं प्रज्वाल्यमानः (आसमान्तं हूयतेस्मिन्निति) आहवनीय इति यजमानस्य त्रयोग्नयः।

केषाञ्चित्पक्षे अग्न्याधानेन त्रेताग्निप्राप्तौ, गृह्याग्निपालनं गौणं भवति।

एतैस्त्रिभिरग्निभिस्सह (अवसथे उ वसत् गेहे भवः) विवाहकालात् सम्प्राप्तः (गृह्यग्न्यपरनामकः) आवसथ्योग्निः, यजमानस्य सभागृहे भवः सभ्याग्निरिति अपरावग्नी पक्षान्तरेण प्राप्तौ, शास्त्रवाक्येषु श्रद्धधानैर्यजमानैः सेव्यते। एवं पञ्चाग्नयो यजमानस्य सिध्यन्ति।

तत्त्वबोधः – एवं व्यवस्थितौ वर्तमानस्य यज्वनः, तत्परिवारस्य च देवतासान्निध्यमनुक्षणं स्मारितं भवति। तस्य निवासः, परितः पर्यावरणं च परिशुद्धं पवित्रितं वर्तेत। एतादृशपवित्रनिवेशे वसतां जनानां मनांसि, साधारण्येन परहिंसा विमुखानि, परद्रव्येष्वलुभ्यन्ति, परोपकारितामूलकदैवानुग्रहसम्पादनेच्छूनि च भवन्ति। अपि च गृहपतेरग्निदेवस्य सन्निधानाद्यजमानस्सभद्रतामियात्। एवं चिरमनुष्ठाय अग्निहोत्रादि नित्य कर्माणि, निष्पिष्टदुरितत्वात् परिशुद्धचित्तो यजमानो ब्रह्मण्यत्वमप्यधिगच्छेदिति अग्निमत्ता प्रकरणेनावगम्यते।

श्रौतकर्मप्रभेदाः

यजमानस्य कर्तव्यानि नित्यकर्माणि त्रिविधानि भवन्ति।

अ) प्रत्यहं सायं प्रातरनुष्ठेयम् अग्निहोत्रनामकं होमविधानम्।

आ) अमावास्या, पौर्णमासीपर्वणोः अनुष्ठेये दर्शपूर्णमासाभिधे इष्टी।

इ) जन्मसार्थक्यसिद्ध्यर्थं देवतानुग्रहाय च यष्टव्याः अग्निष्टोमादि सप्तसोम संस्थाः।

चतुर्षुवेदेषु कर्मप्रबोधप्रधानो यजुर्वेदः। सर्वविधकर्माणि ऋगादिवेदानां ब्राह्मणभागापेक्षया यजुर्वेदे एवाधिकतरमाम्नायन्ते। तस्य प्रथमप्रपाठकः दर्शपूर्णमासेष्टिप्रकरणं प्रबोधयति। दर्शपूर्णमासौ प्रकृतीष्टी इति कथ्येते। यत्र कृत्स्नस्य अङ्गजातस्य समग्रोपदेशो लभ्यते, तत् कर्मप्रकृतिः इति मीमांसकैर्निगद्यते। यत्र कर्मणि विशेषाङ्गोपदेश एव वर्ण्यते, तद्विकृतिकर्मेति च समाख्यानम्। प्रकृतिवत् विकृतिः कर्तव्या इति न्यायानुसारेण, अनुक्तानां अङ्गानां प्रकृतिकर्माङ्गतुल्यतां विभावयेत्। एतस्य अतिदेश इति शास्त्रमर्यादा।

In Public domain. Digitization Muthulakshmi Research Academy

इष्टिषु प्रकृतिभूतदर्शपूर्णमासेष्टिविधानान्यथविचारयामः। प्रतिपक्षं प्रतिपदि तिथौ यष्टव्ये प्रकृतीष्टी दर्शपूर्णमासौ। (तत्पूर्वेद्युः दर्शेष्ट्याः प्राक्तनदिने अमावास्यायां कर्तव्यं पूर्वाङ्गजातमुपदेष्टुमारभते)

4) अन्येषां भागो नापेक्षणीयः। स्वस्य कृते आधिक्येनोत्पत्तिरेव वाञ्छेत्।

आत्मना सर्वभूतानि समं सम्भावयेद्बुधः।।

एषा सज्जनानां जीवनशैली। तां बोधयन्, सर्वेषु वृक्षजन्तुजीवेषु ब्रह्मसत्त्वं ज्ञापयति श्रुतिः। क्रिया – श्वो यक्ष्यमाणदर्शेष्टिगत इन्द्रदेवताकदधिपयो यागाय, गावो दोग्धव्याः। तदर्थं प्रातर्दोहनान्तरं वत्सानां मातृक्षीरपानानन्तरं, तान् वत्सान् दूरे अपाकुर्यात्।

एवं गोष्ठं प्रतिवत्सान् चालयित्वा, अभिमन्त्रणरूपगोप्रार्थनं कुर्याद्यजमानः –'हे गावः। एतद्दिनपर्यन्तं युष्मत्क्षीरे वत्सानामेको भागः। शिष्टो भागोस्माभिरुपयुज्यते। श्वो दर्शेष्ट्याम् इन्द्राय दातव्ये दधि पय आहुती। अत इन्द्रायापि क्षीरे तृतीयो भाग इष्यते। तस्मात् 'आप्यायध्वमघ्निया देवभागम्'। सायन्दोहसमये प्रभूतक्षीरप्रदानाय, प्रकामं घासादिकं भवतीभिः खादितव्यम्' – इति।

स्वारस्यम् – सृष्टौ सर्वस्यां जीवस्य प्राणनाय परतो जीवांशोऽपेक्षितः। उपजीव्योपजीवकसम्बन्धो सर्वत्र दृश्यते विश्वस्मिन्। स्वस्य जीवसन्धारणाय अन्येषां जीवांशमुपयुज्य जिजीविषति प्राणिजातम्। व्याघ्रादयोजादीन् भक्षयित्वा जीवन्ति। अजादयः पादपान् तत्पर्णादिकमदन्ति प्राणरक्षणाय। मनुष्यादि द्विपादः, प्राणरक्षणाय अन्यान् चतुष्पदो वा खादन्ति, अथवा वृक्ष, शाकौषधिफलमूलादिकम् अभ्यवहरन्ति। पादपादिकमपि जलवायुपुथिवितेजोगतजीवांशग्रहणेन जीवन्ति।

जगति क्वचित् जीवांशाः जीवहीनाभासकानि वर्तन्ते। यथा – बीजादिषु स्तब्धा जीवशक्तिः, सहकारिकारणविरहेणान्तर्हिता सती, पश्यतां जनानां निर्जीव भ्रान्तिमुत्पादयति। अश्मस्थाणवादिषु अणुगतं चैतन्यं चर्मचक्षुषामगोचरमपि अनुमानेन सूक्ष्मपरिकरसाहाय्येन निश्चेतुं शक्यते। एवं जगति सर्वं सजीवं ज्ञेयम्। एवं च विधात्रा सृष्टानां प्राणिनां सर्वेषामपि, जीवने वर्ततेधिकारः। अर्थात् आहारेपि सर्वेषामधिकारोऽस्तीति निस्सन्दिग्धम्।

In Public domain. Digitization Muthulakshmi Research Academy

मनुष्यादिजातयः स्वस्य जीवनाय परतो जीवांशान् अलमनुभूयाप्यसन्तृप्ताः, लोभात् प्रभूतं सञ्चेतुमिच्छन्ति। एवं सञ्चयनेन तस्मिन्नेवाहारे परेषां जीविनां भगवता प्रदत्तस्समानावकाशो नश्यति। केषाञ्चित् प्राणिनां स्वार्थैकमनः प्रवृत्तेः इतरे प्राणिनः क्षुभ्यन्तो दृश्यन्ते।

अतः, यद्यदाहारः स्वस्य प्राणधारणाय प्रत्यहं लभ्यते, तत्भोजनावसरे सञ्चिन्तयेदेवम् – 'हे भगवन्! मम जीवसन्धारणायाहारं समपादयम्। अस्मिन् सम्पादने अन्येषामपि प्राणिनां वर्तमानमधिकारं यद्यपि निराचिकीर्षामि, मदीय प्राणशक्त्याप्यायनाय त्वयैव प्रदत्तं तुभ्यं समर्प्य एतमाहारं स्वीचिकीर्षामि।' एतां धियमभिवर्धयत्येतत् प्रकरणम्। उपलभ्यमानभागादधिको भागो यदीष्यते तर्हि, वर्तमानभागिनः भागहरणचिन्तनं विहाय, अधिकं भागमस्मभ्यमुत्पद्यताम् इति प्रार्थना विनीतेन क्रियेति च प्रबोधयति।

5) वत्सापाकरणम्

अस्मिन्नेव प्रकरणे, वत्सापाकरणमिति भवति क्रिया। वत्सानामपाकरणाय पलाशवृक्षस्य शाखा, अध्वर्युणा (ऋत्विजा) प्रच्छिद्यते 'इषे त्वा' इति मन्त्रेण। इट् नाम अन्नम्। हे पलाशशाखे अन्नाय त्वां प्रच्छिनद्मि' इति तस्य वाक्यस्यार्थः। केनचिदपि कदाचित् अनालोचितं हिंसनं नैव कुर्यात्। यद्यावश्यकं, हिंस्यमानस्य अनुज्ञां सोपपत्तिनिवेदनपूर्वकं प्रार्थयित्वा, वाञ्छितमाददीतेति बोधयदेतद्वाक्यम्। अन्यदपि परम्परासम्बन्धं स्मारयति।

'सहयज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेषवोस्त्विष्टकामधुक् ॥
'देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ गीता ॥

पलाशशाखा अन्नाय कथमुपयुङ्क्ते? इत्याकाङ्क्षां समाधत्ते उपर्युक्तसम्बन्धः। एषा पलाशशाखाबहुपर्णा अशुष्काग्रा सती, पर्णरूपाहारच्छलेन वत्सान् मातृभ्यो (धेनुभ्यः) अपाकर्तुमुपयुज्यते। वत्सैस्सन्त्यक्ताधेनवो यजमानेनाभिमन्त्रिता गोचरं गत्वा घासादिकमत्त्वा, सायन्दोहे इन्द्रायापि भागान्तरं दातुम् आप्यायित क्षीराः प्रत्यायान्ति। एवं निष्पन्ने ऐन्द्रदधिपयोभागे, यजमानेन समर्पितास्वाहुतिषु, परितुष्टस्सुरधीशश्शक्रः सकाले समं वर्षयति।

In Public domain. Digitization Muthulakshmi Research Academy

ततस्सस्यवृद्धिः, आहारोत्पत्तिः, प्रजापोषणं, गोपालनं, पुनर्देवताहविः प्रदानादिकम् – इति धार्मिकजीवनचक्रं प्रवर्त्यते।

एवं प्रावर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ।। गीता ।।

एवं भगवता सम्प्रवर्तितं धर्मजीवनचक्रानुवर्तनेन, न केवलं देवेभ्यो मनुष्येभ्यः, इतरेभ्योऽपि जन्तुभ्यो लभ्यतेन्नम्। अतः अन्नस्य परम्परा साधनभूते! हे पलाशशाखे! मदीय सार्थकजीवनाय त्वं प्राच्छिनद्मि – इति स्वकीयकार्तज्ञ्यं प्रकाशयति क्रियैषा।

6) पलाशवृक्षस्य ब्रह्मसम्बन्धः

अस्मिन्नेव प्रसङ्गे किमर्थं पलाश एव गृह्येत? कुतो नान्यो वृक्ष इति विचारयत्यर्थवादः। इतः पृथिव्याः तृतीये लोके स्वर्गे, सोमलता अस्ति स्म। गायत्री (तन्नामकच्छन्दोभिमानिदेवता) तां समादाय भुवमागच्छन्त्याः पक्षिरूपिण्या गायत्र्याः पक्षोधः पपात। स एव पर्णोभवत्। (पर्ण इति पलाशवृक्षस्य नामान्तरम्।)

ब्रह्म वै पर्णः। यत्पर्णशाखया वत्सानपाकरोति। ब्रह्मणैवैनानपाकरोति। एष पलाशवृक्षो ब्रह्मणः प्रतीकः। यथा पर्णशाखया वत्सानपाकुरुते तथा वत्सानपि ब्रह्मसम्बन्धिनः कुरुते – इति वेदयन्नर्थवादो वृक्षे, धेनुवत्सेषु ब्रह्मदर्शनानुभूतिमभ्यासयति।

7) वायुदेवता सम्बन्धख्यापनम्

वत्सापकरणानन्तरं स्वीया गाः अरण्यं गोचराय प्रस्थापयति यजमानः। तदवसरे एवमाम्नायते 'वायवः स्थ। उपायवः स्थ।।' अस्यायमभिप्रायः। वा – गतौ इति धातुः। वातीति वायुरिति वायुशब्दनिष्पत्तिः। गमनशीलो वायुः। गमनशीला पशवः (धेनवः)। हे धेनवः! सार्धम्येण भवत्योपि वायुदेवताकाः वायव इत्येवाभिधीयन्ते। पशूनां वायुदैवत्यभावेन स्वीयान् पशून् रक्षितुं वायुर्देवतोत्सहते। अतो भवतीः वायुदेवतारक्षणे परिददामि, यतोरण्येस्तेनव्याघ्रादि हिंस्रजन्तुबाधा भूयसी सम्भवति। अपि च वायुपदस्य धेनुसम्बन्धनेन चतुष्पात्सु पशुषु धेनुष्वपि वाय्वाकारित्वं (निर्गुणतां) दर्शयति श्रुतिः।

अन्तरिक्षाधिपतिर्वायुः। वायुरिवं तद्देवत्याश्च पशवः सङ्गहीना भवेयुः। अतः गोष्ठं स्वीयं प्रत्यागन्तुं पुनः प्रार्थयति 'उपायवः स्थ' (गृहसमीपं पुनरायात) 'ध्रुवा अस्मिन् गोपतौ

In Public domain. Digitization Muthulakshmi Research Academy

स्यात बह्वीः'। (अस्मिन् यजमाने बहुसङ्ख्याका यावत्यो गताः तावत्यः पुनरागत्य, स्थिरा अस्मिन्नेव मम गृहे वसत' इति पशुजातावपि स्निग्धभावनाम् उत्पिपादयिषति, वाय्वादि देवताभावनां तिर्यग्योनिष्वपि कर्तन्यमिति ब्रुवता वाक्येन, सर्वत्र देवैकतानत्व भावनां च प्रचोदयति प्रसङ्गोयम्।

8) यजमानशरीराख्यप्रयोज्यकर्तृद्वारेण देवानां प्रधानकर्तृता

नारुद्रो रुद्रमर्चयेत् – इति प्रसिद्धा याज्ञिकोक्तिः। यां देवताम् आरिराधयिषति, तदीयमन्त्रं, तदीयाकृतिमात्मनि सम्भावयेदिति उपासना सम्प्रदायः। अत एव मन्त्राङ्गानि स्वीयंगेषु अङ्गन्यास, करन्यासद्वारा संयोज्य, मनश्च देवतायां प्रलीय, देवैकत्वानत्वमापद्येत पूजक इति न्यसस्यान्तरार्थः।

अत एव वैदिककर्मसु बहुशः आदान, निर्वाप, प्रदानादि सन्दर्भेषु एवमभिव्यज्यते। 'देवस्यत्वा सवितुः प्रसवे, अश्विनोर्बाहुभ्यां, पूष्णो हस्ताभ्या माददे' इति। योऽयं मम बुद्धिं प्रचोदयत्यन्तस्थः सवित्रभिधानः परमात्मा, तेन प्रचोदितोहं, तस्य प्रेरणे, देवाध्वर्युभूतयो रश्विदेवतयो र्बाहुभ्यां, पूष्णो देवस्य हस्ताभ्यामिदं कर्म करोमि। मम शरीरे तास्ता देवता उपस्थिताः। देव एव स्वकीयं कर्मैतच्छरीरद्वारा करोति। एतच्छरीरं प्रयोज्यकर्तैव। प्रयोजको देव एव। अहं तावन्निमित्तमात्रः। साक्षिभूतोस्मि – इति कर्तृत्व भोक्तृत्व भावनां त्याजयति कर्मोपदेशः।

9) चातुर्मास्येष्टिविचारः।

नित्याग्निहोत्रिणा आचरितव्यकर्मसु, कानिचिन ऋतुगतिमनुसृत्य कर्तव्यानि भवन्ति। ऋतुपरिवृतिसमये कर्तव्या एते चातुर्मास्येष्टय इति विश्रुताः। आसां नामौचित्यं विचारयामः। चतुर्णां मासां समाहारः चतुर्मासम्, तत्र भवा चातुर्मास्यनाम्न्य इष्टयः। प्रतिचतुर्मासं कर्तव्या इत्यर्थः फलति।

नन्वृतूनां षट्सङ्ख्यात्वप्रसिद्धौ, षटकृत्वः कर्तव्या इष्टयः, त्रिवारयष्टव्यत्वेन कथं विहिताः इत्याशङ्का। ऋतूनां षट्त्वे निश्चितेपि, तेषां त्रितयत्वं च क्वचित् क्वचित् लोकवेदयोः प्रसिद्धमेव। घर्म, वृष्टि, शैत्यसूचकाग्रीष्मो, वर्षा, हेमन्त इति त्रयः कालाः प्राधान्येन लोके व्यवह्रियन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

कालः अनन्तः। तथापि, दैनिककार्यव्यवहाराय, कालः पर्वशो गण्यते। पर्व नाम सन्धिः। प्रतिदिनं दिवारात्रिसन्धिकालः (सन्ध्याकालः), पक्षसन्धिकालः (अमावास्या पौर्णमास्यौ), ऋतुसन्धिकालः, संवत्सरसन्धिकालः (नूतनवर्षः) व्यवहारे सुप्रथिता एव। भागशो गणनेन विभक्तेकाले, भागमेकमतीत्य अन्यस्मिन् प्रवेशावसरे – भगवत्प्रार्थनाचरणं विश्वस्मिन् सर्वेषु जातिषु बोभवीति। तस्य सम्प्रदायस्य मातृकाचातुर्मास्येष्टिप्रकरणमिति (प्राचीनतमत्वहेतुना) सम्भाव्यते।

चातुर्मास्य पर्वसु यष्टव्याः – वैश्वदेव, वरुणप्रघास, साकमेध, पितृयज्ञशुनासीरीय, त्र्यम्बकेष्टयः षट्। तत्रत्या अंशाः, ऋत्वधिष्ठातृदेवतोपासनं वेदयति। संवत्सर–परिवत्सर–इदावत्सर–अनुवत्सरनामभिः अग्निः, आदित्यः, चन्द्रमाः वायुश्च ऋतुदेवतात्वेन चातुर्मास्येष्टिषु प्रस्तूयन्ते। नन्वेवं प्रतिवर्षं यजमानेनेज्यन्ते खल्विष्टयः, कालात्मक–ऋतु देवतोसकस्य तस्य मृतिर्भवति वा, अथवा कालोपाको याजी न प्रमीयेत वेति ब्रह्मवादिनां संवादरूपचर्चाप्रकाश्यते प्रकरणान्ते।

जातस्य हि ध्रुवो मृत्युः– इति भगवद्गीता वचनम्। जातेम्रियेतावश्यम्। तथापि योयं चातुर्मास्येष्ट्यन्तर्गतकालतत्त्वमासमान्तमवगच्छति, तस्य यज्वनः शरीरपाते साक्षादृतुदेव–तैक्यभावः सम्भवति। 'यदि वसन्ता प्रमीयते। वसन्तो भवति। यदि ग्रीष्मे ग्रीष्मः। इति कथयन्ती श्रुतिः, येन तत्त्वज्ञानपूर्वकं क्रियते चातुर्मास्येष्टिः, कालात्मकपरमेश्वरस्य अनुग्रहेण स यायजूको जीवन्मुक्तोऽपि भविता – इति संवेदयति। येनार्थमजानता कर्त्रा समाचरितं कर्म, तस्य ऐहिकभुक्तिसम्पादनद्वारा फलितं भवतीति ध्वनयति।

अतो महति कालप्रवाहे बम्भ्रम्यमाणा कर्मण्याः, कालानन्तत्वलक्षणं विज्ञाय शाश्वतिकस्थित्यवाप्त्यनुकूलमानसिकाभ्यासपरायणा भूयासुरिति, स्वल्पावधिजीवने क्षणिकसुखावाप्त्यै कालं न व्यर्थीकुर्युरिति च तत्त्वमवगम्यते चातुर्मास्य प्रकरणेन।

10) बर्हिर्दानप्रकारः

अपवित्रतामपहाय, पुनन्ति दर्भा इति धर्मशास्त्रोक्तिः। ते दर्भाः कौशिक, विश्वमित्र, कुश, कशादि भेदेन दशविधाः। प्रतिकर्मीणि च होमविधाननिष्पत्तौ प्रमुखभूमिकां निर्वहन्ति दर्भाः। प्राक्तनहोमकुण्डस्य 'आहवनीयस्य, प्रत्यग्दिशिभासमानस्य 'गार्हपत्यस्य' मध्ये वर्तमानो यज्ञियपात्रादि स्थापनदेशः 'वेदिः' इत्यारव्यायते। इयं वेदिर्दर्भैरास्तीर्यते। एवं

In Public domain. Digitization Muthulakshmi Research Academy

आयतनानां (होमकुण्डानां) परितश्च आस्तरणार्थं, पात्रासादनार्थं, ऋत्विजामासनाद्यर्थं च बहवो दर्भा अपेक्षिता भवन्ति। कथमेते सम्पाद्या इति विवेदयति दर्शपूर्णमासेष्टिप्रकरणम्। बर्हिर्दानमित्यप्यस्य रव्यातिः। प्रदानार्थक–डुदाञ् धातुरत्र न स्वीक्रियते, परन्तु छेदनार्थक–'दा' धातुः अभिप्रेयते।

क्रिया– इष्टि दिनस्य पूर्वेद्युः, यजमानः अग्न्यातनदेशात् प्राचीमुदीचीं दिशं प्रस्थाय, दर्भक्षेत्रमुपनिष्क्रामति।

अभिप्रायः – अनादितो वर्तमानायाः धरण्या एकदेशो मनुष्येन स्वायत्तता प्रकटनद्वारा स्वीया इत्यनुभूयते। वस्तुतः, नायमस्य भूम्या स्त्रष्टा। नापि भूमिमेतां स्वेन सह लोकान्तरं नेतुं प्रभवति। अनन्तकालप्रवाहे बह्वल्पकालिकोऽस्य भूस्वामित्वाभिप्रायः। परन्तु मनुजैस्साकं प्राणिजातस्यान्यस्यापि विद्यतेनया भुवा सम्बन्धः, तत्रोत्पत्तावधिकारः, फलानुभवयोग्यता वाञ्छा च। एवं तत्तत्क्षेत्रेषु प्रवृद्धेषु तृणेष्वन्येषां प्राणिनां चास्त्यधिकारः।

स्वीयत्वेनाभिमतभूमौ वा, नदीतटाककूलादिषु दर्भादितृणान्येधन्ते। एवं प्रवृद्धतृणानां न कोऽपि नरः कर्ता, नाप्यावप्ता। क्षेत्रे स्वयं प्रवृद्धानि तृणानि सम्पाद्य स्वकीय क्रतुनिष्पादनाय प्रयतते यजमानः। अतः स्वेनानुभूयमानक्षेत्रादिषु, तत्रत्य तृणादिष्वपि स्वामित्वं कथञ्चिदपि न विभाव्येतः। इति बोधितो यजमानः, इष्ट्याः पूर्वेद्युः 'असिद' नामकं लवित्रं (छेदनसाधनं) समादाय, गार्हपत्ये अग्नौ प्रतितपति।

दर्भतृणविज्ञापनम्

ततो दर्भक्षेत्रं गत्वा, 'देवानां परिषूतमसि, वर्षवृद्धमसि' इति स्तोत्रमभिधत्ते। 'इदं देवानां' इति क्षेत्रे यावदलं दर्भा क्रत्वर्थमपेक्षिता, स्तावन्तं प्रदेशं दैविकं प्रज्ञाय, अवशिष्टभागं 'इदं पशूनां' इति विभजति।

ननु दर्भाः काठिन्यप्रकृतिकाः कथमद्यन्ते पशुभिरिति न शंक्यम्। सत्यपि दर्भजातिष्वन्यतमस्य कठिन्ये, बहूनि कुशा कशादीनि मृदुप्रकृतिकतृणानि भवन्ति। ततः अजा हरिणादि जन्तवो दर्भतृणादिं बुभुक्षन्ति।

लोके सामान्यतः तृणप्रायः इत्युक्तौ अल्पीभावस्सूच्यते। कुतोयमल्पीभावः? प्रकाममुपलब्धावधीरणा लोकप्रकृतिः। एवं तृणं नीचैस्तरां लघीयस्त्वेन मन्वाने लोकेस्मिन्, यः कश्चनापि वर्तेत वा नरः तृणकाण्डादीन् सम्भावयिता? लौकिकदृष्ट्या उन्नतस्थानापन्नान् प्रकृष्टत्वेन विश्रुतान् – राज्ञो, विदुषः, कनकं रत्नादिकं सम्मानयति सर्वोपि।

In Public domain. Digitization Muthulakshmi Research Academy

किन्तु 'जीवो ब्रह्मैव नापरः' इति सिद्धान्तस्य अनुष्ठापनदिशायां यजमानं प्रक्रामयति वैदिककर्मकाण्ड इति वक्तव्यस्य दृष्टान्तभूतमेतत् प्रकरणम्।

सर्वेषु जीवेषु, जीवप्रतीको भवति कश्चनरसः। वृक्षेषु, लतासु, प्राणिषु, गगनचरेषु, जलचरेषु च रुधिर, स्रावादि रूपो दृश्यतेयं जीवरसः। यावत्प्रदेशं जीवरसो दृश्यते तावद्भागं वृक्षस्सजीवः। शुष्के च जीवकला लुप्तेति जगति प्रेक्षामहे।

वृक्षजातिषु, विशेषेण दर्भजातिषु पर्वशो वर्तते वृद्धिः। स्वीयोपयोगाय, अन्येषां हिंसां प्रदातुकामेनापि तेषां सम्भवनीया वृद्धिः कदापि न कुण्ठयितव्या। एतं धर्ममुपदिशन् विधिः— अध्वर्युः लवनसाधनं दर्भस्तम्बपर्वणि अधिनिधाय, 'आच्छेत्ता ते मारिषम्' इति क्षमायाचनाभावमभिव्यञ्जन् छिन्द्यादित्युपदिशति। दर्भस्तम्बस्य पर्वणि छेदनेन, तृणस्तम्बस्य जीवरसो बहिर्न स्रवति। हिंसनं तृणकाण्डस्याल्पीयो भवतीति भावं विधिना संवेद्यते।

आलवो नाम पर्वशः छिन्नेषु दर्भेष्ववशिष्टः समूलः काण्डः। तान् 'आलवान्' अभिसम्मृश्य जपत्यध्वर्युः 'शतवल्शो विरोह' (हे दर्भकाण्ड! अनेन छेदनेन, कुण्ठितस्त्वं शतवल्शो विरुह्य, पुनर्वृद्धिमाप्नुहि। तेन देवयज्यायै चोपयुज्यस्व) – इत्याशासानः, आत्मकृतहिंसनफलकक्षतिर्मे माभूदिति, 'सहस्रवल्शा वयं विरुहेम' (अस्मद्वंशोपि सहस्रशः प्रवर्धताम्) इत्यात्मानं प्रत्यभिमृशति।

'हिंसा द्वेष एव हि हिंसा स्यात् प्रेमैवाहिंसनं मतम्।
प्रयोज्यस्य प्रयोक्तुश्चाप्युभे दत्तस्समं फलम्। – नीतिमाला

यदि यः कश्चन इतरं मनुजं निर्व्याजमुपचिकीर्षति, तेनोपकर्तुरुपकार्यस्योभयोः मनसी तुष्यतः। एवं यः कश्चन अन्यं जिघंसति, हन्ति वा, तस्य हिंसकस्य हतस्य च मनसी उद्विग्ने भवतः। हिंसा प्रयोजकस्तावत्, प्रतीकारात् बिभेति। हतस्तु हिंसाप्रभावात् खिन्नो भवत्येव।

अत्र हिंसादोषनिरासाय, सर्वजीवसमभावनाभ्यासं विदधानो यष्टा, आत्मीयस्य कस्यचित् क्षतिम् अगतिकं प्रयुञ्जानो यथा खिन्ते, यथा सान्त्वनवचांसि ब्रूते, यथा अनुमतिमर्थयते तथा तृणादीन् प्रार्थयति।

एवं सर्वजीवसमभावनात्मिका साधुरीतिरभ्यासिता यज्ञियकर्मसु परिदृश्यते।।

In Public domain. Digitization Muthulakshmi Research Academy

उपसंहारः

एवमेव वैदिककर्मसु ग्रहप्रसङ्गः, प्रवर्ग्यक्रतुविचारः, उपसत्, सौमिकविचारः, सोमविक्रेतृव्यवहारः, ब्रह्ममेधः, पैतृककर्मादिसहस्राधिकप्रकरणानि, एकैकशः कर्मांगोपदेशने तत्त्वमुपदिशन्ति, साधुजीवनोत्कर्षतामावेद्य, धर्मसम्मतमार्गे प्रयोज्य, क्रमेण तस्यान्तःकरणं परिशोधयन्ति। इत्थं वैदिककर्मान्तर्गतं तत्त्वबोधमधिगच्छन् विद्वान्, यथाशक्तिवेदविहितकर्माण्याचर्य स्सर्वगतब्रह्मदर्शनं मसकृदभ्यस्य, शुद्धान्तः करणस्साधनचतुष्टयसम्पत्तिमाप्य संसारचक्रात् निवर्तितुकामो भवति।

ततो गेही गार्हस्थ्यात् अग्रिममाश्रमं जिगमिषुः, अनन्तरकाले वानप्रस्थाश्रमोद्युक्तो वा प्रव्रजिष्यन् वा, ब्रह्मात्मानुभवायोद्यतते। एवं च वैदिककर्माचरणं, तदन्तर्गततत्त्वबोधश्च परम्परया परमार्थसाधकत्वात् पुंसां बहुलमुपकुरुते।

जयतु गुरुदत्तः

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।
राद्धान्तो निगमार्थानां प्रसद्यादृत्तसद्गुरुः।

In Public domain. Digitization Muthulakshmi Research Academy

भगवत्पादशङ्करस्य विवेकचूडामणौ आत्मानात्मविवेकः

डि.हिमालयनाथः

विभिन्ननामरूपात्मके अस्मिन् जगति एकमेव तत्त्वं सत्यम्, अवशिष्टानि सर्वाण्यपि तत्त्वानि वस्तूनि च अनित्यान्येव।

एकमेव तत्त्वं सत्यमिति यच्छास्त्रं प्रतिपादयति तदेव अद्वैतशास्त्रम्। अयमेव भावः आचार्य शङ्करभगवत्पादैः विवेकचूडामणौ प्रतिपादितः।

अद्वैतस्य मूलानि गौडपादस्य माण्डूक्यकारिकायामेव दृश्यन्ते। तान्येव अद्वैततत्त्वानि गौडपादात् गोविन्दपादाः, तेभ्यश्च शङ्करभगवत्पादाः समधिगच्छन्। अपि च शङ्करभगवत्पादाः स्वव्याख्यानैः, गन्थैः अद्वैतमतं सम्यक् प्रतिष्ठापयामासुः। प्राचीनकालात् भारतदेशे नैकविधमतानां सम्प्रदायानाञ्च स्थानमस्ति। भिन्नत्वे एकत्वदर्शनमेव अद्वैतम्। अस्मादेव भारतीयैर्भिन्नत्वे एकत्वदृष्टिर्गृहीता। अस्माकं समाजस्य, पण्डितानाञ्च अभिप्रायोऽपि अयमेव। अनादिकालादीदृशं तात्त्विकं चिन्तनं भरतीयैः सम्प्रदायानुसारमधिगतम्।

अद्वैतमतानुसारं प्रस्थानत्रयं व्याख्याय, भगवत्पादशङ्करः बहून् प्रकरणग्रन्थानरचयत्। एते प्रकरणग्रन्थाः विषयप्रधानाः। उदाहरणार्थम् आत्मबोधाख्ये आत्मा प्रधानविषयत्वेन गृहीत्वा ग्रन्थः लिखितः। वेदान्तडिण्डिम इति अद्वैतस्य विषयम् अद्वैतदृष्ट्या अद्वैतपारिभाषिकपदैः भेरीनादमिव घोषयति। विवेकचूडामणौ आत्मानात्मविवेकः प्रधानांशः। एतस्य विषयस्य विस्तरीकरणं, विपुलीकरणञ्च कर्तुं विवेकचूडामणिः लिखितः। शङ्कृतावस्यां केचनांशाः सूक्ष्मेन, केचन च स्थूलेन विशदीकृताः। अस्मिन् अद्वैतसिद्धान्तस्य सर्वेऽपि विषयाः विवृताः। अतः यः कोऽपि पण्डितः ग्रन्थमेनम् अधिगच्छति स अवश्यमद्वैती भवतीति विद्वांसः अभिप्रयन्ति।

मनुष्यः कः? सः शरीरम् उत आत्मा? अयं जीवः कुत आगतः? मरणानन्तरं कुत्र गमिष्यति? किं वयं सर्वे जगति स्मः? अथवा अस्मासु जगजदस्ति? जगत् अस्ति वा न वा? किम् अस्माकम् अनुभवः भ्रमः? ईश्वरः अस्ति वा न वा? यद्यस्ति कदा? जीवात्मा कः? कश्च आत्मा? अनयोः सम्बन्धः कः? एताः समस्याः निर्दिश्य शङ्करभगवत्पादाः अस्मान् सर्वान् स्वीयेन ज्ञानमार्गेण अद्वैतस्थायीं प्रापयति। शङ्करभगवत्पादानां विवेकचूडामणेः श्रीचन्द्रशेखरभारतिना विरचिता संस्कृतटीका, अस्या एव टीकायाः पद्मश्री

In Public domain. Digitization Muthulakshmi Research Academy

आचार्यपुल्लेलश्रीरामचन्द्रस्य[1] आन्ध्रव्याख्यानमुपलभ्यते। एतत्तेलुगुव्याख्यानमस्माकं विषयज्ञानं वर्धयति। अस्मिन् विवेकचूडामणौ एकाशीत्यधिकपञ्चशतश्लोकाः सन्ति। प्रथमश्लोके शङ्करभगवत्पादाः स्वगुरुं प्रणम्य वदन्ति।

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं सद्गुरुं प्रणमाम्यहम् ।। विवेकचूडामणिः-1।।

अमुं श्लोकं श्रीचन्द्रशेखरभारतीतीर्थाः इथ्यं व्यख्यान्ति। बुद्धिरिइन्द्रियेभ्यः अगोचरं प्रस्थानत्रयिज्ञानसिद्धन्तमात्रगोचरं स्व गुरुं सः नत्त्वा द्वितीयश्लोके आत्मानात्मविवेचनं प्रस्तौति।

जन्तूनां नरजन्मजुर्लभमतः पुंस्त्वं ततो विप्रता ।
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः।
मुक्तिर्नो शतकोटिजन्मसुकृतैः पुण्यैर्विनालभ्यते।। विवेकचूडामणिः-2 ।।

अत्र शङ्करभगवत्पादाः मनुष्यजन्मनः प्राशस्थ्यं कथयन् वैदिककर्ममार्गेण विना वैदिकधर्ममार्गेण एव आत्मा शरीरद्भिन्न इति, आत्मनः शरीरसम्बन्ध एव जन्म, इत्यनयोः विवेचनेन प्राप्तं ज्ञानमेव विवेकज्ञानम्, अयमेव निवृत्तिमार्ग इति प्रतिपादयति।[2]

वैशेषिकदर्शने कणादः वदति –
'यतोऽभ्युदय निश्श्रेयस सिद्धिः स धर्मः'[3] (वै.द.1.1.2)

अभ्युदयं प्रवृत्तिमार्गः। निश्श्रेयसं निवृत्तिमार्गः। निश्श्रेयसमार्गावलम्बनेन एव आत्मा अनात्मनः भिन्नः इति मनुष्यः जानाति इति शङ्करभगवत्पादानाम् अभिप्रायः। जीवात्मा श्रवणमनननिधिध्यासादिभिः ज्ञानमार्गेण वा ब्रह्मसाक्षात्कारः लभते। यस्य शतकोटिजन्मनां सुकृतं नास्ति, तस्य स्वनुभवः असाध्यः। स्वनुभव एव पुण्यमित्यभिधीयते।

---

1 भगवत्पादशङ्कराचार्यविरचित-विवेकचूडामणिः, पद्मश्री आचार्य पुल्लेलश्रीरामचन्द्रः (आन्ध्रव्याख्याकर्ता), हैदराबाद, संस्कृतभाषाप्रचार समिति, 1995, PP. 1-585

2 मीमांसकाणां वैदिककर्ममार्गवैदिकधर्ममार्गयोः भेदः नास्ति। परन्तु अद्वैतिनां मतानुसारं वैदिककर्ममार्गः कदापि वैदिकधर्ममार्गो भवितुं नार्हति। वैदिकधर्ममार्गो नाम ज्ञानमार्ग एव। ज्ञानमार्गस्य आत्मानात्मविवेक इति नामान्तरम्।

3 वैशेषिकदर्शनम्, पण्डितगोपदेवशास्त्री, (अम्बाव्याख्याकर्ता) कूचिपूडि (आन्ध्रप्रदेशः), आर्यसमाजः, 1984, P.3.

In Public domain. Digitization Muthulakshmi Research Academy

दुर्लभं त्रयमेवैतद् दैवानुग्रहहेतुकम्।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः।। विवेकचूडामणिः –3 ।।

श्रीमच्छङ्कराचार्येण अस्मिन् प्रकरणग्रन्थे देवशब्दप्रयोगः प्रथमतया अत्रैव कृतः। अयं देवः आत्मनः, जीवात्मनः जगतः अपि भिन्नः इतीयम् एका भावना एव। इयं भावना अद्वैतस्थितिप्राप्तिपर्यन्तं स्थित्वा मार्गं निर्दिशति। अद्वैतानुभूतिस्थित्यनन्तरम् इयं भावना भ्रमेत्यभिज्ञायते। अत्र शङ्करः पतञ्जलेः ईश्वरप्रणिधानाद्वा[4] इत्यमुं सूत्रमनुसरति। अयं देवः ईश्वरः एव। ईशः (नियमेन अर्थे) जगत्पालकः, परन्तु अयं न नित्यः नित्यानित्यविवेकज्ञानानन्तरम् अयम् ईश्वरः शाश्वतेन लुप्तः भवति। किमर्थमितिचेत् अस्मिन् अनुभवे सर्वम् आत्ममयमेव। अमुष्मिन् सम्दर्भे शङ्करभगवत्पादैः मनुष्यत्वं–मुमुक्षुत्वं–महापुरुषसंश्रयाः क्रमेण दुर्लभाः भवन्ति इति प्रतिपादिताः। मनुष्यजन्मा दुर्लभप्राप्तम्। एतेन सह मोक्षेच्छा, मुमुक्षुत्वं वा अति दुर्लभम्। यदि इमां मोक्षेच्छां साधयितुम् यः साधकः इच्छति सः महापुरुषं जीवन्मुक्तं गुरोराश्रयं प्राप्नुयात्। तदा एव अद्वैतसिद्धेः मार्गः सुगमः भवति। एतत् सर्वं दैवानुग्रहेण एव साध्यं भवत्यस्मिन् जगतीति शङ्करभगवत्पादानां भावना।

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते।
इहामुत्र फलभोगविरागस्तदनन्तरम्।
शमादिषट्कसम्पत्तिः मुमुक्षुत्वमिति स्फुटम्।। विवेकचूडामणिः –19 ।।

शङ्करभगवत्पादाः अत्र साधनाचतुष्टयस्य क्रमविवरणं ददाति। तेन क्रमेणैव अद्वैतसिद्धिर्भवति। आदौ नित्यानित्यवस्तुविवेकः परिगण्यते, अर्थात् प्रथमं नित्य अनित्ययोः विवेकं, तदनन्तरं इहामुत्रफलभोगविरागं, तदुत्तरं शमादि शट्कसम्पत्तिं (शमः, दमः, उपरतिः, तितिक्षा, समाहितः, श्रद्धा) च साधयेत्प्राज्ञः। चतुर्थं मुमुक्षुत्वम्। अनेन क्रमेण यदि अभ्यस्यते अद्वैतसिद्धिरवश्यं सुसाध्या भवति। यदि कोऽपि एतान् अनुसर्तुम् इच्छति, तर्हि तस्य अधिकारः आवश्यकं किल। तस्य अधिकारिणः लक्षणानि एतानीति विशदयति शङ्करः।

मेधावी पुरुषो विद्वानूहापोहविचक्षणः ।
अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः।। विवेकचूडामणिः –16 ।।

---

4 पतञ्जलियोगसूत्रम् 1.23

In Public domain. Digitization Muthulakshmi Research Academy

यः मेधावी, विद्वान्, ऊहापोहयोः भेदज्ञानी भवति स एव आत्मविद्यां सम्पादितुमर्हति। असौ अधिकारः अस्ति अधिकारिषु। यद्येवम्, आत्मविद्यायाः योग्यता कस्य?

विवेकिनो विरक्तस्य शमादिगुणशालिनः ।
मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यतामता।। विवेकचूडामणिः -17।।

यस्य भेदज्ञानमस्ति सः विवेकी, वस्तूनां वैराग्यं यस्य अस्ति सः विरागी (विरक्तः), यः चित्तवृत्ती निरुध्य मनः शान्तं करोति सः शमी, यः बाह्येन्द्रियाणि स्वाधीनानि करोति सः दमी, यः सन्यासी (उपरतिः), यस्य द्वन्द्वं समानम् (तितिक्षा), यः एकाग्रतया ब्रह्मनि तिष्ठति (समाहितः), यस्य वेदान्तवाक्येषु विश्वासः अस्ति, तदृशस्य मुमुक्षोरेव ब्रह्म अर्थात् आत्मानं ज्ञातुं योग्यता अस्ति। इति शङ्करभगवत्पादानाम् अभिप्रायः।

ब्रह्मसत्यं जगन्मिथ्येत्वेवंरूपोविनिश्चयः।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।। विवेकचूडामणिः -20 ।।

अद्वैतसिद्धान्तमते ब्रह्मसत्यं जगत् मिथ्या इति निश्चयः, नित्यानित्यवस्तुविवेकः च यस्य अस्ति सः एव विवेकी भवति। अस्मिन् अद्वैतसिद्धान्ते आत्मा प्रधानः। यदि आत्मा न इच्छति रम्यहर्म्यमपि अर्थरहितं भवति। यदि आत्मा इच्छति वृक्षस्य छाया अपि अर्थसहिता भवति।

आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः पियः ।
स्वत एव हि सर्वेषामात्मा प्रियतमोमतः।। विवेकचूडामणिः -108।।

विषयः स्वतः प्रियो न भवति। आत्मा आत्मनः इच्छया प्रियत्वेन अप्रियत्वेन वा भाव्यते। तस्मादेव सर्वेभ्यः आत्मा प्रियतमो भवति।

तत आत्मा सदानन्दो नास्य दुःखं कदाचन ।
यत्सुषुप्तौ निर्विषय आत्मानन्दोऽनुभूयते ।
श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति।। विवेकचूडामणिः -109 ।।

श्रुत्या, प्रत्यक्षानुमानैतिह्यप्रमाणैः सुषुप्तिस्थितौ निर्विषयस्सन् तिष्ठतीत्यतः सदानन्दोऽयमात्मा कादापि दुःखं नानुभवतीत्ययं सिद्धिः। 'इच्छा द्वेष

In Public domain. Digitization Muthulakshmi Research Academy

प्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्' (न्यायसूत्राणि – 1.1.10)[5] इत्येवं न्यायदर्शनं प्रत्यक्षानुमानोपमानशब्दान् प्रमाणत्वेन स्वीकरोति। एतेन सूत्रेण आत्मा केन्द्रबिन्दुः भवति। कणादगौतमयोः दृष्ट्या इच्छाद्वेषसुखदुःखप्रयत्नज्ञानानि सर्वाणि आत्मनः एव सन्ति, आत्मा प्रयत्नशीलः, ज्ञानं आत्मने एव लभ्यते, जिज्ञासा आत्मनः लिङ्गम् अथवा गुण इति विचारः। परन्तु भगवत्पादशङ्कराचार्यः आत्मा अगुणी शुद्धचैतन्यस्वरूपः इति निगदन् नेति नेति निर्वचति।

यदि आत्मनः निर्वचनं कुर्वतोः कणादगौतमयोः आत्मनिर्वचनम् भगवत्पादशङ्करस्य दृष्ट्या अवलोकयामः तर्हि तत्केवलं जीवत्मनः निर्वचनमित्येव प्रतीयते न तु तत्भिन्नत्वेन। भगवत्पादशङ्करस्य अविद्यावच्छिन्नं आत्मा जीवात्मा। कणादगौतमयोः आत्मनः लिङ्गानि सर्वाणि भगवत्पादशङ्करस्य अविद्यालक्षणानि एव। असौ वैशेषिकन्याययोः अद्वैतवेदान्तस्य च भेदः अस्ति।

अव्यक्यनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा ।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ।। विवेकचूडामणिः –110 ।।

अव्यक्तनाम्नी परमेश्वरशक्तिः आदिरहिता अविद्या। सत्वरजोतमस्त्रिगुणीपरा एव माया। यया एव जगत्सर्वमिदं प्रसूयते। अस्मिन् श्लोके अद्वैतमतस्य प्रधानांशं मायायाः विवरणं कथयति भगवत्पादशङ्करः।

माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम्।
असदिदमनात्मतत्त्वं विद्धित्वं मरुमरीचिकाकल्पम्।। विवेकचूडामणिः –125 ।।

साङ्ख्यदर्शनस्य प्रकृतिः अत्र अद्वैतमते माया भवति। इयमेव अव्यक्तनाम्नीपरमेशशक्तिः, अनादिरविद्या–त्रिगुणात्मिका–परा। प्रकृतेर्महान् इति साङ्ख्यकारिकायाम्[6] ईश्वरकृष्णः अभिप्रैति। भगवत्पादशङ्करस्तु मयायाः महत्, महदादिपञ्चभूतात्मक अस्माकं देहपर्यन्तं सर्वम् अनात्मतत्त्वमेव न पुरुषतत्त्वम् इति कथयति ।

---

5 न्यायदर्शनम्, पण्डितगोपदेवशास्त्री (अम्बाव्याख्याकर्ता), कूचिपूडि, आन्ध्रप्रदेश, आर्यसमाजः, 1989, P.16.

6 ईश्वरकृष्णविरचितसाङ्ख्यकारिका, स्वामी विरूपाक्षानन्द (आङ्गलानुवादकः), मद्रास, रामकृष्णमठ, 1995, P.64.

In Public domain. Digitization Muthulakshmi Research Academy

साङ्ख्यदर्शने प्रकृतिः सदेव। परन्तु अद्वैतम्ते इदं माया नाम्ना असद्भवति। या मा सा माया। तस्मात् मायायाः उत्पन्नं कार्यं जगत्सर्वम् असदेव। अत्र भगवत्पादशङ्करः मरुमरीचिकेति उपमानेन विषयं गम्यमानमस्माकं कारयति।

अथ ते सम्प्रवक्ष्यामि स्वरूपं परमात्मनः।
यद्विज्ञाय नरो बन्धान्मुक्तः कैवल्यमश्नुते।। विवेकचूडामणिः –126 ।।

एतस्माच्छलोकात् भगवत्पादशङ्करः आत्मनिरूपणं प्रारभते। अत्र शङ्करः परमात्मा शब्दप्रयोगं करोति। शङ्करस्य आत्मपरमात्मनोः भेदः नास्ति। अयं विषयः वेदान्तडिण्डिमेति, अन्यप्रकरणग्रन्थे विवृणोति।

ब्रह्म सत्यं जगन्मिथ्या जीवोब्रह्मैव नापरः ।
जीवन्मुक्तस्तु तद्विद्वान् इति वेदान्तडिण्डिमः ।। वेदान्तडिण्डिमः –63 ।।

तस्मात् परमात्माशब्दस्य अर्थः आत्मा इत्येव ग्राह्यः। तस्य परमात्मनः स्वरूपं ज्ञात्वा नरः बन्धमुक्तः भवति, कैवल्यरूपं मुक्तिश्चाश्नुते। कैवल्यं[7] जैनदर्शनस्य पारिभाषिकपदम्। इदं जैनदर्शने केवलज्ञानम्। अद्वैतमते तु अद्वैतस्य केवलज्ञानम्[8]। तदद्वैतस्य केवलज्ञानम् प्राप्य अथवा विज्ञाय कैवल्यं नरः अश्नुते।

अस्ति कश्चित्स्वयं नित्यमहं प्रत्ययलम्बनः।
अवस्थात्रयसाक्षीसन् पञ्चकोशविलक्षणः।। विवेकचूडामणिः –127 ।।

अमुना श्लोकेन आत्मनिरूपणं करोति। आत्मा नित्यम् अहमित्यस्य आश्रयभूतः। अयं जागृत्सवप्नसुषुप्तीणाम् अवस्थात्रयाणां साक्षी सन् अन्नमय, प्राणमय, मनोमय, विज्ञानमय, आनन्दमय कोशेभ्यः अथवा पञ्चकोशविलक्षणो भवति।

यो विजानाति सकलं जाग्रत्स्वयप्नसुषुप्तिषु ।
बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ।। विवेकचूडामणिः – 128 ।।

यः जाग्रत्स्वप्नसुषुप्तिषु चित्तवृत्तीः विजानाति, समाधिस्थितौ तेषाम् अभावं अवगच्छति स आत्मा। अत्र शङ्करः योगसूत्रकारपतञ्जलेः योगश्चित्तवृत्तिनिरोधः इति निर्वचनस्य भावमस्मिन् श्लोके प्रदर्शयति।

---

7 An introduction to Indian Philosophy, Satishchandra Chattarji and Dheerendra Mohan Datta, Kolkata, University of Kolkata, 1968, PP.77-111.

8 अद्वैतस्य केवलज्ञानं नाम जीवोब्रह्मैवनापरः

In Public domain. Digitization Muthulakshmi Research Academy

यः पश्यति स्वयं सर्वं यं न पश्यति किञ्चन ।
यश्चेतयति बुद्ध्यादि न तद् यं चेतयत्ययम् ।। विवेकचूडामणिः – 129 ।।

यः आत्मा यं समस्तं पश्यति, यमात्मानं नकिञ्चन पश्यति, यः आत्मा बुद्धिं चेतयति, यमात्मानं बुद्धिः न चेतयति स अयमात्मा। इत्युक्ते अयमात्मा बुद्धिं चेतयित्वा सर्वान्समस्तान् दृष्ट्वा आवगच्छतीति।

येन विश्वमिदं व्याप्तं यं न व्याप्नोति किञ्चन।
आभारूपमिदं सर्वं यं भान्तमनुभात्ययम्।। विवेकचूडामणिः – 130 ।।

आत्मा सर्वव्यापी अर्थात् चैतन्यं सर्वत्र अस्ति परन्तु चैतन्ये किञ्चिदपि नास्ति। अस्य श्लोकस्य द्वितीयपादे रूपकालङ्कारप्रयोगं करोति शङ्करः। कान्तिरूपमिदं सर्वं यं भान्तम् अनुभात्ययमात्मा।

यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः।
विषयेषु स्वकीयेषु वर्तन्ते प्रेरिता इव।। विवेकचूडामणिः –131 ।।

आत्मानं न कोऽपि प्रेरयति। तस्य सन्निधिमात्रेण एव शरीरं, मनः, बुद्धिः इत्येते सर्वे तेषां सम्बद्धविषयेषु प्रेरितास्सन्तः वर्तन्ते। अमुष्मात् प्रेरितानुभवात् आत्मासिद्धिर्भवति।

बीजं संसृतिभूमिजस्य तु तमो देहात्मधीरङ्कुरो
रागः पल्लवमम्बुकर्म तु वपुः स्कन्धोऽसवः शीखिकाः
अग्राणीन्द्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं
नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः।। विवेकचूडामणिः – 147 ।।

अत्र भगवत्पादशङ्करः रूपकालङ्कारप्रयोगेण बन्धस्थितिं वर्णयति। अमुष्यसंसार–वृक्षस्य मूलकारणमज्ञानम्। अहमिति शरीरं बुद्ध्यागम्यमानम् अङ्कुरम्, रागः पल्लवम्, कर्म तोयम्, शरीरं स्कन्धः, पञ्चप्राणाः शाखिकाः, पञ्चकर्मेन्द्रियाणि–पञ्चज्ञानेन्द्रियाणि अपि संसारवृक्षस्य अग्राणि, विषयाः पुष्पाणि, नानाकर्मसमुद्भवं फलं दुःखम्, अस्मिन् संसारवृक्षे स्थितौ जीवात्माभोक्ता, अत्र खगः पक्षी। एतत् बन्धनिरूपणोत्तरम् आत्मानात्मविवेकप्राशस्थ्यं कथ्यते शङ्करभगवत्पादैः अग्रिमे श्लोके।

नास्त्रैर्न शस्त्रैरनिलेन वह्निनाच्छेत्तुं न शक्यो न च कर्म कोटिभिः ।
विवेकविज्ञान महासिना विना धातुः प्रसादेन शितेन मञ्जुना।। विवेकचूडामणिः – 149 ।।

In Public domain. Digitization Muthulakshmi Research Academy

अयं बन्धः ईश्वरस्य प्रसादेन लभ्यते। यदि ईश्वरः नास्ति तस्य प्रसादः अयं बन्धः अपि नास्ति। कदा ईश्वरः नास्ति? यदा आत्मानात्मविवेकज्ञानमस्ति तदा ईस्वरस्य कल्पितः बन्धः अपि नास्ति। अयं बन्धः अस्त्रैः, शस्त्रैः, वायुना, वह्निना, कर्मकोटिभिः च्छेत्तुं न शक्यः। जीवः आत्मानात्मविवेकविज्ञानमहापरशुना एव अमुं बन्धं च्छेत्तुं शक्नोति।

आत्मानात्मविवेकः कर्तव्यो बन्धमुक्तये विदुषा ।
तेनैवानन्दी भवति स्वं विज्ञाय सच्चिदानन्दम्।। विवेकचूडामणिः 154 ॥

बन्धमुक्त्यर्थं विदुषा आत्मानात्मविवेकः प्रप्तव्यः। इत्येतदेव कर्तव्यम्। तेनैव आनन्दी भवति। स्वं विज्ञाय सच्चिदानन्दम् अनुभूयते।

सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात्।
न ह्यन्यदस्ति किञ्चित् सम्यक्परतत्त्वबोधसुदशायाम् ।। विवेकचूडामणिः – 228 ॥

शङ्करभगवत्पादैः ब्रह्मविना अत्र किमपि नास्तीति प्रतिपादितम्। परतत्त्वज्ञानप्राप्तिस्थितौ जगन्मिथ्याज्ञानं गोचरम्। मायावच्छिन्नब्रह्म जगत्। यदा माया शाश्वतेन लुप्यते तदा ब्रह्मैव भाति। सदिदं परमाद्वैतम्। स्वस्मादन्यस्य वस्तुनः अभावात्। न हि अन्यत् अस्ति किञ्चित्। सम्यक्परतत्त्वबोधः सुदशायां गम्यमानं भवति।

यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात्।
तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम्।। विवेकचूडामणिः – 229 ॥

यत् इदं विश्वं सर्वम् अज्ञानेन नानारूपं प्रतीयते। अन्ते जीवः निश्चयेन विवेकज्ञानेन तत्सर्वं ब्रह्म एव इति निर्धारयति।

परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम्।
एकमेवाद्वयं ब्रह्मनेहनानास्ति किञ्चन।। विवेकचूडामणिः – 446 ॥

ब्रह्मानेह नानास्ति। सः एकमेवाद्वयम्, तत्परिपूर्णम्, तदनाद्यनन्तमप्रमेयम्, अविक्रियं च। अमुष्मात् विवेकज्ञानबोधोपलब्धेः साधकस्य स्थितिम् वर्णयति शङ्करभगवत्पादाःअग्रिमे श्लोके।

सर्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनान्तर्बहिराश्रयः सन्।
भोक्ता च भोग्यं स्वयमेव सर्वं तद्यत्पृथग्दृष्टमिदं तयापुरा।। विवेकचूडामणिः – 497 ॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वयमेव भोक्ता च भोग्यं च। सर्वेषु भूतेषु अहमेव संस्थितः। अत्र अहं शब्दः न अहङ्कारः परन्तु अतति[9] सर्वत्र व्याप्नोति नैरन्तर्येण इति स एव आत्मा। सः अन्तर्बहिराश्रयः सन् भोक्तृत्वेन भोग्यत्वेन पृथक्तिष्ठतीति दृष्टिः अज्ञानेन सिद्धम्। आत्मानात्मविवेकज्ञानेन पृथक्त्वं त्यक्त्वा भोक्ता च भोग्यञ्च स्वयमेव सर्वम् अनुभवति। इयम् एव अद्वैतस्थितिः।

BIBLIOGRAPHY

1. भगवत्पादशङ्कराचार्य विरचित विवेकचूडामणिः, पद्मश्री आचार्य पुल्लेल श्रीरामचन्द्रः (आन्ध्रव्याख्या कर्ता) हैदराबाद्, संस्कृतभाषाप्रचारसमिति, 1995, PP.1-585.
2. वैशेषिकदर्शनम् – पण्डितगोपदेवशास्त्री (अम्बा व्याख्याकर्ता), कूचिपूडि, आर्यसमाजः, 1984, P.3.
3. न्यायदर्शनम् – पण्डितगोपदेवशास्त्री (अम्बा व्याख्याकर्ता), कूचिपूडि, आर्यसमाजः, 1989, P.16.
4. ईश्वरक्रिष्ण विरचित सांख्यकारिका – स्वामी विरूपाक्षानन्दः (आङ्ग्लानुवादकः) मद्रास्, रामक्रिष्णामठ्, 1995, P.64.
5. भगवत्पादशङ्कराचार्य विरचित वेदान्तडिण्डिमः – हैदराबाद्, आध्यात्मयोगालयः, 1982, P.136.
6. An Introduction to Indian Philosophy, Chatarjee-Sastishchandra And Datta, Dhirendramohan, Kolkata, University of Kolkata, 1968, pp.77-111

[9] अततीत्यत्र 'अत' सातत्य गमने इति धातुः – पाणिनीयधातुपाठः

In Public domain. Digitization Muthulakshmi Research Academy

वस्तुनिष्ठा सारस्वतप्रतिष्ठा

डा.राणी सदाशिवमीर्तिः

संस्कृतवाङ्मये विद्यमानासु सर्वासु रचनाप्रक्रियासु वस्तुनः महत्प्राधान्यं वर्तते। प्रक्रियासु भेदमनुसृत्य वस्तुवैविध्यमपि दृश्यते। सहस्राधिकशाखासमन्विताभ्यः वेदसंहिताभ्यः आरभ्य कैश्चिदप्यन्यैरनालिङ्गितविषयवन्मुक्तकपर्यन्तमपि सर्वेष्वपि वाङ्मयप्रभेदेषु वस्तुनः किमपि विशिष्टं स्थानं परिकल्पितमस्ति। एतद्वस्तुवैशिष्ट्यमनुसृत्यैव तत्तद्वाङ्मयप्रभेदानां मान्यतानिर्देशः महत्त्वस्थायीनिर्देशश्च निश्चीयते।

तत्र 'इष्टप्रापत्यनिष्टपरिहायोरसौकिकमुपायं वेदयति वेदः' ऐहिकामुष्मिक उत्कृष्ट-ज्ञाननिधिः। अत एव विद्वत्प्रवरैः प्रभुरिव सेव्यते।

संसारबीजविशरणाय भवबन्धं शिथिलयितुं ब्रह्मगमयितुं च समर्था उपनिषद्विद्या। अनेन विषयगरिम्णैव मोक्षविद्या सद्विद्येति निगद्यते।

शासनशंसनव्यापाराभ्यां जगत्कल्याणसिद्धये प्रयतते इति हेतोः समस्तं शास्त्रजातं महीयते महीतले। सर्वेष्वप्यैहिकधर्मसाधनपरेषु शास्त्रेषु विषय–अधिकारी–प्रयोजन–सम्बन्धाख्येषु अनुबन्धचतुष्टयांशेषु आद्यं स्थानं विषयस्यैव विहितम्।

जन्मनः प्रभृत्यन्त्येष्टिं यावत् पुंसवनादि चत्वारिंशत्संस्कारविशेषैः नृणां महत्त्वसम्पादनायोपकुर्वन्तीति कारणेनैव स्मृतीनां विषये बद्धादरा भवन्ति सर्वे लौकिकाः।

सर्ग–प्रतिसर्ग–वंश–वंशानुचरित–मन्वन्तरादि–कल्पान्तरविषय–प्रतिपादन–पराणि पुराणानि नानाख्यानोपाख्यानगाथाकल्पवाक्यादिविशेषैस्समलङ्कृतानि सन्ति। जनानां मनांसि धर्मानुरक्तानि कुर्वन्ति च। तथैव परिक्रिया पुराकल्पाख्ययोः द्विविधयोः ऐतिहासिकसरण्योः उदाहरणभूतौ रामायण–महाभारताख्यौ द्वावितिहासावपि समस्तजनधार्मिकसांस्कृतिक-चेतनोन्मुखविषयगर्भितौ विलसतः। अतः एतेषां पुराणानाम्, इतिहासद्वयस्यापि जयेति समष्टिव्यपदेशो लोकविश्रुतोऽस्ति। अत एव –

अष्टादशपुराणानि रामस्य चरितं तथा।
कार्ष्णो वेदः पञ्चमश्च यं महाभारतं विदुः।।
जयेति नाम्नात्वेतांस्तु प्रवदन्ति मनीषिणः।।
परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।

In Public domain. Digitization Muthulakshmi Research Academy

स्यादेकनायका पूर्वं, द्वितीया बहुनायका।।
इत्युररीचकार काव्यमीमांसाकारः।

सर्ग–प्रतिसर्ग–मन्त्रनिर्णय–स्त्रीपुरुषलक्षण–राजधर्म–दानधर्म–युगधर्माध्यात्मतत्त्व–वर्णनपराणि तन्त्रशब्देनाभिधीयन्ते।

एवं प्रकारेण नैकवस्तुविचारशीलाः श्रुति–स्मृति–पराणेतिहास–शास्त्र–तन्त्रमार्ग–प्रसिध्दाः ग्रन्थाः बहुधा पठितॄणां मनांसि चेतयितुं सन्ततोद्यमरतास्सन्ति।

अथ परमरमणीये नवरसजीवातुभूते काव्यप्रस्थाने काव्यास्वादनवेलायां वस्तुनः कीदृशं स्थानं देयम्? काव्यवस्तुचयने के आकराः भवन्तीत्याद्यंशाः अत्र सङ्ग्रहेण प्रस्तूयन्ते।

विषय इति, वस्त्विति, कथावस्त्विति, वृत्तमिति, इतिवृत्तमिति बहुभिर्नामभिः व्यवह्रियमाणस्य वस्तुनः तत्त्वाविष्करणायालङ्कारशास्त्रवर्त्मनि बहवो विचाराः आविरभूवन्।

तत्राद्यस्थानीयानि भवन्ति रूपककलाप्रस्थानप्रथमाचार्यस्य मुनिवरिष्ठस्य भरतस्य वचनानि।

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्नदृश्यते।।
देवानामसुराणाञ्च राज्ञामथ कुटुम्बिनाम्।
ब्रह्मर्षीणाञ्च विज्ञेयं नाट्यं वृत्तानातदर्शकम्।।
योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।
सोऽङ्गाद्यमिनयोपेतो नाट्यमित्यभिधीयते।
वेदविद्येतिहासानामारव्यानपरिकल्पनम्।
विनोदकरणं लोको नाट्यमेतद्भविष्यति।
श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम्।
विनोदजननं लोके नाट्यमेतद्भविष्यति।।[1]

अस्य मुनेरभिप्राये नास्ति किञ्चिदप्यस्मिन् लोके यत् नाट्ये वस्तु भवितुं नार्हति। समस्तवेदवेदाङ्गस्मृतीतिहासादिविद्यास्थानेभ्यः क्वचित् साक्षाल्लोकानुभवादपि अभिनेयविषयस्य चयनं भवितुमर्हति। तथा निर्मितं नाट्यं हितोपदेशकं, सुखदं दुःखार्तानां, श्रमार्तानां, शोकार्तानां

---

1 नाट्यशास्त्रे प्रथमाध्याये.17,120,122,123,श्लोकाः।

In Public domain. Digitization Muthulakshmi Research Academy

तपस्विनां विश्रान्तिजनकं, धर्म्यं, यशस्यमायुष्यं, हितं, बुद्धिविवर्धकं, लोकोपदेशजनकञ्च भविष्यतीति मुनेराशयः।

अस्य महनीयस्य स्पृहणीयोऽयमाशयः अनन्तरकालीनैः रूपकलक्षणविधायिभिः काव्यतत्त्वविद्भिश्च शिरसा गृहीतः।

अत एव भामह–दण्डी–विश्वनाथाद्याचार्यप्रवरा अपि मुनिवचने श्रद्धालवस्सन्तः इतिवृत्तविषये इत्थं जगदुः।

सर्गबन्धो महाकाव्यं महतां च महच्च यत्।
अग्राम्यशब्दमर्थ्यं च सालङ्कारं सदाश्रयम्।। इति भामहेन[2]
इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलायत्तचतुरोदात्तनायकम्।। इतिदण्डिना[3]
सर्गबन्धो महाकाव्यं तत्रैको नायकस्सुरः।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गास्स्युस्तेष्वेकं च फलं भवेत्।। इति विश्वनाथेन[4]

कविकण्ठाभरणे भोजेनोक्तप्रकारेणापि–

कवयः छायोपजीवी, पदकोपजीवी, पादोपजीवी, सकलोपजीवी स्वोन्मेषतः प्राप्तकवित्वजीवी, भुवनोपजीव्यश्चेति षड्विधाः भावन्ति। तेषु भगवान् व्यासः भुवनोपजीव्यो भवति यतः –

इदं कविवरैः सर्वैराख्यानमुपजीव्यते।[5]
उदयं प्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः।। इति कथनात्।

एतेभ्यः उद्धरणेभ्योऽवगम्यते यत् रामायणमहाभारतेतिहासौ द्वावपि महतः काव्यवर्त्मनः मधुमयभणितीमार्गदर्शिनाविति। तत्रापि श्रीमद्रामायणं महाभारतकर्तुः व्यासमहर्षेरपि प्रेरणदायीति पौराणिकी वाक् काचित् श्रूयते।

---

2 भामहकाव्यालङ्कारः क्ष.19

3 काव्यादर्शः क्ष.15

4 साहित्यदर्पणम् क्ष.315,318

5 कविकण्ठाभरणे द्वितीयसन्धौ 122 श्लो

In Public domain. Digitization Muthulakshmi Research Academy

पठ रामायणं व्यास! काव्यबीजं सनातनम्।[6]
यत्र रामचरितं स्यात् तदहं तत्र शक्तिमान्।। इति।।

महाकविपरम्परायां सर्वाग्रण्यः भास–कालिदास–भारवि–माघ–भवभूत्यादयः सर्वेऽपि इतिहासविधातृभ्यां वाल्मीकिव्यासर्षिभ्याम् आत्मनामधमर्णतां सश्रद्धं सविनयं प्रकटीचक्रुः।

यथा भारतीय काव्यग्रथनोद्यमे इतिहासाभ्याम् इतिवृत्तचयनविधिर्वर्तते, तथैव पाश्चात्यकवितावन्यामपि तेषामैतिहासिकप्रबन्धेभ्यः इतिवृत्तचयनं काव्यकल्पनोत्साहशक्तिं चाप्तुं स्वीकृतव्रतिन इति तत्क्षेत्रीयविमर्शकवरेण्यानामुक्तिभ्यः अवगम्यते।

Horace तथा Alexander pope पण्डितयोरधस्तनवचांसीममभिप्रायं द्रढीकुर्वन्ति।

You my friends study the great originals of Greece.[7]

Dream of there by night and ponder them by day. इति Horace महाशयवचनम्

Be Homer's works your study and delight,[8]
Read them by day and meditate by night.

इति सत्कविकीर्तिं प्राप्तुकामानां Alexander pope पण्डितस्य सन्देशोऽयम्। Horace महाशयस्य मतमनुसृत्य "A simple theme is one that is chosen from familiar material" or "from life and custones"[9] अत्र "familiar material" इति प्रयोगेण तद्देशीयमहाप्रबन्धोद्धृतमिति–वृत्तमिति व्याख्यायते।

अथ काव्यवर्गीकरणे वस्तुनः प्राधान्यमुद्दिश्य भामहराजशेखरादीनां मतसारोऽत्र दीयते।

भामहेन पूर्वदेवादीनां कीर्तनपरं, कल्पितवस्त्वाश्रयं, कलाश्रयं, शास्त्राश्रयञ्चेति वस्तुप्राधान्यमवलम्ब्य काव्यचातुर्विध्यमङ्गीकृतम्।

राजशेखरादयोऽपि शास्त्रं, काव्यं, शास्त्रकाव्यं, काव्यशास्त्रमिति भेदान् प्रादर्शयन्।

---

6 बृहद्धर्मपुराणम् – प्रथमकाण्डम् – 30-47-41.

7 An Introduction to English eroticism by BJ. Prasad p.32

8 An Introduction to English eroticism by BJ. Prasad p.32

9 An Introduction to English eroticism by BJ. Prasad p.35

In Public domain. Digitization Muthulakshmi Research Academy

अथ धनञ्जयस्य दशरूपके शारदातनयस्य भावप्रकाशे सदृशेष्वितरेषु नाटकलक्षणविधायकग्रन्थेषूक्तरीत्या रूपकेषु इतिवृत्तस्य कीदृशं महत्त्वं भवतीति किञ्चिदत्र परिचीयते।

तेषां मतमनुसृत्य आधिकारिकं, प्रासङ्गिकञ्चेति द्विविधं वस्तु। तत्र काव्ये प्रधानभूतं वस्त्वाधिकारिकमिति तदङ्गभूतं प्रासङ्गिकमिति चोच्यते। श्रीमद्रामायणे सीतारामयोः कथा आधिकारिकं, विभीषणसुग्रीवादीनां कथा प्रासङ्गिकश्च भवतः।

प्रासङ्गिकं पुनः पताका, प्रकरी चेति द्विधा वर्तते। आधिकारिकेण साकं दूरं यदनुवर्तते सा पताकेत्युच्यते। यदल्पावधिमिता सा प्रकरीति व्यवह्रियते।

आकरभेदमनुसृत्य रूपकेषु इतिवृत्तं प्रख्यातम्, उत्पाद्यं, मिश्रञ्चेति त्रिविधम् अङ्गीकृतम्।

कथागतपात्रस्वभावमनुसृत्य दिव्यं, मर्त्यं, दिव्यादिव्यमिति त्रयो भेदाः कल्पिताः। इतिवृत्तस्य रूपकनियमौचित्यमनुसृत्य सूच्यं, श्रव्यं, दृश्यश्रव्यमिति त्रैविध्यं प्रादर्शि। तत्र सूच्यवस्तु प्रवेशक-विष्कम्भक-अङ्कास्य-अङ्कवातारादिभिः अर्थोपक्षेपकैः सूचनीयं भवति। तादृशं वस्तु मञ्चे कदापि न प्रदर्शनीयमिति नियमः। दृश्यश्रव्यवस्तु सम्यक् प्रदर्श्यते। श्रव्यवस्तुनि सर्वश्राव्यं- यथा आकाशभाणितं, नियतश्राव्यं- यथा जनान्तिकमपवारितं च, अश्राव्यं – यथा स्वगतमिति च भेदाः संलक्ष्यन्ते।

पञ्चसन्धयः

सन्धिर्नाम योगः। द्वयोरंशयोर्योगेन सन्धिर्जायते। नाट्ये दशरूपकेषु वस्तुविस्तरणक्रमे पञ्चसन्धयस्सम्भवन्ति। एते एव नाटकसन्धयः इति विख्याताः। एतेषु पञ्चसन्धिषु पुनः चतुष्षष्टि सन्ध्यङ्गानि सम्भवन्ति। एवं विधैः सन्धिसन्ध्यङ्गैः समग्रपरिपुष्टं रूपकं सर्वसहृदयश्लाघ्यं भवतीति लाक्षिणिकाः उरीचक्रुः। इतिवृत्तभेदमनुसृत्य रूपकाणि नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगश्चेति दशधा विभक्तानि सन्ति। एतेषु रूपकभेदेषु यथौचित्यं पञ्चनाटकसन्धीनां न्यूनाधिक्ये दृश्येते।

विषयेऽस्मिन्दशरूपके निगद्यते –

अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः।
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्च सन्धयः।।' इति।

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् धर्मार्थकामेषु त्रिष्वन्यतमो वा त्रयो वा इतिवृत्तस्य फलानि भवेयुरिति नियमः। तत्फलसिद्धिहेतवः बीज–बिन्दु–पताका–प्रकरी–कार्य–भेदेन पञ्चधा सन्ति। ते एव अर्थप्रकृतकः इत्युच्यन्ते।

तथैव वस्तुनि प्रधानकार्यस्य आरम्भ–यत्न–प्राप्त्याशा–नियताप्ति–फलागमाख्याः पञ्च कार्यावस्थास्सन्ति।

एतेषां पञ्चार्थप्रकृतीनां पञ्चकार्यावस्थाभिस्साकं एकैकशः योगेन यथायोगं मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः, निर्वहणसन्धिः, पञ्चनाटकसन्धयो सम्भवन्ति। तद्यथा –

अर्थप्रकृतयः	+	कार्यावस्थाः	=	पञ्चसन्धयः
बीजम्	+	आरम्भः	=	मुखसन्धिः
बिन्दुः	+	यत्नः	=	प्रतिमुखसन्धिः
पताका	+	प्राप्त्याशा	=	गर्भसन्धिः
प्रकरी	+	नियताप्तिः	=	विमर्शसन्धिः
कार्यम्	+	फलागमः	=	निर्वहणसन्धिः

क्रमशः तेषां लक्षणोदाहरणान्यत्र दीयन्ते।

मुखसन्धिः

बीजारम्भयोर्योगेन सन्धिरेषस्समुपजायते।

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा।
अङ्गानि द्वादशैतस्य बीजीरम्भसमन्वयात्।।

इति दशरूपककारिकामनुसृत्य सन्धावस्मिन् जायते बीजम् येन बीजेन नानाप्रयोजनसिद्धिहेतुकाः नैके रसास्सम्भवन्ति।

यथा – रत्नावलीनाटिकायां –

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः।।

इति नेपथ्यवचनात् यौगन्धरायणेन वत्सराजस्य सार्वभौमत्वसिद्ध्यर्थं वत्सराजरत्नावलीसमागमार्थं विरचितोपायस्य बीजसंसूचनं लभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अस्मिन् सन्धौ द्वादशाङ्गानि सन्ति तन्येव –

उपक्षेपः परिकरः, परिन्यासः, विलोभनम्, युक्तीः, प्राप्तिः, समाधआनम्, विधानम्, परिभआवना, उद्भेदः, भेदः, करणम् इति।

प्रतिमुखसन्धिः

लक्ष्यलक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत् इति वचनानुसारं अङ्कुरोत्पत्तिकाले यथा बीजमङ्कुररूपेण सत् किञ्चिल्लक्ष्यं, किञ्चिदलक्ष्यं च भवति तद्वद्रूपकबीजमपि यत्र लक्ष्यमलक्ष्यं च भवति तत्र प्रतिमुखसन्धिरिति ज्ञेयः। अयं सन्धिः बिन्दुयत्नाख्ययोरर्थप्रकृतिकार्यावस्थयोः योगेन सिद्धो भवति। यथा रत्नावल्यां सागरिकावत्सराजयोः प्रथमवीक्षणानन्तरं मदनातुरा रत्नावली वत्सराजोदयनस्य चित्रं लिखित्वा स्वस्य मदनसन्तापस्योपशमनं कर्तुमिच्छति। अत्र तयोस्समागमस्य आशा सूच्यते। पुनः तत्चिचित्रफलकं दृष्ट्वा क्रुद्धा वासवदत्ता तयोस्समागमनिवारणोपायान्वेषणासक्ता भवति। अत्र बीजस्य अलक्ष्यता दृश्यते। अतोऽयं प्रतिमुखसन्धिः। अस्मिन् सन्धौ त्रयोदशाङ्गानि भवन्ति। तान्येव–

विलासः, परिसर्पः, विधूतम्, शमः, नर्मः, नर्मद्युतिः, प्रगमनम्, निरोधः, पर्युपासनम्, वज्रम्, पुष्पम्, उपन्यासः,वर्णसंहारः इति।

गर्भसन्धिः

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः इति प्रमाणवाक्यमनुसृत्य यत्र बीजस्य दर्शनं पुनरदर्शनम्, तस्यानेकधान्वेषणम्, पुनः प्राप्तिः, पुनः विच्छेदः भवति तत्र गर्भसन्धिरिति धनञ्जयादीनां मतम्। यथा रत्नावल्यां – तृतीयाङ्के उदयनरत्नवल्योः पुनः पुनः समागमावकाशाः मध्ये मध्ये वारं वारं वासवदत्तया कल्पितविघ्नपरम्परा, पुनस्तयोः प्राप्तिः, पुनर्विच्छेदः, भूयो भूयः उपायान्वेषणमिति यो बीजान्वेषणक्रमो वर्तते स गर्भसन्धिरिति कथ्यते।

अस्मिन् सन्धौ द्वादशाङ्गानि वर्तन्ते। अभूताहरणम्, मार्गः, रूपम्, उदाहरणम्, क्रमः, सङ्ग्रहः अनुमानम्, तोटकम्, अधिबलम्, उद्वेगः, सम्भ्रमः, आक्षेपः इति।

विमर्शसन्धिः –

अस्यैव अवमर्शसन्धिरित्यपि नामान्तरमस्ति।

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः।

In Public domain. Digitization Muthulakshmi Research Academy

इति दशरूपकवचनमनुसृत्य यत्र क्रोधेन, व्यसनेन अर्थात् केनचिद्दुःखसन्दर्भेन, विलोभनेन गर्भसन्धौ प्रकटितस्य बीजस्य फलावाप्तिविषये पर्यालोचनं क्रियते सः विमर्शसन्धिरिति व्यवह्रियते।

यथा वेणीसंहारनाटके –

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्योऽपि याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवितसंशये वयममी वाचा समापोपिताः।।

इति श्लोके स्वल्पावशेषे जये इति कथनेन एकान्तविजयावमर्शनं कृतमितिहेतोः अवमर्शसन्धिरिति ग्राह्यम्।

सन्धावस्मिन् त्रयोदशआङ्गानि विद्येन्ते। तानि – अपवादः, सम्फेटः, विद्रवः, द्रवः, शक्तिः, द्युतदिः, प्रसङ्गः, चलनम्, व्यवसायः, विरोधनम्, प्ररोचना, विचलनम्, आदानम् चेति।

निर्वहणसन्धिः

अस्यैव उपसंहृतिरित्यपि व्यवहारो वर्तते।
बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्।।

इति सन्धिरसौ निरुच्यते दशरूपके। यथोक्तमत्र सन्धावस्मिन् रूपककथावस्तुनः बीजयुक्तानां मुखाद्यर्थानामितस्ततो विप्रकीर्णानामेकार्थविशेषयोगसङ्ग्रहो भवति। यथा रत्नावलीनाटके चतुर्थाङ्के वासवदत्तया यौगन्धरायणवसुभूतिबाभ्रव्यादीनां मुखात्सत्यविषय-श्रवणं, रत्नावलीवत्सराजयोः पाणिग्रहणार्थमात्मनः अङ्गीकारप्रकटनं, यौगन्धरायण-मन्त्रालोचनाविष्कारादिकमित्यदिकम् सर्वमपि रूपकफलसिद्ध्यै हेतुतां भजते इति कारणादशौ निर्वहणसन्धिर्भवति।

अस्मिन् सन्धिः, विबोधः, ग्रथनम्, निर्णयः, परिभवनम्, प्रसादः, आनन्दः, समयः, कृतिः, भाषणम्, पूर्वभावः, उपगूहनम्, काव्यसंहारः, प्रशस्तिः इति चतुर्दशाङ्गानि सम्भवन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

अनेन क्रमेण चतुष्षष्टिसन्ध्यङ्गसहिताः पञ्चनाटकसन्धयः रूपकेषु वस्तुदार्ढ्यसम्पादनार्थं परिकल्पिताः। नाटके एतेषां पञ्चानामपि सन्धीनां नियतोपस्थितिर्भवेत्। इतररूपकप्रभेदेषु तावदेतेषां किञ्चिन्न्यूनतापि सह्यते।

यद्यप्येते नाटकसन्धय इति कथ्यन्ते तथापि महाकाव्यादिश्रव्यप्रबन्धेष्वपि एतेषामुपस्थितिः कल्पनीयेति भामहादयोऽब्रुवन्। यथा –

मन्त्रदूतप्रयाणाजनायकाभ्युदयैश्च यत्।
पञ्चभिः सन्धिभिर्युक्तं नात्व्याख्येयमृद्धिमत्।। [10]
सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। [11]
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। [12]

अनेन परकारेण वस्तुतत्त्वं सारस्वतप्रतिष्ठासम्पादकमिति सर्वेऽपि लाक्षणिकशेखराः व्याजह्रुः। रस-गुण-अलङ्कार-ध्वन्यादय इव महत्त्वपूर्णस्य अतिशयशीलिनः वस्तुनः चयनेनापि काव्यं चिरं स्थिरं यशस्सम्पादयिष्यति।

---

[10] इति भामहोक्तिः 1/20

[11] इति दण्डिनः भणितः

[12] इति विश्वनाथवचनमप्यत्र प्रमाणीक्रियते।

In Public domain. Digitization Muthulakshmi Research Academy

आधुनिकाचार्याणां काव्यप्रयोजनसन्दर्भे मिश्रोऽभिराजराजेन्द्रः

सत्येन्द्रपाण्डेयः

'यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्'[1] इति गौतमीय न्यायसूत्रानुसारं यस्य वस्तुनः प्राप्तिमभिलक्ष्य मानवः यस्मिन्नपि कर्मणि प्रवृत्तो भवति तदेव तत्कार्यस्य प्रयोजनं भवति। प्रयोजनविहीने कर्मणि तु मूर्खस्यापि प्रवृत्तिर्न भवति– 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'। सूक्ष्मतया विचारयामश्चेत् मानवस्य प्रतिकर्मणः किमपि प्रयोजनं भवति। अपि च प्रयोजनाभावे तस्य सार्थक्यमेव किं स्यात्? सत्यमेवाभिधीयते–

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते॥

एवं यदि प्रयोजनविशेषं विना कश्चन मूर्खोऽपि कस्मिंश्चिदपि कर्मणि प्रवृत्तो न भवति तदा त्रिकालं हस्तामलकवत् प्रत्यक्षं कुर्वाणः क्रान्तदर्शी कविः निष्प्रयोजनं काव्यकर्मणि कथं प्रवृत्तो भवेत्? अत एव काव्यस्यापि किमपि प्रयोजनं अवश्यमेव भवितव्यं कामं तत्प्रयोजनं स्थूलं भौतिकं न स्यात्प्रत्युत सूक्ष्ममेव स्यात्।

काव्यप्रयोजनसन्दर्भे भारतीयकाव्यशास्त्रीयपरम्परा अत्यन्तमुदारा आदर्शवादिनी चास्ति। भरतादारभ्य अद्यावधि ये काव्यशास्त्रिणः सन्ति, प्रायस्ते सर्वे यथामतिं यथापरम्परां वा काव्यस्य व्यापकं प्रयोजनं निर्धारयन्ति। एतेषामाचार्याणामुपस्थापितं काव्यप्रयोजनं स्वसूक्ष्मचिन्तननिकषे यथातथ्यं विमृश्य विंशैकविंशशताब्द्योः कवयः काव्यशास्त्रिणश्च प्रयोजनं निर्धारयन्ति। एतैरनुभूतं यदिदानीं गते काले परिवर्तितसमाजे न काव्यरचना पूर्ववत्कश्चिन्निर्धारितमार्गमुद्देश्यं वाश्रित्य भवति। अत एते आचार्याः काव्यप्रयोजनविषयकं मौलिकं सूक्ष्मञ्च चिन्तनं विदधति। काव्यशास्त्रसन्दर्भे आधुनिकपदस्य व्यवहारः प्रायः पण्डितराजोत्तरमारभ्याद्यावधि स्वीक्रियते। परमहमत्र विंशत्येकविंशतिशताब्द्योः जायमानानामाचार्याणामेव तत्रापि आचार्यरेवाप्रसादद्विवेदि–आचार्यराधावल्लभत्रिपाठि–आचार्यब्रह्मानन्दशर्म–आचार्यरहसविहारीद्विवेदि–अभिराजराजेन्द्रमिश्राणामेव चिन्तनमाधारीकृत्य काव्यप्रयोजनं समीक्षे।

---

1 न्या० द०–१/१/२४

In Public domain. Digitization Muthulakshmi Research Academy

आचार्यरेवाप्रसादद्विवेदी कविदृष्ट्या काव्यं निष्प्रयोजनं सप्रयोजनश्चेत्युभयमपि स्वीकरोति। तस्य मन्तव्यं वर्तते यत्कविः सर्वदा सप्रयोजनमेव काव्यं न रचयति प्रत्युत कदाचिन्निष्प्रयोजनं यशादिरहितं स्वभाववशादेव काव्यरचनायां प्रवृत्तो भवति। चटका यथा सर्वदा चणककणावाप्तिरूपप्रयोजनायैव न रौति, अपितु प्रातः काले सः स्वभावादपि रौति। एषणात्रितयविरहितः महर्षिवाल्मीकिः कस्मैचित्स्वप्रयोजनाय न रामायणं रचयामास–

प्रयोजनं कवेः काव्यं नापि किञ्चन दृश्यते।
चुक्कूतौ कलविङ्कस्य यथा प्राभातिके क्षणे।
एषणा त्रितयोत्तीर्णे रामायणमहाकवौ।
आत्माविष्कारनैष्कर्म्यं नैसर्गी किं प्रयोजनम्।।[1]

अथ प्रयोजनदृष्ट्या पूर्ववर्तिकाव्यं पश्यामश्चेन्महाकवीनामनेकानि भिन्न–भिन्न प्रयोजनानि आसन्। यथा रघुवंशे रघूद्भववर्णनेन युगावश्यकतापूर्तिः, कुमारसम्भवे तारकासुरवधेन धर्मरक्षा, गोस्वामितुलसीदासकाव्येन यवनशासनकाले हतोत्साहितहिन्दूजनतानां कृते कर्तव्यावबोधेन उत्साहवर्धनेन राष्ट्रदेवप्रबोधनरूपं प्रयोजनं दृश्यते। आचार्यद्विवेदी कथयति–

युगावश्यकतापूर्त्तिर्मन्त्रव्यक्तिरपि क्वचित्।
प्रयोजनं रघुव्यक्ती रघुवंशे यथा कवेः।।
अधर्मोत्थानवेलायां धर्मरक्षापि दृश्यते।
काव्यार्थस्तुलसीकाव्ये यथा यवनशासने।।
राष्ट्रदेवप्रबोधोऽपि विश्वदैवतसाक्षिकः।
काव्यप्रयोजनं पुंभ्यः पुमर्थांश्चतुरो दुहन्।।[2]

अथाचार्यद्विवेदिनः मन्तव्यं वर्तते यत्कविकृते भवतु नाम काव्यं निष्प्रयोजनं सप्रयोजनं वा परं सामाजिकानां कृते तु सर्वार्थसाधकमेव भवति। असौ काव्यं मातृदुग्धेन उपमाति मातृदुग्धं यथा गुणदोषमपरीक्ष्यमाणमेव स्तनन्धयं शिशुं परिपोषयति तथैव काव्यमपि सहृदयसामाजिकं पुरुषार्थरूपममृतमास्वादयति। सो ब्रूते–

---

1 काव्यालङ्कारकारिका–२४,२५

2 तत्रैव–२२,२३,२४

In Public domain. Digitization Muthulakshmi Research Academy

न स्यात्प्रयोजनं स्याद्वा कवेः, सामाजिकस्य तु।
मातृस्तन्यं यथा काव्यं हन्त सर्वार्थसाधनम्।।[1]

आचार्यब्रह्मानन्दशर्म्माऽपि कविदृष्ट्या काव्यप्रयोजनमनिवार्यं न मनुते। सः कथयति यत् कश्चिदपि विषयविशेषं प्रति कवेः प्रकारद्वयेण प्रवृत्तिर्भवति–स्वाभाविकी, प्रयोजनप्रेरिता च। काव्यरचनायां कवेः प्रवृत्तिः प्रायः स्वाभाविकी एव भवति। स्वाभाविकगत्या प्रस्फुटिता कवितैव उच्चस्तरीया भवति। कुत्रचिदर्थाद्यवाप्तिः कविकृते प्रयोजनं सम्भवं परं न तत्र स्वाभाविकता दृश्यते–

प्रवृत्तिर्वा कवेः सत्ये काव्ये सा परिवर्त्तते।
नात्र प्रयोजनं किञ्चित् स्वभावस्तु प्रवर्त्तते।।
प्रयोजनत्वमर्थादेः सम्भवत्यत्र जातुचित्।
परं यातीह शैथिल्यं प्रवृत्तिः सा स्वभावजा।।[2]

आचार्यराधावल्लभत्रिपाठी स्वीये 'अभिनवकाव्यालङ्कारसूत्रमि'ति ग्रन्थे काव्यस्य प्रयोजनमत्यन्तं परम्परागतं परं विस्तृतभावसमन्वितं प्रतिपादयति। एतन्मते काव्यस्य प्रयोजनं भवति 'मुक्तिः' एतदतिरिक्तं यत्किमपि प्रयोजनं काव्यशास्त्रिणः वदन्ति तेषां समेषामत्र गतार्थता भवति। एते मुक्तिशब्दस्य व्यापकदृष्ट्या विवेचनं कुर्वन्ति। मुक्तिरियं सृष्टेः आध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रिधा वर्तते। भोजन–वस्त्र–भवनाभाव–रूपाधिभौतिकतापान्मुक्तिः प्रथमा। सर्वे नीरोगाः आधिविरहिताः प्रसन्नचेतसः स्युरिति आधिदैविकी मुक्तिः द्वितीया। अथ चात्मनः स्वरूपेऽवस्थानमिति तृतीया मुक्तिः। इयं सहृदयानां कवीनाञ्च सङ्कुचितप्रमातृत्वरूपावरणस्य भङ्गरूपा। काव्य[3]पठनेन नाट्यदर्शनेन वा सहृदयस्य चैतन्यमानन्त्यमुपयाति। अयमानन्त्यानुभव एव मुक्तिः। सः प्रतिपादयति– "मुक्तिस्तस्य प्रयोजनम्। सृष्टेश्चेतनायास्त्रैविध्येन सा त्रिधा त्रिधा। मुक्तिश्चावरणभङ्गः। आवरणं च सङ्कुचितप्रमातृत्वम्।"[4]

---

1 तत्रैव–२६

2 काव्यसत्यालोकः, पृ०–७५

4 अभिनवकाव्यालङ्कारसूत्रम्, पृ०–१५

In Public domain. Digitization Muthulakshmi Research Academy

अयं काव्यस्य निष्प्रयोजनं मन्वानामाचार्याणां विशेषतः रेवाप्रसादद्विवेदराजेन्द्रमिश्रयोः मतं निरस्यति। सः 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त आनन्दं प्रयन्त्यभिसंविशन्त्याह भगवती श्रुतिः'[1] श्रुतिप्रमाणमाश्रित्य प्रतिपादयति यत् स्वभावकर्माणि अपि आनन्दाधिगम जायते। अथ च 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति न्यायेनापि सिद्ध्यति यत्सर्वस्यापि कार्यस्य किमपि प्रयोजनं भवत्येव।

आचार्यरहसविहारीद्विवेदी काव्यस्य प्रयोजनं प्रतिपादयति यत्काव्यं सहृदयान्नसन्मार्गाद्विमुच्य सन्मार्गं प्रेरयति। कवयः कीर्त्यै पुरस्काराय स्वान्तःसुखाय सतां चरित्रं काव्येषु उपनिबध्नन्ति। जनेषु राष्ट्रभक्तिजागरणाय, युगानुकूलमौचित्यस्य विज्ञापनाय, पर्यावरणचेतनावबोधाय, राष्ट्रियस्वतन्त्रतासंग्रामस्य वीरानधिकृत्य अथवा स्वाभीष्टदेवतामभिलक्ष्य आधुनिककवयः काव्यं रचयन्ति–

असन्तं मार्गमुत्सृज्य सन्तं गमयितुं जनम्।
हृदाह्लादिकया वाचा प्रज्ञावान् काव्यमङ्क्ते॥
कविकीर्तिपुरस्कारस्वान्तः सुखससमीहया।
प्राक्कथावसुसंस्कारं सताञ्च चरिताङ्कनम्॥
नव्यकाव्यविधोन्मेषं व्यङ्ग्योक्तिं विकृतौ तथा।
राष्ट्रभक्तिं युगौचित्यं पर्यावरणचेतनाम्।
राष्ट्रस्वातन्त्र्यवीराणां चरितं चाराध्यमीश्वरम्।
समुद्दिश्याधुना काव्यं कुर्वन्ति कवितल्लजाः॥[2]

अभिराजराजेन्द्रमिश्रोऽपि स्वकाव्यप्रयोजनप्रकरणे सर्वेषां प्रमुखाचार्याणां काव्यप्रयोजनमुद्धृत्य समन्वयाचार्यमम्मटकृतेषु षट्कप्रयोजनेषु आपाततः न्यूनतां दर्शयति। एतेषां मन्तव्यमस्ति यत्तदेव काव्यप्रयोजनपदभाग्भवितुं शक्नोति यत्काव्यमात्रेण सिध्येत्। केनचित्काव्यविशेषेणैव सिध्यति चेन्न तत्सकलकाव्यस्य प्रयोजनत्वं वोढुं शक्नोति। उदाहरणतया मम्मटकृतं 'काव्यम् अर्थकृते' इत्येतन्मते काव्यप्रयोजनं न भवितुं शक्नोति। यतोहि धावकादीनां काव्यं भवतु नामार्थावाप्त्यै अभूत् परं न सकलकाव्यमर्थाय विरचितम्। न च सर्वेऽपि कवयः पूर्वं राजाश्रयिणः आसन् नेदानीं सन्ति, अथ च कवेः स्वकीयं किमपि

---

1 तत्रैव, पृ०-१५

2 आधुनिककाव्यशास्त्रसमीक्षणम्, पृ०-४१

In Public domain. Digitization Muthulakshmi Research Academy

गौरवं स्वाभिमानं भवति। न सः लौकिकतुच्छपदार्थहेतोः कस्यचित्पारतन्त्र्यं स्वीकरोति। सः स्वभावतः एव निरीहः भवति। आत्मारामतया जीवन्नसौ न किमपि काङ्क्षति। सन्तुष्टमानसः अयं धनवद्भ्यः न कथमप्यात्मानं न्यूनं मनुते– 'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः'? एवं धनकामनया काव्यं रचयितुः कवेः गौरवं नश्यतीति मिश्रवर्यस्य मन्तव्यम्। शिवेतरक्षतिरिति मन्ये स्तोत्रकाव्येन भवति परं किं सर्वाणि काव्यानि स्तुतिविषयकानि एव भवन्ति। देवस्तुतिविषयकेन स्तोत्रकाव्यनिर्माणेन कस्यचिदेवामङ्गलनाशः सञ्जातः। एतावन्ति महाकाव्यानि–खण्डकाव्यानि–चम्पूकाव्यानि–नाटकानि विरचितानि सन्ति। न सर्वाणि देवताराधनपराणि स्तुतिविषयकानि वा सन्ति। एष्वनेकेषु काव्येषु सामाजिकं चित्रणं भवति। क्षेमेन्द्रः स्व 'कलाविलासे' स्वयुगीनसमाजस्य दुष्प्रवृत्तयः एव वर्णयति। तथैव दामोदरगुप्तः कुट्टनीमते कुट्टन्याः एव चरितमुपस्थापितवान्। अतो स्तुतिविषयकमात्रं काव्यमभिलक्ष्य सकलकाव्यस्य प्रयोजनं 'शिवेतरक्षतिरि'ति स्वीकरणं कथमपि युक्तं न प्रतिभाति। 'सद्यःपरिनिर्वृति'रपि तेषामेव भवति ये सहृदयाः भवन्ति। काव्यसंस्कारविरहितानामसहृदय-जनानामर्थावगतिरेव न भवति। व्यङ्ग्यप्रधानकाव्येषु तु वाच्यार्थावगमेऽपि प्रयोजनप्रतीत्यभावे न काचिदपि चमत्कारानुभूतिर्जायते। किम्पुनः तत्कालमेवानन्दावाप्तेः। सत्यमेव कथयति महाकविः बाणः यत् असहृदयः केवलं मुखेनैव काव्यं पठितुं शक्नोति। न च तस्य तात्पर्यं जानाति। काव्येन 'व्यवहारज्ञानं' भवतीति निश्चितं, परं दीपो यथान्येषामुपकारायैव भवति न त्वात्मनः। तथैव काव्यादपि तद्व्यवहारज्ञानं सहृदयायैव भवति। न तु कवेः। यद्यपि कविरपि पाठकीभूय व्यवहारज्ञानं कर्तुं शक्नोतीति मिश्रवर्यस्य मन्तव्यम्। एवं काव्यरचनायां व्यवहारज्ञानमपि सन्दिग्धमेव प्रयोजनं प्रतिभाति। कान्तासम्मितशैल्यामुपदेशकरणं काव्यस्य यदन्यतमं प्रयोजनं विज्ञापयति मम्मटः तदप्यपेक्षाबुद्ध्यैव वर्तते। वेद–धर्मशास्त्र-दर्शनाद्यपेक्षया काव्यं सरसशैल्यां उपदिशति। परं काव्येष्वपि सन्ति एतादृशानि बहूनि काव्यानि यानि वेदादिवत्प्रभुसम्मितशैल्यामेव विरचितानि। तेषां तात्पर्यावगमे महान् श्रमोऽपेक्षते। यथा भट्टिप्रणीतं 'रावणवधमहाकाव्यम्, हरदत्तसूरिप्रणीतं राघवनैषधीयम्, मेघविजयोपाध्यायप्रणीतं सप्तसन्धानमहाकाव्यम्, नैतानि कथमपि कान्तासम्मितशैल्यां उपदिशन्ति। एवं काव्यनिर्माणदृष्ट्या सार्वकालिकमक्षुण्णं यश एव प्रयोजनं भवितुं शक्नोति।

परमार्थतस्तु यशोऽपि प्रयोजनं न भवति यतोहि स्वाभाविकर्मवशाद्भ्रमरो यथा गुञ्जनमकुर्वाणः नोत्पतितुं शक्तः तथैव काव्यकर्मापि वस्तुतः कवेः जन्मजन्मान्तरीयस्य

In Public domain. Digitization Muthulakshmi Research Academy

दिव्यसंस्कारस्य सत्फलरूपं स्वाभाविकं कर्म भवति। अतो न सः काव्यकर्म विना स्थातुं शक्नोति। अथ च यत्कर्म अस्वाभाविकं भवति तत्कृते वक्तुं शक्यते यत्तस्य किमपि प्रयोजनं स्यात्। परं यत्सर्वथा स्वाभाविकं नैसर्गिकं वर्तते तस्मै प्रयोजनस्य विचारः सर्वथा हास्यास्पदमेव प्रतिभाति। पुनरपि विद्वांसः काव्यस्य किमपि प्रयोजनं स्वीकुर्वन्त्येव तर्हि व्यावहारिकदृष्ट्या यश एव प्रयोजनमुचितं प्रतिभाति मिश्रवर्यस्य। यतोहि काव्येतरं न किमप्येतादृशं कर्म येन लोके परलोके च त्रैकालिकमक्षुण्णं यशोऽवाप्तुं शक्यते। अतस्सः सुस्पष्टतयोल्लिखति यत्कविः न धनाय, न पुण्याय, न व्यवहारपरिज्ञानाय अथ न च सद्यः सुखार्थाय काव्यं निर्माति। प्रत्युत काव्यप्रणयनं तस्य स्वाभाविकं कर्म अत एव सः स्वभाववशादेव काव्यं कुरुते न तु केनाप्यन्येन प्रयोजनेन, पुनरपि यदि पूर्वाचार्याः काव्यस्य किमपि प्रयोजनं कथयन्त्येव, तर्हि मह्यं शाश्वतं यश एव प्रयोजनमुचितं प्रतिभाति–

न धनाय न पुण्याय व्यवहाराय नापि वा।
न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः॥
वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम्।
यदकृत्वा क्षणं यावन्नासौ शमधिगच्छति॥
यथा नोत्पतितुं शक्तो भ्रमरो गुञ्जनादृते।
तथा कविरयं काव्यादृते शक्तो न जीवितुम्॥
काव्यमेतत्ततो मन्ये कविकर्म स्वभावजम्।
जन्मजन्मान्तराऽवाप्तदिव्यसंस्कारसत्फलम्॥
यन्निसर्गाद्बहिर्भूतं तद्भवेत्सप्रयोजनम्।
निसर्गे क्व पुनस्तस्य चर्चाऽनास्थाविवर्धिनी॥
पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।
परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते॥
न च काव्येतरत्कृत्यं किमप्येतादृशं भुवि।
यदत्र परलोके च यशश्शाश्वतमर्जयेत्॥[1]

आनन्दवर्धनाचार्येण यत् 'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्'[1] इत्यभिधाय 'सहृदयाह्लादम्' एव काव्यस्य प्रयोजनं प्रतिपादितम्। तद्वस्तुतः लोकोत्तराख्यानेन

---

1 अभिराजयशोभूषणम्, १/२३–२९

In Public domain. Digitization Muthulakshmi Research Academy

जायते। कवेराह्लादस्तु सहृदयसमाजगतप्रथितयशसैव भवति। एवं व्यवहारदृष्ट्या यशः काव्यस्य प्रयोजनं तिष्ठति पारमार्थिकदृष्ट्या निष्प्रयोजनमेव काव्यं भवति।

मुक्तिस्तस्य प्रयोजनमिति भाषमाणस्य आचार्यराधावल्लभस्य मतं चिन्तनीयं मनुते। सः कथयति यदिदानीं यावद्यानि प्रयोजनानि पूर्वाचार्यैः प्रतिपादितानि तानि सर्वाणि लौकिकानुभूतिपराण्येव सन्ति। चतुर्वर्गे यन्मोक्षसिद्धिः प्रयोजनत्वेन आयाति। तदपि परम्परयैव काव्यात्सिध्यति, न तु साक्षाद्रूपेण। अथ च 'त्रिवर्गसाधनं नाट्य'मित्युक्तवता भरतमुनिनाऽपि धर्मार्थकामाः एव प्रयोजनं प्रतिपादितम्। न तु मोक्षः, अतो मरणानन्तरमनुभूयमाना मुक्तिः कथं काव्यस्य प्रयोजनं भवितुं शक्नोति?

आचार्यरहसविहारीद्विवेदिना यानि प्रयोजनानि प्रतिपादितानि तेषु असन्मार्गात्सन्मार्गेऽभिप्रेरणम्, युगानुकूलम् औचित्यस्योपदेशः, मम्मटस्य 'व्यवहारविदे' एव अन्तर्भवन्ति। अन्यद्राष्ट्रभक्तिः, पर्यावरणचेतनायाः जागरणमित्यादीनि स्वीकरणयोग्यानि सन्ति। रेवाप्रसादद्विवेदोऽपि राष्ट्ररक्षा, युगावश्यकतापूर्तिः, धर्मरक्षा, राष्ट्रदेवप्रबोधादीनि च काव्यप्रयोजनत्वेन स्वीकृत्य मतमिदं समर्थितवान्।

इत्थं मिश्रवर्यः सर्वाणि प्रयोजनानि निराकृत्य यत्केवलं यशोमात्रं प्रयोजनं निर्धारयति। तद्वस्तुतः कविदृष्ट्यैव प्रतिभाति। यद्यपि काव्यानुशीलनेन पाठकानामपि यशश्श्रीः वर्धते। इदानीं निपुणरामायणभागवतकथाप्रवक्तॄणां महत्त्वं के न जानन्ति। अथ च मल्लिनाथसदृशाः काव्यसमीक्षकाः अपि भूयो यशः लभमानाः दृश्यन्ते। तेषां न केवलं यशः प्रत्युत नैकानि प्रयोजनानि सिध्यन्ति। परं तत्तु परम्परयैव भवति। सहृदयानां प्रत्यक्षतया प्रयोजनस्य चर्चां मिश्रवर्यः न कृतवान्। काव्यस्य प्रमुखं प्रयोजनं यश एव वर्तते, इत्यत्र नास्त्याचार्याणां विप्रतिपत्तिः। आनन्दवर्धनोऽपि यशोमाध्यमेन कवेरपि आनन्दावाप्तिरेव भवति इति कृत्वा तस्य आनन्देऽन्तर्भावं स्वीकृत्य न कथमपि तस्य निराकरणमकरोत्। अन्यैरपि पूर्वाचार्यैः कविदृष्ट्या विस्तरेण प्रयोजनानि विज्ञापितानि। धर्मादिचतुर्वर्गमपि एतदन्तर्गतं स्थापयन्ति। कवेः नितान्तं वैयक्तिकं सामाजिकञ्च प्रयोजनं यथा अर्थार्जनं, राजाश्रयः, प्रतिष्ठावाप्तिः, पुरस्कारावाप्तिः, अनिष्टनिवारणम्, इष्टावाप्तिश्च कविप्रयोजनत्वेन परिगण्यते। परमेतानि प्रयोजनानि जीवनकालं यावत्तिष्ठन्ति। कवेः यत्त्रैकालिकमक्षुण्णं परमं प्रयोजनं वर्तते तद्वस्तुतः

---

1 ध्वन्या०-१ उ०, पृ०-२३

In Public domain. Digitization Muthulakshmi Research Academy

यश एव। कालिदास सदृशः महाकविरपि विनयान्वितः सन् यशः एवाभिकाङ्क्षति- 'मन्दः कवियशः प्रार्थी'।[1] आचार्यदण्डी 'यावच्चन्द्रदिवाकरौ' इत्यादिना यशावाप्तेः वार्तां कुरुते। भामहः कथयति यत्सत्काव्यरचयितॄणां कवीनां स्वर्गे गतेऽपि तेषां कमनीयं काव्यरूपं शरीरमक्षुण्णतया तिष्ठत्येव तत्काव्यमाध्यमेनैव सः सहृदयानां चेतसि सानन्दं विराजते। अथ च यावत्तस्याक्षुण्णं यशः पृथिव्यामाकाशे च व्याप्तं भवति तावत्सः पुण्यकर्मा सुकविः दैवपदेधिष्ठितो भवति। अतो भूमण्डलस्य स्थितिं यावत्कीर्तिं वाञ्छता कविना काव्यकृते उपयोगिविषयान्विज्ञाय काव्यरचनायां यत्नः करणीयः।[2] एवं पूर्वाचार्याणां मतेऽपि कविदृष्ट्या यशः एकं प्रमुखं प्रयोजनं तिष्ठति। परं पूर्ववर्तिनः आचार्याः काव्यस्य प्रयोजनं कविसहृदयेत्युभयदृष्ट्या विचारितवन्तः। मम्मटाचार्यः 'कवेः सहृदयस्य करोतीति' कथयन्नुभयात्मकं प्रयोजनं प्रतिपादितवान्। इत्थं मिश्रवर्यस्य प्रयोजननिरूपणं एकाङ्ग्येव प्रतिभाति। सहृदयदृष्ट्या नैकमपि प्रयोजमसौ विज्ञापितवान्। किमर्थं काव्यनिर्माणमिति प्रश्नः यावन्महत्त्वपूर्णः, तद्वदेव किमर्थं काव्यानुशीलनमित्यपि महत्त्वपूर्णम्। अद्यतनीये युगे प्रभूते मनोरञ्जनसाधने, विकसिते सूचनातन्त्रे सति पाठकः किमर्थं काव्याध्ययनाय प्रवृत्ता भवेत्। साम्प्रतं दूरदर्शने वह्वायामिचलचित्रगृहे च जनानामभिरुचिः नितरां वर्धते। तेषां जनानां साहित्यं प्रति परावर्तनं कथं स्यादिति विचारणीयः विषयोऽस्ति। यदा पाठका एव न स्युः तर्हि किमुत्तमोत्तमकाव्यरचनया। अतः पाठकानां प्रयोजनं प्रथमतया ज्ञापनीयम्। ग्रन्थादौ अनुबन्धचतुष्टयप्रतिपादनस्यापीदमेव स्वारस्यं वर्तते। प्रवृत्तिः कथं स्यादिति महत्त्वपूर्णम्। यद्यपि मल्लिनाथसदृशाः काव्यसमीक्षकाः अपि काव्यमाध्यमेन यशः लभन्ते। तथापि सामान्यपाठकानां दृष्ट्या तु प्रयोजनमिदं नैव स्वीकर्तुं शक्यते। यतोहि यशः मनसि कृत्वा न प्रत्युत प्रीत्यर्थमेव काव्यानुशीलने पाठकः प्रवृत्तो भवति।

वस्तुतः विषयेऽस्मिन् वामनमतमधिकमौचित्यपूर्णं प्रतिभाति। कविदृष्ट्या यथा यशः सर्वकाव्यानुस्यूतं काव्यप्रयोजनं वर्तते, तथैव सहृदयदृष्ट्या प्रीतिरपि प्रयोजनत्वेन

---

1 र०वं, १/३

2 उपेयुषामपि दिवं सन्निबन्धविधायिनाम्। आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः।।
रुणद्धि रोदसी चास्य यावत्कीर्त्तिरनश्वरी। तावत्किलायमध्यास्ते सुकृती वैबुधं पदम्।।
अतोऽभिवाञ्छता कीर्त्तिं स्थेयसीमाभुवः स्थितेः। यत्नो विदितवेद्येन विधेयः काव्यलक्षणः ।। तत्रैव, १/६-८

In Public domain. Digitization Muthulakshmi Research Academy

स्वीकरणीयास्ति। मिश्रवर्येण 'सद्यः परनिर्वृत्तिः' निरसता यदुल्लिखितं 'असहृदयः काव्यार्थावगमेऽशक्तो नातिपुष्टविद्यासंस्कारश्च कथं काव्यश्रवणसमकालमेव परिनिर्वृतिमुपगच्छेत्' तन्न समीचीनं प्रतिभाति यतोहि प्रतिकाव्यस्य साहित्यस्य वा एको विशिष्टः पाठकवर्गो भवति। तमधिकृत्यैव कवयः लेखकाश्च काव्यं रचयन्ति। महाकविश्रीहर्षस्य पद्यमिदं किं कथनमिदं न पुष्णाति यत्र सः साटोपमुल्लिखति यत्कृतभूरिपरिश्रमः सज्जनः एवात्र सुखमनुभवितुं शक्नोति, नास्त्यस्मिन् खलखेलनस्य कश्चिदवकाशः–

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञं मन्यमना हठेन पठिती माऽस्मिन्खलः खेलतु।
श्रद्धाराद्ध गुरुश्लथीकृत दृढग्रन्थिः समासादय
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः॥[1]

एवमेव भारविः किरातार्जुनीये प्रायशः प्रकारान्तरेण प्रतिपादयति यत्काव्यमिदमौदार्यगाम्भीर्यगुणसमन्वितं वर्तते।[2] तत्रापि कवेरयमेवाभिप्रायो वर्तते यत्पाठकः उपर्युपर्येव वाच्यार्थं विज्ञाय अग्रे न गच्छेत्प्रत्युत किमपि गभीरतया विचारं कुर्याद्येन मम समग्रस्यापि तात्पर्यस्यावबोधः जायेत।

एवं यदुद्दिश्य यत्काव्यं विरच्यते तत्काव्यं तत्पाठकविशेषाणां कृते प्रीतिकरं भवत्येव। कस्यचिदन्यस्यां भाषायां रचितमुत्कृष्टं साहित्यं भाषान्तरीयाः यदि नावगच्छेयुस्तेनैव किन्तस्य प्रीतिदायकत्वं समाप्तिमधिगच्छति नैव। मिश्रवर्यः काव्यशाखाप्रकरणे स्वत एव पाठकदृष्ट्या काव्यस्य सहृदयास्वाद्यम्, कोविदास्वाद्यम्, लोकास्वाद्यञ्चेति भेदत्रयं कुरुते। निश्चप्रचं यत्कोविदास्वाद्यं काव्यं कोविदामेव प्रीतिकरं स्यादन्येषां कृते तु अर्थावबोध एव श्रमसाध्यो भविष्यति, तथापि न तेन कोविदां कृते तस्यानन्दावाप्तौ काचिद् हानिः। अतः कविदृष्ट्या कीर्तिः पाठकदृष्ट्या प्रीतिश्चेति काव्यप्रयोजनद्वयमुचितं प्रतिभाति।

---

1 नै०च०-२२/१५२

2 १. स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे। किरा०-१/३

२. स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥ तत्रैव-२

In Public domain. Digitization Muthulakshmi Research Academy

आधुनिकसाहित्येऽन्योक्तिविलासः

डॉ. राजकुमारमिश्रः

अस्माकं संस्कृतवाङ्मयं स्वामलनिहितज्ञानविज्ञानरहस्यादिगुणगणमणिमालाभीराजतेतरां, इत्यत्र नास्ति केषाञ्चिद् विपश्चिमानां संशीतिलेशो मनागपि, सर्वेषामुन्मुक्तप्रफुल्लस्वान्तस्वीकारात्। इदं सांस्कृतवाङ्मयं विशेषयत् त्रिलोकेभ्यश्चतुर्लोकायमानं जयतितराम्। जयतितरामित्युक्ते देवानामपि भगवत्कथाया दुर्लभत्वात्सर्वोत्कृष्टेन कविसृष्टिर्वर्तते। क्षोणीवलयेऽस्मिन्ननेकप्रख्यातप्रस्थानानि तत्तत्कालेजकोविदैः स्वसाधनोत्थमहिम्ना समुद्भावितानि। यथा – अलङ्कारप्रस्थानं, रीतिप्रस्थानम्, औचित्यप्रस्थानं, वक्रोक्तिप्रस्थानं, सौन्दर्यप्रस्थानम्, रसप्रस्थानम्, ध्वनिप्रस्थानञ्चेति। सर्वेऽपि सिद्धान्ताः प्रायेण वर्णितचरा एव विशदतया। अलङ्कारप्रस्थानेऽपि विविधबुधानाम् आग्रह आचिरत्नकालाद् अद्य प्रभृतिरपि सुस्थ एव विलोकयितुं सुशकम्। यतो हि त्रिविधेषु ध्वनिप्रपञ्चेषु अलङ्कारध्वनिर्नामात्यन्तं प्रख्यातिमुपगतः, स्वकीयं वैशिष्ट्यमुपस्थापयति। बहुभिराचार्यैर्विविधालङ्कारप्रकारा विवेचिताः येषु अन्योक्त्यलङ्कारोऽपि वर्तते। यथाविध आदरः सहृदयानाम् उपमारूपकोत्प्रेक्षाद्यलङ्कारेषु, तथाविध एवाऽन्योक्तावपि। तथापि मन्येऽन्योक्तिविस्तारणे तदीयमहत्त्वप्रतिपादने च भेदधीर्विदुषाम्। अर्वाचीनोदीयमानविदुषाम् अन्योक्तिसन्दर्भे समधिकं ध्यानं नास्ति कतिपयान् विहाय। हन्त! अन्योक्तिविशिष्टतामुपयोगितामापरीक्ष्य च नव्यास्तु बहुधा कवयन्त्यद्य परञ्च पठित्वाऽपि न भावयन्ति संस्कृतज्ञाः, अयं हि अन्योक्त्यलङ्कारोऽतिमहिमान्वितः। यतोहि स गम्यालङ्कारश्रेण्यामुपतिष्ठते। अतः साम्प्रतम्मयाऽन्योक्तिसन्दर्भ एवं विदुषां पुरतो मनोमोदाय समुपबृंह्यते।

उच्यते इति उक्तिः वचनमित्यर्थः स्त्रियां क्तिन् इत्यनेन भावार्थे क्तिन्प्रत्ययविधानम् उक्तेः अन्यः अन्योक्तिः, राजदन्तादिवत्, आकृतिगणत्वात्। यद्वा अन्यस्य अर्थस्य (भासमानस्य, प्रत्येयस्य) उक्तिः अन्योक्तिः शाकपार्थिवादिवत् समासः।

अन्योक्तिः काव्यशास्त्रस्य सा विधाऽस्ति यस्यां कस्यापि वक्तुः कवेर्वा पाटवं समुन्नतहिमालयायते। अस्यां खल्वन्योक्तौ चपलबुधजनः परोक्षतयाऽभिधेयमभिधातुं ध्यानं विधत्ते। प्रत्यक्षं किमप्यन्यदेवावतिष्ठते तदेव वाच्यार्थोपनिबन्धनं, परन्तु वाच्यार्थोपनिबन्धनमात्रे महाकवित्वलाभो न जायते महाकवीनामिति कृत्वा भवति कथ्यं व्यङ्ग्यरूपं सर्वथैवाऽन्यत्। यच्चाऽन्योक्तिद्वारेणैवाऽवभासते व्यङ्ग्यार्थविलासबलेनैवेति भावः।

In Public domain. Digitization Muthulakshmi Research Academy

लोकमर्यादया यं वा महापुरुषं (कापुरुषधूर्तादिसन्निधानप्रभावान्मार्गभ्रष्टम्) अहङ्कारिणं वान्यथा दुश्चेष्टमानं दुरभिमानिनं पुरुषम् अवबोधयितुम् आवश्यकतां यदा सभ्यो जनोऽनुभवति, तदा साक्षाद्रीत्याऽनवबोध्याऽन्यापदेशविधिना क्वचित्खगकासारसूर्यचन्द्रमृगेन्द्रपुष्पवृक्षादिमिषेण क्वचिच्च पुनः समुद्रहिमालयादिव्याजेन (अत्यन्तमुभयो रूपसाम्यबलेन) यथार्थमवगमयति। यतोहि "वाचामेव प्रसादेन लोकयात्रा प्रवर्तते" इत्थं लोकयात्रायै यदि वाचां प्रसारणम् अत्यावश्यकमेव तर्हि कथन्न जायेत? मधुरवाचां प्रासारः। कथन्न भवेत्?

औचित्यगिरां सुरनदी- जलमिव समुच्छलज्ज्ञानप्रवाहः। आशयोऽयं यत् सज्जनः लोके मर्यादीभूय व्यवहरति। वाक्चातुरी एवं वक्तॄणां सर्वस्वं, कुलाङ्गनानामधराऽमृतपानमिव। आञ्जनेयोऽपि हनुमाँल्लङ्कायां भगवतीं सीतां सादरं, मन्ये वाक्चातुरीमेव समाश्रीयमाणो ब्रूते –

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति।।

कथितमपि आशाधरभट्टेन स्वग्रन्थरत्नत्रिवेणिकायाम् –

शक्तिं भजन्ति सरला लक्षणां चतुराः जनाः।
व्यञ्जनां नर्ममर्मज्ञाः कवयः कमना जनाः।।

कस्यचिदपि वक्तुर्वाक्यकदम्बकं साक्षाद् दुःखदायि न भवेदिति सिद्धान्तं परिपालयन्तः कवयोऽद्यापि निजप्रबन्धे साभिनिवेशमुपनिबध्नन्ति अन्योक्तिनामालङ्कारम्। हनुमान् यदि सीतां संस्कृत एव अवदिष्यत् तर्हि सीता तन्निशम्य अभेष्यत्, रावणोऽयं पुरोवर्तमान इति भिया।

अन्योक्ति प्रपञ्चो हि आवेदाद् आ च कालिदासाद् एकविंशतिशताब्द्याचार्यान्निभिराजराजेन्द्रवल्लभादीन् यावद् अक्षुण्मतया प्रवहमाणो दृयते। मुण्डकोपनिषदि यथा–

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिष्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्न्योऽभिचाकशीति।।

अत्र सर्वमपि परोक्षशैल्यैवोपन्यस्तम्। जीवब्रह्मनिरूपणक्रियमाणे परोक्षशैल्या विहगसंविधानकमिषेण तदेवाभिधेयीकृत्य ऋषिः स्वगतविचारं स्फोरयति। मन्ये एतदेव बीजमादाय सर्वैः कविवरैः समाश्रीयतेऽन्योक्तिसन्दर्भः।

In Public domain. Digitization Muthulakshmi Research Academy

एतस्या अन्योक्तेर्नैकानि अभिधानानि यथा – अन्योक्त्यन्यापदेशाऽप्रस्तुत-प्रशंसाऽप्रस्तुताङ्कुरादीनि। मन्ये वर्णनविधया यथासम्भवं पर्यायोक्तमपि अनुहरति अन्योक्तिरियम्।

पुनश्चैतदेवांशमादाय कविकुलगुरुः कालिदासोऽपि स्वीयाभिज्ञानशाकुन्तले नाट्यरत्ने कवयतीव लोलुपमधुकरमिषेण। यथा –

अभिनवमधुलोलुपो भवांस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर। विस्मृतोऽस्येनां कथम्।।[1]

अत्रान्यराजगतमहिषीसंसर्ग दुष्यन्तविस्मृतिपथमानिता हंसपदिका मधुकरव्याजेन राजानं दुष्यन्तमेव बहुधा उपालभते। आशयोऽयं तस्या हंसपदिकाया यद् राजा दुष्यन्तः कण्वाश्रमतो निवर्त्य अप्रतिमलावण्यकलेवरां शकुन्तलां हृदयीकृत्य किं वा महिषीतरसंसर्गेण स्वयं शून्यहृदयीभूयाऽवतिष्ठतेऽनारतं स्वराजसौधे। पूर्वं हि यः संसर्गः हंसपदिकाया राज्ञा दुष्यन्तेन सह भवति स्म, स एव साम्प्रतं बाधितः।

इत्थञ्च शुकुन्तलाप्राप्त्यनन्तरम् आत्मानं विस्मृतप्रायां विभाव्योपालभते मधुकरसंविधानकं वाच्यार्थीकृत्य हंसपदिका। अथवा हे मधुकर! (हे दुष्यन्त!) अभिनवमधुलोलुपो भवान् (अभिनवनायिकालोलुपो भवान्) चूतमञ्जरीं (मां हंसपदिकां) परिचुम्ब्य (उपभुज्य) कमलवसतिमात्रनिर्वृतः (राजगतमहिषीसंसर्गमात्रस्थितः) एनां चूतमञ्जरीं (सकृत्पूर्वोपभुक्तां हंसपदिकां) कथं विस्मृतोऽसि, इति फलितार्थः।

इह पद्ये हंसपदिका राजमहत्त्वं जानाना प्रत्यक्षं प्राग्घटितवृतान्तं न स्फोरयति दुष्यन्तं प्रति। इत्थं हंसपदिका न केवलं राजमर्यादां परिरक्षति, प्रत्युत स्वस्त्रीसुलभशीलमपि। स्वगतदुःखाग्निं विघान्तरेणैव वर्णयति। हंसपदिकाया वाक्चातुरीं विज्ञाय राजा दुष्यन्तो माढव्यनामानं विदूषकमित्रं सर्वमपि अवबोधयति – "सकृत्कृतप्रणयोऽयं जनः तस्या देवीवसुमतिमन्तरेण मदुपालम्भमवगतोऽस्मि। सखे माढव्य! मद्वचनादुच्यतां हंसपदिका निपुणमुपालब्धोऽस्मि[2]। "

एवं विधांशं पुरःसरीकृत्याऽद्यापि बहवः कवनकलाकलापकुशला रचयन्त्यलम्।

---

1 अभिज्ञानशआकुन्तलम् पञ्चमाङ्क प.स.2

2 अभिज्ञानशाकुलन्तलम् अं.शं.5

In Public domain. Digitization Muthulakshmi Research Academy

अन्योक्तिसन्दर्भे कविकुलगुरुकालिदास इव वङ्गयविस्तारविलसितप्रभः अविरस-प्रवहज्ज्ञानगङ्गोपमो निर्गलत्स्फीतकाव्यपरमार्थप्रसर उत्तमाङ्गसौभाग्यमरकतमुकुटोऽभिराज-राजेन्द्रो वर्णयति। यथा –

ताडय मामतिकामं वदक! हस्तैर्नु दण्डकाघातैः।
तदपि पटहनामाऽहं स्वमधुरवाचं न त्यक्ष्यामि[3] ।।

पद्यस्यास्य वाच्यार्थोऽयं यत् हे वादक! त्वं मां भृशं ताडय। हस्तैस्ताडय उताहो बलवद्दण्डकाघातैस्ताडय। पटहनामाऽहं सदैव सुखदुःखयोः समतां भजे। मे यः स्वभावो वर्तते तस्य परित्यागः कथमपि भवितुं नार्हति। अर्थात् कथमपि स्वकीयां मधुरवाचमहं न विसृजामि। अत्र विचारणीयमिदं यत् पटहनाम अचेतनवस्तुविशेषः। स कथं वा वक्तुं पारयेत्? यतोहि भाषणन्तु चेतनावतां धर्मः। अतो वाच्यार्थमात्रपर्यवसायिनि ज्ञाने न कश्चन चमत्कारः। किमस्य पद्यस्य रचनाप्रसङ्ग एव व्यर्थः? परञ्च महाकविरचनेयम् अवश्यमेव केनापि विशेषहेतुना भाव्यमनेन पद्येन? मुहुर्मुहुरनुसन्धिते रहस्योद्घाटनं भवति पद्यस्य एतस्य। यद्यपि प्रकरणवैशिष्ट्याद् विविधा अर्था अत्र सम्भवन्ति। यथा प्रकरणप्राप्तमहापुरुषसन्दर्भे, कश्चन महापुरुषः केनापि दुर्जनेन पीडितोभूयापि स्वोदारत्वं न जहाति, वदति च हे दुर्जन! त्वं यावदपकारं कर्तुं समीहसे, कुरु परञ्चाहं स्वकीयां लोककल्याणरीतिं न त्यजामि। अत्र वदकशब्दः दुर्जनार्थतया परिणमते। अस्मिन् पद्ये तुष्यतु दुर्जन न्यायोऽपि वर्तते। जीवन्तु मे शत्रुगणाः सदैव येषां प्रसादात्सुविचक्षणोऽहम्। यदा यदा मे विकृतिं लभन्ते तदा तदा मां प्रतिबोधयन्ति इति विचारधारा सर्वथा पालिता दृश्यते पद्येऽस्मिन्।

इदं पद्यं विपरीतसक्षणाया अप्युदाहरणं भवितुं सुशकम्, अत्र सर्वथा जहत्स्वार्था लक्षणाऽपि वर्तते वादकशब्दस्य स्वार्थपरित्यागपुरःसरं दुर्जनार्थपरिवर्तनात्।

अन्योक्तिपरकमन्यदपि उदारहणम् अभिराजस्य यथा –

मलमपनीय समेषामयि कासार! तान्निर्मलीकुरुषे।
दोषस्तदपि तवायं भवसि मलौघो यत्स्वयमेव[4] ।।

अत्रापि कासारसंविधानकेन कस्यचिद् दातुश्चरित्रं वर्णितं कविना। तद् यथा कश्चन दाता दानं कारं कारं दुःखितानां दुःखं हारं हारं साम्प्रतं स्वयं दरिद्र इवाभवत्।

---

3 चर्चरी पृ.सं.139

4 चर्चरी पृ.सं. 139

In Public domain. Digitization Muthulakshmi Research Academy

शुक! मुकलितजिह्वत्वं भज वेलेयं न तु वाक्पटुतायाः।
जर्जरकपाटकोणेऽत्रैव विडाली मूषिकमत्ति[5] ॥

अत्र विडीलीमुषिकमिषेण कविः महापुरुषवृत्तिं वर्णितुमीहते। अर्थाद् दुष्टानां समवायेऽधिकज्ञानप्रदर्शनस्य आवश्यकता नास्ति विदुषाम्। तत्रापमानस्यैव सर्वथा सम्भवात्, मौनं साध्यं विद्वद्भिरित्यर्थः।

अस्माकं जीवने कदाचिद् भीषणादपि भीषणतरं दुःखमागच्छति, एकस्मादेव दुःखाद् यावद् वयं रक्षितुमात्मानं प्रयतामहे तावदेव दुःखान्तरमपि आपतति। तर्हि विपदद्भूतपरम्परां वर्णयति आचार्यराधावल्लभस्त्रिपाठी। यथा –

बर्हीं बर्हिजिधृक्षुहिंस्त्रवणिजस्त्रातुं स्वजीवं दरा
दूर्ध्वोर्ध्वं डयते द्रुतं कथमपि प्राणान् पणीकृत्य सः।
नो जानाति च यत्र याति शिखरे वृक्षस्य यस्योन्नते
निःशङ्कं किल तत्र मांसनिरता गृध्राः स्थिता गृध्नवः[6] ॥

अत्र प्राक् दुष्टवणिक्सङ्कटापन्नस्य भुजङ्गभुजो विषमविषमावस्थां सम्यक् चित्रयत्याचार्यराधावल्लभस्त्रिपाठी। एकस्मात् स मयूरो यावदेव सुरक्षीभूयाऽयत्र उड्डयते, हन्त! तत्र तस्मादपि स्थलादधिकां विपत्तिं प्राप्नोति। निश्चितमेव त्रिपाठिवर्याणां पद्यमिदं भतृहरिपाणिपल्लवप्रणीतं श्लोकं प्रायो गच्छति यत्र भाग्यरहितः तत्रैव यान्त्यापदः।

सम्यक् सहजतया स्मारयति। कविवर्णनविन्यासविशिष्यविधया चतुरतया। इदं पद्यं मन्ये भर्तृहरितोऽपि विशिष्यते।

पुनश्च प्रणवोपनामा डॉ.इच्छारामद्विवेदोऽपि बन्धकश्रमिणां दैन्यं मुखरयति द्विचक्रिकाप्रतीकेन। यथा –

पादैर्मां परिचाल्य कर्णयुगलं मुष्ट्या गृहीत्वा दृढं
पृष्ठे भारकरं नितम्बयुगलं न्यस्य व्रजन्त्यत्र ये।
ते पुण्या लघुसम्पदैव भुवने मां क्रीतवन्तो जनाः
क्रीतानामिह वर्तते भुवि दशा दुःखाधिका मादृशाम्[7] ॥

---

5 चर्चरी पृ.सं. 139

6 अन्योक्तिपञ्चकं, दूर्वा पृ.सं 44 अङ्क 19

7 अन्योक्तयः दूर्वा पृ.सं 24 अङ्क 18।

In Public domain. Digitization Muthulakshmi Research Academy

पुनश्चाधुनिकाचार्यप्रतिष्ठितक्रमः डॉ.जनार्दनो मणिरपि सम्यग्विशदयति अन्योक्तिं स्वन्योक्तिमालिकायाम्। यथा –

गर्जसि वृथा मृगेन्द्र! त्वत्रान्ते,चकास्ति यदि करिश्रेणी।
निहता परिचयगाथा ते जीवसि किं प्रियस्य त्वम्[8] ।।

अत्र मृगेन्द्रप्रतीकेन कवी राजानं महापुरुषं वा सन्दिशति यत् त्वयि स्थितोऽपि ते अनुचराः शठसहाया स्वयमेव नृपायन्ते अतस्ते जीवनं धिक्। ते स्वाभिमानगाथाऽपि मन्ये हतप्रायैव। आशयोऽयं यत्त्वं स्वमहन्महत्त्वं स्वशक्तिं परिचिनु, ते गौरवगाथा वंशपरम्पराप्रभावाद् अत्यन्तं हिमालयीभूता, दुष्टसंसर्गत आत्मानं सर्वथा पृथक् कुरु।

पुनश्च सुखदुःखयोर्द्वयोरेव स्थित्योः प्रत्येकं जनस्याभ्यासः स्यात्। सुखं भुञ्जानः सर्वदा सुखमेव प्राप्नुयादिति प्रकृतिनियमो नास्ति कश्चित् (सुखदुःखं मनुष्याणां चक्रवत् परिवर्तते इति नयेन) मन्ये इदमेवाभिप्रैति कविमणिर्जनार्दनः –

गुञ्जसि कमलवनेऽस्मिन् मधुप! त्वं मञ्जु नित्यमिह जाने।
शुष्के सरसि सरसिजे त्वद्वाचां का कथा भविता[9] ।।

आरक्षणकालेऽस्मिन् आरक्षणसुरभिं प्राप्तुकामो लब्धोच्चकुलजन्माऽपि स्वजातिं परिवर्तते। मन्ये चन्दनप्रतीकेन एतदेव वर्णयति –

चन्दन! सुरभिरिदानीं ते स्मयते कुलाङ्गनानां वक्षसि।
एते सन्तः सन्तो भवन्त्यसन्तो नु लब्धुं त्वाम् ।।[10]

इत्थं विविधसन्दर्भपरोक्षप्रकाशिनी अन्योक्तिरियं विदुषां वाग्विलाससाधनभूता, द्राक्षान्तारस इव उपरितोऽल्पचमत्कारजनिका, किन्तु चर्वणेन मधुरमधुरा विशिष्टरहस्योद्बोधिका न ब्रूयात्सत्यमप्रियमिति सिद्धान्तमपि न्यक्कुर्वाणा कविप्रवाहे अत्यन्तं प्रख्यातिमुपगतेति शम्।

---

8 अन्योक्तिमालिका प.सं 3
9 अन्योक्तिमालिका प.सं 7
10 अन्योक्तिमालिका प.सं. 12

In Public domain. Digitization Muthulakshmi Research Academy

पुराणदृष्ट्या ग्रहाणां गतिविचारः

डा. भूपेन्द्रनारायण झा

यथाऽधुनाज्योतिषशास्त्रे ग्रहाणां गतिविषये मान्यता विद्यते न तथा पुराणेषु बहुषु समवलोक्यते। पौराणिकग्रहगतिकल्पना तु विचित्रा। तत्र कक्षापरिकल्पना च विचित्रैव। पुराणेषु ग्रहाणां रथस्य तद्वाजिनः, गतेश्च वर्णनं समवलोक्यते।

चन्द्रस्यगतिविचारः

सोमस्य त्रिचक्रयुक्तोरथः तत्र कुन्दाभा दशवाजिनो वामदक्षिणतो युक्ताः सन्ति। तेनासौ ध्रुवाधारेण वेगिना वीथ्याश्रयाणि नक्षत्राणि चरन्ति। तत्र रश्मिनां ह्रासवृद्धिक्रमः सूर्य इवास्ति। तस्याश्वाः सूर्य इव सकृद्युक्ता कल्पमेकं वहन्ति।[1]

बुधस्यगतिः

चन्द्रसुतस्य वाय्वग्निद्रव्यसमुत्पन्नो रथो विद्यते। तत्र वायुवेगिनः पिशंगवर्णा अष्टश्वाः संयुक्ताः सन्ति।[2]

शुक्रस्यगतिः

वरुथानुकर्षोपासङ्गपताकापृथवीभिः समुत्पन्नेरश्वैः सहितः शुक्रस्य महान् रथो विद्यते।[3]

मङ्गलस्यगतिः

अतिशोभाशाली, सुवर्णनिर्मितोऽग्निसमुत्पन्नः, पद्मरागमणिसमः, अरुणवर्णः, अष्टाश्वैर्युक्तो मङ्गलस्य महान् रथो विद्यते।[4]

गुरोः गतिः

अष्टपाण्डुरवर्णयुक्तः सुवर्णरथस्तस्मिन् प्रत्यक् वर्षान्तगुरुः प्रत्येकराशौ गच्छति। इत्यनेनाधुनिकगतिज्ञानं जायते। द्वादशमाससमैः दिनैः एकराशिभोगस्तदैकदिने किमिति तन्मध्यमगति मानं स्यात्।[5]

---

1 विष्णुपुराणम् –2,12, 1–3

2 विष्णुपुराणम् – 2, 12, 16

3 विष्णुपुराणम् – 2, 12, 17

4 विष्णुपुराणम् – 2, 12, 18

5 विष्णुपुराणम् – 2, 12, 19

In Public domain. Digitization Muthulakshmi Research Academy

शनेः गतिः

आकाशसमुत्पन्नैः विचित्रवर्णैः घोटकैर्युक्ते स्यन्दने स्थितः शनैश्चरः शनैः शनैः गच्छति। इत्यनेन शनेर्मन्दगतित्वं सूचयति।[6]

राहोः गतिः

राहोः रथः धूसरो विद्यते। तत्र भृङ्गामा अष्टौ तुरगा योजिताः सन्ति। ते च सततं कल्पं यावद्गच्छति। राहुः पूर्णिमायां सूर्यान्निसृत्य चन्द्रं गच्छति, अमायां चन्द्रन्निसृत्य सूर्य गच्छति।[7]

केतोः गतिः

केतुरथस्य वातरंहसोऽष्टौ अश्वाः सन्ति ये पालालधूर्मवर्णाभा एवं लाक्षारसनिभारुणाश्च सन्ति। विष्णुपुराणोद्धृतग्रहगतिसम्बन्धवचोभिरेभिर्ज्ञायिते यत् तस्मिन् काले ग्रहगतिसम्बद्धनियमानां सम्यग् विकासो नासीत्। तदानीं ग्रहाणां गतिरस्ति इति ज्ञातमासीत्। परं मध्यमस्फुटग्रहयोरन्तररूपफलस्य ज्ञानं तदा नासीदिति प्रतीयते।[8] वीथ्याग्रया विचरते नक्षत्राणि यथाशशी। मध्यगश्चामरावत्यां यदा भवति भास्करः। वैवस्वते संयमने उत्तिष्ठन्दृश्यते तदा इत्यादि भविष्यपुराणस्य ब्राह्मपर्वीय 53 अध्यायोक्तविचारेणापि आधुनिक–गतिविचारतः पूर्णरूपेण सामञ्जस्यं नैव दृश्यते।

अग्निपुराणे ज्योतिषशास्त्रसम्वलितो विचारकलापो विद्यते परं न तत्र सिद्धान्त–सम्बद्धविषयप्राचुर्यम्। वस्तुतः ज्योतिषसंहिताग्रन्थे इव अग्निपुराणस्य महत्त्वमस्ति। संहिताग्रन्थेऽपि ग्रहस्य राशिनक्षत्रस्थितिवशेन फलादेशस्तज्ज्ञानं तु ग्रहगत्यादेर्ज्ञानं विना न भवितुमर्हति। अन्यपुराणवदत्रापि कक्षायां वर्णनं कृतम्। ग्रहगत्यादेः विचारश्चात्र सम्यगासीत्। गरुडपुराणे ज्यौतिषशास्त्रसम्बद्धविषयाणां फलितविभागानां वर्णनं सम्यक्तया कृतमस्ति। तत्र ग्रहनक्षत्रादीनां सम्यक्ज्ञानं दरीदृश्यते। ग्रहाणां शुभाशुभस्थानादेः समवलोकनाज्ज्ञायते, तस्मिन् ज्योतिषशास्त्रस्य पूर्णरूपेणविकासः समजनि, कथमन्यथा एतादृशविचारस्यावसरो जातः तत्तु

हस्तोऽर्कश्च गुरुः पुष्ये अनूराधा बुधे शुभा। रोहिणी च शनौ श्रेष्ठा सोमं सोमेन वै शुभम्।।
शुक्रे च रेवती श्रेष्ठा अश्विनी मङ्गले शुभा। एतेषु सिद्धयोगा वै सर्वदोष विनाशनाः ।।[9]

---

6 विष्णुपुराणम् – 2, 12, 20

7 विष्णुपुराणम् – 2, 12, 21–22

8 विष्णुपुराणम् – 2, 12, 23

9 गा.पु. – 60, 44–45

In Public domain. Digitization Muthulakshmi Research Academy

कथं ग्रहगत्यादेः सम्यक्ज्ञानं विना सूर्यस्य हस्ते, गुरोः पुष्ये, बुधस्य अनूराधायामित्यादेः सम्यक्सूक्ष्मञ्च ज्ञानं भवेत्? अतो स्फुटमनुमीयते यत् तस्मिन् काले ग्रहगत्यादेः सम्यक्ज्ञानं समासीत्। महाभारतेऽपि विभिन्नसामयिकप्रसङ्गवशाद्ग्रहगतेरनुमानं क्रियते। युद्धसमये शिष्टाचारप्रतिवेदनाय समागतवन्तं कृष्णं कर्णः कथयति।

प्रजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः। शनैश्चरः पीडियति पीडयन् प्राणिनोऽधिकम्॥
कृत्वा चाङ्गरको वक्रं ज्येष्ठायां मधुसूदन। अनूराधां प्रार्थयते मैत्रं सङ्गमयन्निव॥
विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः। सोमस्य लक्षम व्यावृतं राहुरर्कमुपैति च॥[10]

एतच्छ्लोकपर्यालोचनया ज्ञायते यत् तस्मिन्नाकाशावलोकनतः कदा को ग्रहः कुत्र तिष्ठतीत्यस्य ज्ञानं समासीत्। तथाऽऽकाशेऽश्विन्यादिनक्षत्राणां स्थितेरपि ज्ञानमासीत्।

कथमन्यथा वक्रं भूत्वा कुजो ज्येष्ठायां तिष्ठति। शनैश्चरः प्रजापत्यं पीडयतीत्यस्य ज्ञानं भवेत्। एवं व्यासो युद्धात्पूर्वं धृतराष्ट्रं कथयति।

श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति। धूमकेतुर्महाघोरः पुष्यं चाक्रम्य तिष्ठति॥
मघास्वङ्गारको चक्रः श्रवणे च बृहस्पतिः। भगं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते॥
शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विरोचते। रोहिणीं पीड्यत्येवमुभौ च शशिभास्करौ।
चित्रास्वात्यन्तरे चैव विष्ठितः परुषोग्रहः। वक्रानुवक्रं कृत्वा च श्रवणं पावकं प्रभः।
ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः। संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ॥
विशाखायाः समीपस्थौ बृहस्पतिशनैश्चरौ।[11]

एतत्सर्वं व्यासेनानिष्टफलसूचनार्थं कथितम्। परं तत्रत्य ग्रहाणां स्थितेः समवलोकनात् स्फुटं विज्ञायते यद्ग्रहगतेर्ज्ञानमन्तरा श्वेतग्रहस्य केतोः चित्रासमतिक्रमणं धूमकेतोः पुष्यातिक्रमणं, मघायां कुजस्य वक्रीभवनं बृहस्पतेः श्रवणे स्थितिरित्यादीनां ज्ञानं कथं स्यात्।

वक्रगतिः

पुराणेषु महाभारते च गतेः सूक्ष्मनिरीक्षणं समभूत्। तत्र मध्यमस्फुटवक्रगतीनां विषये प्रभूतविचारः समजनि। स्फुटमध्यमगतिविचारमन्तराऽधिमासक्षयमासयोर्ज्ञानं न भवितुमर्हति। वक्रगतिविषयेऽधोलिखितानि प्रमाणानि दृश्यन्ते।

---

10 म.भा.उ.प. 143, 8-10

11 महाभारत भीष्म 3, 12-27

In Public domain. Digitization Muthulakshmi Research Academy

लोकत्रासकरावास्तां (द्रोण्यर्जुनौ) विमार्गस्थौ ग्रहाविवै एवं च[12]

प्रत्यगत्यात्पुनर्जिष्णुर्जघ्ने सं सप्तकान् बहून्। वक्रातिवक्रगमनादङ्गारक इव ग्रहः।

त्रेताद्वापरयोः सन्धौ तदा दैवविधिक्रमात्। नववर्ष सहस्राक्षः प्रतिलोमोऽभवद् गुरुः।।

ग्रहयुतिः

ग्रहयुतिविषयेऽपि पुराणे सम्यक्विचारो जातः। येनग्रहयोः सापेक्ष्यगतेर्ज्ञानस्योद्घाटनं भवति। शीघ्रमन्दगतिवतोर्ग्रहयोः कदा कुत्र संयोगो भविष्यतीत्यस्य ज्ञानं तत्कालीन-ग्रहगतिज्ञानस्य महत्त्वं स्थापयति। तद्यथा –

ततः सम्भवद्युद्धं शुक्राङ्गिरसवर्चसोः (द्रोण्यर्जुनयोः) नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव।। [13]

एवं च भृगुसूनुधरापुत्रो शशिजेन समन्वितो। आभ्यां ग्रहयोः ग्रहाणां संयुति विषये प्रभूतप्रमाणं लभ्यते।

महाभारते ग्रहाणां गतिर्ज्ञानं सम्यकृतयाऽऽसीदित्यत्र तत्रोक्त प्रमाणं यथा

क्षयं संवत्सराणांच मासानां च क्षयं तथा। पक्षक्षयं तथा दृष्ट्वा दिवसानाञ्च संक्षयम्।।

अत्र संवत्सर, मास, पक्ष, दिवसानां क्षयनाम् समागतः। एतदवलोकनाज्ज्ञायते यद् ग्रहाणां गतेः सम्यग्ज्ञानाऽभावात् कथं संवत्सरक्षयः पक्षक्षयः, मासक्षयः, दिनक्षयश्च भवितुमर्हीति। यदि मासक्षयः, पक्षक्षयः, दिवसक्षयश्चाद्यसदृशस्तथा सूर्यचन्द्रयोः फलसंस्कारस्तयोः स्पष्टागतिश्चाद्यसदृशी आसीदित्यनुमीयते।

पुराणेषु युगादिपरिकल्पनाः

महाभारते युगानां नाम मनुस्मृत्यादिग्रन्थवत् विलसति। कल्पकालस्य निरूपणं शान्तिपर्वणः 186 तमाध्याये विस्तारेण कृतम्। पञ्चवर्षात्मकयुगकथनं तत्र विद्यते। संवत्सरपरिवत्सरेदावत्सरानुवत्सरेद्वत्सरेतिपञ्चयुगसंवत्सराः सन्ति। तत्रैव क्रमशः पाण्डवानां समुत्पत्तिरिति कथ्यते।

तद्यथा – महाभारते पुराणे

अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः। पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव।। अथ

---

[12] म.भा.क.पर्व 18,2

[13] म.भा.क.म. 18,1

In Public domain. Digitization Muthulakshmi Research Academy

वेदाङ्गज्योतिषे तथा महाभारते युगानां परिगणना अधोलिखितैः गर्गवचनैः ज्ञातुं शक्यते। उक्तञ्च

अयनान्यृतवो मासाः पक्षास्त्वृक्षं तिथिर्दिनम्। तत्त्वतोनाधिगम्यन्ते यदाब्दो नाधिगम्यते।।
यदा तु तत्त्वतोऽब्दस्य क्रियतेऽधिगमो बुधैः। तदैवैषाममोहः स्यात्क्रियाणाञ्चापि सर्वशः।।
तस्मात् संवत्सराणान्तु पञ्चानां लक्षणानि च। कर्माणि च पृथक्त्वेन दैवतानि च वक्ष्यति।।
यदा माघस्य शुक्लस्य प्रतिपद्युत्तरायणम्। सहोदयं श्रविष्ठाभिः सौमार्कौ प्रतिपद्यतः।
तदात्र नभसः शुक्लसप्तम्यां दक्षिणानम्। सर्पार्द्धे कुरुते युक्तिं चित्रायां च निशाकरे।।
प्रथमः सोऽग्निदैवत्यो नाम्ना संवत्सरः स्मृतः। यदामाघस्य शुक्लस्य त्रयोदश्यामुदग्रविः।।
युक्ते चन्द्रमसा रौद्रे वासवं प्रतिपद्यये। चतुर्थ्यां नभसः कृष्णे तदार्कौ दक्षिणायनम्।।
सार्पार्धे कुरुते सूर्यस्त्वज युक्ते निशाकरे। द्वितीयश्चार्कदैवत्यः स नाम्ना परिवत्सरः।।
कृष्णे माघस्य दशमीं वालवादौ दिवाकरः। उदीचीं दिशमातिष्ठन् मैत्रस्थेऽनुष्णतेजसि।।
नभसश्च निवर्तेत शुक्लस्य प्रथमे तिथौ। चन्द्रार्काभ्यां सुयुक्ताभ्यां सार्पार्धे वायुदैवतम्।।
तदा तृतीयञ्च तं प्राहुरिदा संवत्सरं जनः। सप्तम्यां माघशुक्लस्य वासवादौ दिवाकरः।।
व्रजेद्याभ्यां शुक्लस्य श्रावणस्य त्रयोदशीम्। चतुर्थमिन्दुदैवत्यमाहुश्चाथानुवत्सरम्।।
फल्गुणीमुत्तरां प्राप्ते सोमे सूर्ये च वासवे। यद्युत्तरायणं कृष्णचतुर्थ्यां तपसो भवेत्।।
श्रावणस्य च कृष्णस्य सार्पार्धे दशमीं पुनः। रोहिणी सहिते सोमे रवेः स्याद्दक्षिणायनम्।।
इद्वत्सरः स विज्ञेयः पञ्चमो मृत्युदैवतः। एवमेताद्विजानीयात् पञ्चवर्षस्य लक्षणम्।। [14]

एभिः श्लोकैर्यथा निष्पन्नोऽर्थो जायते तदधोलिखितकोष्ठके लिख्यते अथवा ऋग्वेदज्योतिषोद्धृताभ्यामधोलिखिताभ्यां वचनाभ्यां ज्ञातुं शक्यते। तद्यथा –

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्। दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।[15]
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्। कालज्ञानं प्रवक्ष्यामि लग्नस्य महात्मनः।। [16]

क्रमाङ्कः	संवत्सर		उत्तरायणारम्भः			दक्षिणायनारम्भः	
		तिथिः	सूर्यनक्षत्रम्	चन्द्रनक्षत्रम्	तिथिः	सू.नक्षत्रम्	च. नक्षत्र
1.	संवत्सरः	माघ शु.1	धनिष्ठा	धनिष्ठा	श्रा.शु.7	आश्लेषार्धः	चित्रा

---

[14] भारतीयज्योतिष दि. – 101

[15] ऋग् ज्योतिष – 1–2

[16] भारतीय ज्योतिष दि. – 103

In Public domain. Digitization Muthulakshmi Research Academy

2.	परिवत्सरः	माघ शु.13	धनिष्ठा	आर्द्रा	श्रा.कृ.4	आश्लेषार्थः	पूर्वभाद्र
3.	इदावत्सरः	माघ कृ.10	धनिष्ठा	अनूराधा	श्रा.शु.1	आश्लेषार्थः	आश्लेषा
4.	अनुवत्सरः	माघ शु.7	धनिष्ठा	अश्विनी	श्रा.शु.13	आश्लेषार्थः	पूर्वाषाढ
5.	इद्वत्सरः	माघ कृ.4	धनिष्ठा	पूर्वफल्गुणी	श्रा.कृ.10	आश्लेषार्थः	रोहिणी

एतदनन्तरं स्मृति-पुराण-सिद्धान्त-ज्योतिषग्रन्थेषु कल्प-युगादीनां परिकल्पना समानैव वरीवर्ति। तत्र प्रथमं मनुस्मृतौ या परिकल्पना कृता साऽधोलिख्यते।[17]

	युगानि	वर्षाणि		
कृतयुगम्	सन्ध्या	400	द्वापरयुगम्	सन्ध्या – 200
	मुख्यभागः	400		मुख्यभागः – 2000
	सन्ध्यांशः	400		सन्ध्यांशु – 200
त्रेतायुगम्	सन्ध्याः	300	कलियुगम्	सन्ध्याः – 100
	मुख्यभागः	3000		मुख्यभागः 1000
	सन्ध्यांशः	300		सन्ध्यांशः – 100

सर्वेषां योगसमं चतुर्युगमानं 12000 तद्दैवयुगं कथ्यते। 1000 सहस्त्रदैव युगानां ब्रह्मदिनम्। अत्र 12000 वर्षाणां एकं दैवयुगं स्वीकृतम्। तद्देवमानेन मानुष्यमानेन वेत्ति न प्रदर्शितम्। वर्देसेनेयं पद्धतिः न स्वीकृता, तन्नोचितं, वेदकालत् एव देवानां वर्षे मनुष्यस्य 360 वर्षैः समानमिति, एकं व एतद्देवानामहः।[18] यत्संवत्सरः इति तैत्तरीय संहितोक्तत्वात्।

अतो यदि-दैववर्षम् 360 मनुष्यवर्षेणसमं तदा 12000 दैववर्षाणि 4320000 मनुष्यवर्षे समानिस्युः[19] एवमनुपाततः सर्वेषां युगानां सन्ध्यांशयोस्तन्मुख्यभागस्य च मानानि ज्ञातुं शक्यन्ते। एतदनन्तरं पुराणेषु सिद्धान्त ज्योतिष-ग्रन्थेषु च कल्पादेः कल्पना तदनुसारं जाता।

17 मनुस्मृति -1, 68-89

18 व्र.सु.अनु - 10

19 नारदपुराण 54, 66-69

In Public domain. Digitization Muthulakshmi Research Academy

धातुसम्बन्धे प्रत्ययाः[1]

डा.दत्तात्रेय शर्मा

धात्वर्थयोः प्रत्ययार्थद्वारकविशेष्यविशेषणभावरूपसम्बन्धे कालान्तरविहितानां प्रत्ययानाम् अन्यस्मिन् काले साधुत्वबोधनार्थमिदं सूत्रम्।

यथा – 'वसन् ददर्श' इत्यत्र वर्तमानकाले विहितस्य लटः अनेन भूतकाले साधुत्वं ,यथा वा 'गोमानासीत्' इत्यत्र "तदस्यास्त्यस्मिन्निति मतुप्"[2] इति सूत्रेण अस्तीति वर्तमनकाले विहितस्य मतुपः अनेन भूतकाले साधुत्वमुच्यते, अतीतवासकर्तृकर्तृकं दर्शनम्, अतीतसत्ताकगोमत्कर्तृका अतीता सत्तेतिबोधः, एवञ्च वसन्नित्यत्र शतुः गोमानित्यत्र मतुपश्च धातूपस्थात्यक्रियासम्बन्धनैयत्येन तत्रान्वय एव साधुत्वम्।

धातुशब्दस्य धात्वर्थपरत्वम् –

अत्र धातुशब्दः लक्षणया धात्वर्थं बोधयति, धत्वोः सम्बन्धस्तु नोपपद्यते, यद्यपि "धातोः कर्मणः समानकर्तृकादिच्छायां वा"[3] इति सन्विधायकसूत्रे इषिकर्मत्वम्, इषिणा समानकर्तृकत्वञ्च धातोर्विशेषणमपेक्षितं, तच्च अर्थद्वारैव सम्पद्यते, अन्यथा धातुना समानकर्तृकत्वं धत्वन्तरस्य न घटते। अर्थद्वारा तु द्वयोर्धात्वोः सम्बन्धो घटते। इषिधात्वर्थे यः कर्ता स एव पठधात्वर्थेऽपि कर्तेति पठधातोः सन्त्प्रत्ययः सिध्यति। तथा इहापि अर्थद्वारा धात्वोः सम्बन्धः ग्रहीत्व्यः इति वक्तुं शक्यते। परन्तु तथा गृह्यमाणे धातुसम्बन्धे इत्यस्य परस्परसम्बद्धार्थबोधकधातुप्रयोगे इत्यर्थः आपद्यते। तथा च यत्रानेकधातुप्रयोगो वर्तते तत्रैव एतत्सूत्रविहिताः प्रत्ययाः भवन्तीति वक्तव्यं स्यात्, ततश्च गोमानासीत् 'गोमान् भविता' इत्यादौ अनेकधातुप्रयोगाभावेन प्रकृतसूत्रं तत्र न प्रवर्तेत, अप्रवृत्तौ हि 'गोमानिति' मतुपः भूतादौ असाधुत्वमापद्यते। तस्मात् धातुपदस्य लक्षणया धात्वर्थपरत्वं स्वीकार्यम्। तथा सति

---

1 अष्टाध्यायी 3-4-1

2 अष्टाध्यायी 5-2-94

3 अष्टाध्यायी 3.1.7

In Public domain. Digitization Muthulakshmi Research Academy

'गोमानित्यत्र' अस्धातोरप्रयोगेपि तदर्थस्य विद्यमानत्वेन तत्रापि प्रकृतसूत्रप्रवृत्या भूतभविष्यतोऽपि कालयोः मतुप् साधुर्भवति।

कालान्तरे प्रत्ययानां साधुत्वोपपादनम् –

अत्र पूर्वपक्षः

अनेन सूत्रेण कालान्तरे प्रत्ययानां साधुत्वमित्यर्थः कथं वा लभ्यते? यत्र अप्राप्ताः प्रत्ययाः तत्राप्येतत्सूत्रेण प्राप्यन्ते इत्युच्यते तर्हि उपपदोपाधिप्रकृतिप्रत्ययार्थानां साङ्कर्येण सर्वोपप्लावापत्तिः खलु इति।

समाधानम्

स्वस्वविषयेषु प्रत्ययविधायकत्वं तत्तत् विधिवाक्यानामेव। यथा "वर्तमाने लट्"[4] इत्यनेनैव लट् भवति। "परोक्षे लिट्"[5] इत्यनेनैव लिट् भवतीत्येवं रीत्या, परन्तु कालमात्रमनेन बाध्यते, अन्यत्तु न किञ्चिदपि बाध्यते। अल्पबाधेनैवोपपत्या बहुबाधो अन्याय्यः खलु। तर्हि किञ्चिद्बाधनस्य नान्तरीयकत्वे काल एव बाध्यः, न तु यत्किञ्चिदपीत्यत्र किं विनिगमकमिति चेत्, प्रायदर्शनमेव। किञ्च "वर्तमानसामीत्ये वर्तमानवद्वा"[6] इत्यारभ्य प्रायः कालान्यत्वप्रतिपादनमेव दृश्यत इति तदेवात्र विनिगमकम्।

एवञ्चानेन सूत्रेण प्रयोगे श्रूयमाणानां प्रत्ययानां कालान्तरे विधानं क्रियते। ततश्च 'वसन् ददर्श' इत्यत्र वसन्निति शतृप्रत्ययस्य भूतकाले साधुत्वे बोधिते अर्थापत्या तदर्थको लडपि कल्प्यते। 'गोमानासी' दित्यत्र मतुपः भविष्यति साधुत्वञ्च बोध्यते।

---

4 अष्टाध्यायी 3-1-123

5 अष्टाध्यायी 3-1-115

6 अष्टाध्यायी 3-3-131

In Public domain. Digitization Muthulakshmi Research Academy

तिङ्न्तानुरोधेनैव कालबाधः –

अत्र संशयः

'वसन् ददर्श' 'वनानि पश्यन् ययौ' इत्यादि प्रयोगेषु दर्शनादीनाम् अतीतानामपि लडादिभिः सम्बन्धो दृश्यते, तं च सम्बन्धं कालबाधेऽपि समर्थयितुमिदं सूत्रम्। ततश्चात्र 'वसन्' 'पश्यन्' इत्यादि लडर्थवर्तमानकालस्यैव बाधः कुतः, 'ददर्श' 'ययौ' इति लिडर्थभूतकालस्यैव बाधः कुतो न स्यादिति।

समाधानम् –

वाक्ये तिङन्तवाच्यायाः क्रियायाः प्राधान्यम्। कृदन्तोपस्थाप्ययास्तु तस्याः गुणभूतत्वम्। तत्र प्रधआनानुरोधेन गुणस्य नयनं युक्तम्, न तु गुणानुरोधेन प्रधानस्य। न हि उष्णीषानुरोधेन शिरस्तक्षणं युक्तम्। अतः प्राधान्येन या क्रिया प्रतीयते, तस्या यत्कालिकत्वं तस्मिन् काले गुणभूतक्रियावाचिभ्यः प्रत्ययाः भवन्तीति 'वसन्नि'त्यादौ वर्तमानकालबाधेन भूते रात्रादीनां साधुत्वम्। न तु 'ददर्शे'त्यादौ भूतकालबाधेन वर्तमाने साधुत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

ज्योतिषशास्त्रे कुजदोषविचारः

नारायणन् नम्पूतिरि न.त.

सञ्चरणशीलानां समस्तग्रहाणां समस्तमपि चराचरवस्तुनः उपरि प्रभावः अस्तीति निश्चप्रचम्। सूर्याचन्द्रमसोः प्रभावस्तु कीदृशः इति सामान्येनापि जनेनानुभूयत एवानुदिनम्। सूर्यकिरणमन्तरा सस्योत्पत्तिः फलोत्पत्तिश्च न सम्भवतीति यत् आधुनिकैः वैज्ञानिकैः निरूपितं तत्तु प्राचीनकाले एव दिव्यदृग्भिराचार्यैः साक्षात्कृतम्। एवं सर्वेषामपि ग्रहाणां प्रभावविशेषः प्राचीनैः ज्योतिर्विद्भिः स्वीयानुसन्धानैः दृढीकृतः।

जन्मकाले विशिष्टस्थानस्थिताः ग्रहाः कर्मसमुद्भूतैः फलैः पुरुषान् योजयन्तीति शास्त्रस्यास्य विशिष्टं तत्वमस्ति।

श्लो– *पूर्वजन्मार्जितं कर्मशुभं वा यदिवाशुभम्।*
तस्य पक्तिं ग्रहास्सर्वे सूचयन्तीह जन्मनि॥

श्लो– *सुखदुःखकरं कर्मशुभाशुभमुहूर्त्तजम्।*
जन्मान्तरेऽपि तत्कुर्यात् फलं तस्यान्वयेऽपि च॥

सूर्यादयो ग्रहाः पृथिव्यादि पञ्चभूतानां, अस्थ्यादि सप्तधातूनां, वातपित्तकफानाञ्च कारकाः भवन्ति। तस्मात् कस्यचित् जन्मकाले तेषां ग्रहाणां स्थितिवशेन पाञ्चभौतिकं मानवशरीरं प्रभावितं भवतीति ज्योतिषशात्रे प्रतिपादयन्ति।

श्लो– *एते ग्रहाः बलिष्ठाः प्रसूतिकाले नृणां स्वमूर्त्तिसमम्।*
कुर्युर्देहं नियतं बहवश्च समागता मिश्रम्॥

श्लो– *रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः।*
दुर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामश्शुक्रो भास्करि कृष्णदेहः॥

श्लो– *गुरुशशिरवयः सत्वं रजः सितज्ञौ तमोऽर्क सुतभौमौ।*
एतेऽन्तरात्मनः स्वां प्रकृतिं जन्तोः प्रयच्छन्ति॥

मनुष्यजीवने विद्यमानेषु चतुर्ष्वपि आश्रमेषु गृहस्थाश्रमः श्रेष्ठ इति सर्वे जानन्ति। तदर्थं विवाहोऽनिवार्यः। विवाहसमये वधूवरयोः परस्परं ग्रहानुकूल्यमवश्यमन्वेष्टव्यमेव। यतो हि विवाहे न केवलशरीरस्य अपि तु मनसः अपि मेलनं भवति। तस्मात् विवाहात् पूर्वं वधूवरयोः

In Public domain. Digitization Muthulakshmi Research Academy

जातकमेलापकमवश्यं कर्त्तव्यम् । विवाहे कुजदोषः विशिष्टं स्थानमावहति। वधूवरयोः जन्मकाले तत्तत्स्थानस्थितः कुजः परस्परं दोषाय भवतीति प्रतिपाद्यते ज्योतिर्विद्भिराचार्यैः । कुजदोषनिरूपकाः बहवः प्रमाणभूताः श्लोकाः ज्योतिषग्रन्थेषु समुपलभ्यन्ते ।

श्लो– *लग्ने व्यये च पाताले जामित्रे सप्तमे कुजे ।*
कन्याभर्तृविनाशाय भर्तुः कन्या विनश्यति ॥

श्लो– *लग्ने व्यये चतुर्थे च सप्तमे चाष्टमे कुजः ।*
भर्तारं नाशयेत् भार्या भर्ता भार्यां विनाशयेत् ॥

वधूवरयोः अन्यतरस्य जन्मकाले लग्न–चतुर्थ–सप्तम–अष्टम–द्वादशस्थानेषु अन्यतमस्थानस्थितः कुजः अपरं नाशयतीति तात्पर्यम् ।

श्लो– *धनावसानस्मरयानरन्ध्रगो धरासुतो जन्मनि यस्य दारहा ।*
तथैव कन्याजनजन्मलग्नतो यदि क्षमासूनुरनिष्टदः स्यात् ॥

इति जातकपारिजाते द्वितीयस्थितस्यापि कुजस्य दुष्टत्वमभिधीयते। यवनजातके तु जन्मलग्नात्, चन्द्रात् तथा शुक्राच्च कुजदोषो विचारणीयः इत्युदीर्यते। एवं लग्न, द्वितीय, चतुर्थ, सप्तम, अष्टम, द्वादशेति यद्यपि षट्स्थानानि कुजदोषनिरूपणे प्रोक्तानि, तथापि बालवैधव्यनिरूपणावसरे षष्ठस्थितस्यापि कुजस्य महान् दोषः समुपपादितः।

श्लो– *जन्मलग्ने यदा चन्द्रः तस्माच्छष्ठे ऽष्टमे कुजे ।*
वर्षाष्टमे नरो याति यमालयमपित्रकाः ॥

श्लो– *पापयुक्तो यदा चन्द्रात् षष्टे चाष्टमगे यदि ।*
विवाहसमयात् मृत्युं दद्यादष्टाब्दतस्तयोः ॥

श्लो– *द्व्यादिपापयुते भौमे सप्तमे चाष्टमे स्थिते ।*
बालवैधव्ययोगः स्यात् कुलनाशकरी वधू ॥

अत्र प्रश्नः समुदेति किं कुजस्य वैशिष्ट्यम् ? कुजस्यैव प्राधान्यं किमर्थम् ? इति । तस्मात् कुजस्य स्वरूपं किञ्चिदत्र विचार्यते ।

"क्रूरदृक्तरुणमूर्त्तिरुदारः पैत्तिकः सुचपलः कृशमद्ध्यः" इति वराहमिहिरः कुजस्वरूपं निर्दिशति स्वीये बृहज्जातके ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो– क्रूरो रक्तारुणो भौमश्चपलोदारमूर्त्तकः ।
पित्तप्रकृतिकः क्रोधी कृशमद्ध्यो द्विजिद्दृक् ॥

इति पराशरः अगदत् ।

इत्थं समेषामाचार्याणां मतानुसारं कुजः क्रोधी, पित्तप्रकृतिकः, चपलः, तामसश्चेति भवति। तस्मात् जन्मकाले स्वीयबलानुरोधेन कुजः स्वीयगुणान् ज़ातकस्य प्रददातीति तु स्पष्टमेव । एवञ्च स्त्रीणां मासिकरजःस्रावेऽपि कारणं कुजः इति वदन्ति ।

श्लो– इन्दुर्जलं कुजोऽग्निर्जलमसृगथवाग्निरेव पित्तं स्यात् ।
एवं रक्ते क्षुभिते पित्तेन रजः प्रवर्त्तते स्त्रीषु ॥

कुजदोषनिरूपणावसरे निर्दिष्टेषु लग्न, चतुर्थ, सप्तम, अष्टम, द्वादशस्थानेषु स्थितस्य कुजस्य कीदृशं फलं समादिष्टमित्यपि किञ्चिदत्र विचार्यते ।

लग्नस्थितस्य कुजस्य फलम्

श्लो– गुदरोगी श्लथं नाभौ कण्डूकुष्ठादिनायितः ।
मध्यदेशे भवेत् व्यङ्ग्यः स वाच्ये लग्नगे कुजे ॥

श्लो– रक्तपीडा शिशुत्वे च वातरक्तश्च जायते ।
मस्तके कण्ठमध्ये तु गुदे वापि व्रणं भवेत् ॥

चतुर्थभावगतस्य कुजस्य फलम्

श्लो– बन्धुपरिच्छदरहितो भवति चतुर्थेऽर्थवाहनविहीनः ।
अतिदुःखैः सन्तप्तः परगृहवासी कुजे पुरुषः ॥ (कल्याणवर्मा)

श्लो– चतुर्थे भूसुते कृष्णः पित्ताधिक्योऽरिनिर्जितः ।
वृथाटनो हीनपुत्रो महाकामी च जायते ॥ (काशीनाथः)

सप्तमभावगतस्य कुजस्य फलम्

श्लो– मृतदारो रोगार्तोऽमार्गरतो भवति दुःखितः पापः ।
श्रीरहितः सन्तप्तः शुष्कतनुर्भवति सप्तमे भौमे ॥

श्लो– अङ्गारके मदनमन्दिरमिन्दुभावं मन्दान्वितेऽरिभवेन जनेऽङ्गनायाः ।
वैधव्यमेव नियतं कपटप्पबन्धात् वाराङ्गना भवति सैव वराङ्गनापि ॥

In Public domain. Digitization Muthulakshmi Research Academy

अष्टमभावगतकुजफलम्

श्लो- *व्याधिप्रायोऽल्पायुः कुशरीरो नीचकर्मकर्ता ।*
निधनस्ते क्षितितनये भवति पुमान् नित्यसन्तप्तः ।। (कल्याणवर्मा)

श्लो- *मृत्युगतो मृत्युकरो महीजः शस्त्राग्निलूतादिभिरग्नितो वा ।*
कण्ठप्रणाशो गृहिणीप्रपीडा नयत्यधो नाशकमानयेच्च ।। (गर्गः)

इत्थं कुजदोषनिरूपणावसरे प्रोक्तेषु स्थानेषु कुजस्य स्थितिः वधूवरजातकेषु अशुभायैव भवतीति निर्विवादः। तत्रापि सप्ताष्टमयोः स्थितस्य कुजस्य दोषाधिक्यं कथ्यते । स्त्रीजातके सप्तमस्थानेन सौभाग्यं, अष्टमेन माङ्गल्यविचारश्च क्रियते। पापग्रहः कुजः तद्भावगतं शुभफलं विनाशयति। इदानीं संशयः आयाति यत् कुजदोषयुक्तजातकानां विवाहः भवति वा न वा? इति । तत्रैव कुजदोषापवादः स्वीकर्त्तव्यः ।

श्लो- *जामित्रे वा यदा सौरिः लग्ने वा हिबुके तथा ।*
नवमे द्वादशे चैव भौमदोषो न विद्यते ।।

श्लो- *सप्तमस्थो यदा भौमः गुरुणा च निरीक्षितः ।*
तदा तु सर्वसौख्यं स्यात् मङ्गलो दोषनाशकृत् ।।

इत्यादि श्लोकेन जातके शनिस्थितिवशात्, गुरुदृष्टिवशात् सप्तमाधिपतिबलवशाच्च दोषः नश्यति। तथा च-

श्लो- *भौमतुल्यो यदा भौमः पापो वा तादृशो भवेत् ।*
उद्वाहः शुभदः प्रोक्तः चिरायुः पुत्रपौत्रदः ।।

यदि उभयोर्वधूवरयोः जातकयोः समानः दोषः दृश्यते तर्हि तयोः विवाहः शुभदः इति दोषसाम्येन परिहारः कीर्त्तितः । एवञ्च दुस्थिते ग्रहे तत्तद्ग्रहोक्तदेवताराधनेन, रत्नधारणेन, औषधसेवनेन, होमादीनामनुष्ठानेन, दानजपादिना च ग्रहदोषः परिहृतः भवतीति वदन्ति। यथा-

श्लो- *देवब्राह्मणवन्दनात् गुरुवचः सम्पादनात्प्रत्यहं*
साधूनामभिभाषणात् श्रुतिरवः श्रेयः कथाकर्णनात् ।

श्लो- *होमादध्वरदर्शनाच्छुचिमनोभावाज्जपाद्दानतः*
नो कुर्वीन्ति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनम् ।।

इति शम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सुधानिधौ "अथ शब्दानुशासनमिति विचारः"

डा. पङ्कजकुमार व्यासः

(क) "अथ शब्दानुशासनमि" ति वाक्यार्थविचारः

इह खलु जगति न हि कश्चिदस्य पाणिनीयतन्त्रस्य सर्वशास्त्रोपकारकत्वे[1] विप्रतिपन्नो, नापि वेदाङ्गत्वे, महेश्वरोपदिष्टाक्षरसमाम्नायापरपर्यायश्रुतिमूलकत्वात्। किन्तु तर्हि सर्वशास्त्रोपकारकस्यास्य पाणिनीयतन्त्रस्य शब्दशास्त्रमित्यपराख्यस्याध्ययने कस्य वा विपश्चिच्चेतसः प्रवृत्तिर्न स्यात्? तस्याश्च प्रवृत्तौ सर्वत्रापि लोके इष्टसाधनताज्ञानस्य हेतुताङ्गीकारे न कश्चिद्विपश्चित् प्रतिपद्येत। एवं तर्हि लोकत एव शब्दज्ञानसम्भवे कोऽर्थश्शब्दशास्त्रस्येति जिज्ञासायां भाष्यकारो विवरणकारत्वाद्व्याकरणस्य साक्षात्प्रयोजनमाह – अथ शब्देति[2] इति कैयटवचनं मनसि निधाय सिद्धान्तसुधानिधिकारः तद्व्याख्यातुमुपक्रमते "तत्र प्रवृत्तिं प्रति स्वविषयविशेष्यकस्येष्टसाधनत्वज्ञानवतां पुंसां शब्दज्ञानोपायाकाङ्क्षायां व्याकरणस्य शब्दज्ञानोपायत्वप्रदर्शनपरं भाष्यमवतरति"[3]। अत्रायमाशयः – प्रवृत्तौ यत्किञ्चित् सामान्येष्टसाधनताज्ञानापेक्षया विशेषज्ञानस्यैव हेतुत्वमिति सिद्धान्तयति स्वविषयविशेष्यकेत्यादिना। "स्वर्गकामो यजेत" इत्यत्र "यागेनेष्टं भावयेत्" यागो मदिष्टसाधनमित्याकारकं ज्ञानं तद्वत् "साधुशब्दज्ञानेन धर्मं भावयेत्" साधुशब्दज्ञानम्मदिष्टसाधनमिति बोध्यम्। अत्र च साधुशब्दज्ञानस्येष्टसाधनत्वम्। "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"[4] "शास्त्रपूर्वकप्रयोगे धर्मः"[5] इत्यादिवचोभिः साधुशब्दज्ञानेनैव धर्मोत्पत्तिसम्भवो नान्येन। तेन धर्मोत्पत्तौ साधुशब्दज्ञानं हेतुरिति सम्मतमिति ब्रुवन् भाष्यकारवचनं व्याख्याति "अथ शब्दानुशासनमिति" अत्रोपसर्गसन्धानवशात् सजातीयापेक्षभेदपूर्वकबोधकत्वार्थस्यानुशास्तेः कर्मषष्ठ्यन्तशब्दपदसमभिव्याहाररूप-तात्पर्यग्राहकवशादपशब्दापेक्षभेदपूर्वकप्रमापरतया ल्युटः करणार्थकतया शब्दानामित्यत्र विशेष्यत्वस्य षष्ठ्यर्थतया अथ शब्दस्य चारम्भकतया साधुशब्दविशेष्यकापशब्दत्वावच्छिन्न-

---

1 काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्। तथा च – पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षमम्। सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।। इति पराशरपुराणे।

2 महाभाष्यप्दीपः (ख. 1/ पृ. 5)

3 व्या. सि. सुधानिधिः – पृ. 1

4 महाभाष्यम् (ख. 1/ पृ. 23)

5 महाभाष्यम् (ख. 1/ पृ. 73)

In Public domain. Digitization Muthulakshmi Research Academy

प्रतियोगिताकभेदप्रकारकप्रमाकरणं शास्त्रमारभ्यत इत्यर्थः। तेन स्वरूपमात्रेण यत्किञ्चित् साधुशब्दस्य प्रकारान्तरेण ज्ञानसम्भवेऽपि न शास्त्रवैयर्थ्यम्। यथोक्तभेदप्रकारकत्वाभावात्।[6]

अस्यायमाशयः

"अथ शब्दानुशासनम्" इत्यत्र अनु इत्युपसर्गबलात् शास्' धातोर्बोधनमित्यर्थः सिद्ध्यति सामान्यतस्तथापि तत्र कर्मषष्ठ्यन्तशब्दपदसमभिव्याहाररूपतात्पर्यग्राहकवशाद् अर्थाच्छब्दानुशासनमित्यर्थके वाक्ये शब्दपदसमभिव्याहारेण सजातीयापेक्षभेदपूर्वकबोधार्थकत्वमनुशास्तेरिति विशेषार्थलाभः। अनुशासनमित्यत्र ल्युटः करणार्थकत्वं, शब्दानामित्यत्र षष्ठ्यर्थः विशेष्यत्वम्, अथशब्दस्तु आरम्भार्थकः। एतावताऽपशब्दाद्भिन्नसाधुशब्दस्य यथार्थज्ञानेनैव धर्मोत्पत्तिरिति फलितम्। तस्मादेतादृशप्रमाकरणं शास्त्रमारभ्यत इति ग्रन्थसङ्गतिः। अनेन "अथवाऽभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं "ज्ञाने धर्म" इति ब्रुवतोऽर्थादापन्नं भवति – "अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः"[7] इति शब्दज्ञानस्य धर्मजनकताधिकरणभाष्यमपि सङ्गच्छते। एवञ्च स्वरूपमात्रेण यत्किञ्चित्साधुशब्दस्य प्रकारान्तरेणज्ञानसम्भवेऽपि न शास्त्रवैयर्थ्यम्। न च साधुशब्दविशेष्यकापशब्दत्वावच्छिन्नप्रतियोगिताकभेदप्रकारकत्वस्य क्वचिदाप्तवाक्यादितः सम्भवोऽस्ति इति वाच्यम्। शब्दानामानन्त्येन सर्वत्र तदसम्भवात्। तथा चोक्तं पतञ्जलिना – "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम"[8] इति। इत्थं शास्त्रारम्भस्य सार्थकतामुपवर्णयामास सुधानिधिकारः।

समीक्षा

"अथ शब्दानुशासनमिति" भाष्यवाक्यं व्याचक्षाणस्य सिद्धान्तसुधानिधिकारस्योपवर्णनप्रकारः समीचीन एव। प्रदीपोद्योतच्छायादिव्याख्याग्रन्थाभिप्रायोऽपि एतादृगेव। किञ्च न्यासपदमञ्जरीकारयोरप्यत्रार्थ एव सम्मतिः।

(ख) अथ शब्द आरम्भस्य द्योतक उत वाचक इति विचारः

"अथ शब्दानुशासनम्" इत्यत्र वाक्ये "अथ शब्दः प्रारम्भस्य द्योतको न तु

---

6 व्या. सि. सुधानिधिः – पृ. 1

7 महाभाष्यम् (ख. 1/ पृ. 75)

8 महाभाष्यम् (ख. 1/ पृ. 54)

In Public domain. Digitization Muthulakshmi Research Academy

वाचकः, निपातत्वात् उपसर्गवत्" इति शब्दकौस्तुभे भट्टोजिदीक्षितः[9]। सुधानिधिकारस्तु "अथ शब्दश्चारम्भवाचकः।" अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते इति भगवदुक्तेः। मङ्गलन्त्वस्य प्रयोजनमात्रं न तु वाच्यम्, वाक्यार्थानन्वयात्। स्पष्टश्चेदं शारीरकभाष्यादौ।[10]

एतेन *ॐकारश्चाथशब्दश्च सर्गादौ (द्वावेतौ) ब्रह्मणः पुरा।*
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥

इति स्मृतिर्व्याख्याता[11] इति ब्रवीति।

अस्यायमाशयः

भट्टोजिदीक्षितस्य कैयटानुसारी पन्था न समीचीनः। तत्रत्यविप्रतिपत्तयस्तु खण्ड्यन्तेऽनेन महाशंयेनोत्तरग्रन्थेन। खण्डनात्प्राक् स्वमतं प्रस्तौति – अथशब्देति। "अथ शब्दोऽधिकारार्थः प्रयुज्यते" इति भाष्यकारेण पतञ्जलिना मुक्तकण्ठेनोक्तक्तत्वात्तस्य वाचकत्वमेव सम्भवति न तु द्योतकत्वम्। मङ्गलत्वन्त्वस्य प्रयोजनमात्रं भवितुं नार्हति तस्य शब्दानामनुशासनमिति वाक्यार्थऽन्वयासम्भवात्। एतन्मतं समर्थयति स्पष्टश्चेदं शारीरकभाष्यादाविति। एतेन ॐकारश्चाथशब्दश्चेत्यादि-स्मृतिव्याख्यानमपि सङ्गच्छते। एवं स्वसिद्धान्तमुपस्थाप्य कौस्तुभकृम्मतं निराख्यातुमुपक्रमते "यत्तु अथ शब्दः प्रारम्भस्य द्योतको न तु वाचको निपातत्वादुपसर्गवदिति। तन्न, व्याप्यत्वासिद्धेः, उपसर्गत्वस्योपाधित्वाच्च।" न च शबादौ साध्याव्यापकत्वं, निपातत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वात्। न च वाचकत्वाभाव एव साध्यः, साधनावच्छिन्नसाध्याधिकरणे पादपूरणार्थे "तुही"त्यादौ साध्याव्यापकत्वादिति वाच्यम्। शक्तिप्रमापकाभावस्योपाधित्वात्, विभक्तिप्रतिरूपकनिपाते व्यभिचाराच्च। मिश्रास्तु निपातमात्रस्य वाचकत्वेऽर्थवदादिसूत्रेणैव सिद्धौ "निपातस्यानर्थकस्य प्रातिपदिकसंज्ञेति"वार्तिकस्य द्योतकत्वे तु व्यावर्त्याभावादनर्थस्येति विशेषणभागस्य वैयर्थ्यमतश्चादयो वाचकाः प्रादयस्तु द्योतका इत्याहुः।[12]

---

9 शब्दकौस्तुभः (भा. 1/ पृ. 1)

10 तत्र अथशब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकारार्थत्वात्। मङ्गलस्य च वाक्यार्थे समन्वयाभावात्। अर्थान्तरप्रयुक्त एव अथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति। इति श्रीशङ्करभगवदाचार्यप्र–णीते ब्रह्मसूत्रभाष्ये *अथातो ब्रह्मजिज्ञासा।* 1।। इति सूत्रे भाष्ये।

11 व्या. सि. सुधानिधिः – पृ. 2

12 व्या. सि. सुधानिधिः – पृ. 2

In Public domain. Digitization Muthulakshmi Research Academy

अस्यमूलोक्तस्यायमाशयः

यथा उपसर्गा द्योतकास्तद्वद् अथशब्दोऽपि द्योतको निपातत्वात्। तन्न। व्याप्यत्वासिद्धेः। व्याप्यत्वासिद्धिर्नाम हेत्वाभासविशेषः। तच्च सोपाधिको हेतुरिति यावत्। एवञ्च दीक्षितोक्तहेतुः निपातत्वादिति सोपाधिकः = उपाधिविशिष्टस्तर्हि साध्यमनुमापयितुं न शक्तः। अत्र च वर्तत उपसर्गत्वनित्युपाधिः। यत उपसर्गत्वस्योपाधित्वं ततो व्याप्यत्वासिद्धिस्तस्माद् "निपातत्वादुपसर्गवद्" इति हेतुर्न समीचीनः। अत्र किञ्चिन्न्याय-शास्त्ररीत्याऽवलोक्य समीक्षामहे – हेतुवदाभासन्त इति हेत्वाभासाः। तदन्यतमः सोपाधिको हेतुः व्याप्यत्वासिद्ध इति। उपाधित्वञ्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति। अर्थाद्यस्मिन् पदार्थे साध्यव्यापकत्वरूपधर्मः साधनाव्यापकत्वरूपधर्मश्च भवतः स पदार्थ उपाधित्वेनाभिमतः। उदाहरणार्थम् – "अयोगोलकं धूमवद् वह्नेः" इत्याकारकमनुमानं, वह्निधूमयोस्साहचर्यात्। अत्र अयोगोलकं = पक्षः, धूमवत्वं = साध्यं, वह्निः = हेतुः। अत्र ह्यार्द्रेन्धनसंयोगस्योपाधित्वात् पक्षे साध्यमनुमापयितुं न शक्यते। तथा हि यत्र यत्र धूमः, तत्र तत्रार्द्रेन्धनसंयोगो वर्तते परन्तु यत्र यत्र वह्निः (अयोगोलके) तत्र तत्र तदभावाद् व्याप्यत्वासिद्धरूपहेत्वाभासः। प्रकृतेऽपि "अथ" शब्दः प्रारम्भस्य द्योतकः (न तु वाचकः) निपातत्वात्, उपसर्गवदिति इत्यत्र "अथ" शब्दः = पक्षः, द्योतकत्वं = साध्यं, निपातत्वं = हेतुः, उपसर्गवदिति दृष्टान्तः। यथा प्र, परा इत्याद्युपसर्गाः – निपाता द्योतकास्तद्वद् अथेत्ययं निपातोऽपि द्योतक इत्यनुमानम्। तन्न। व्याप्यत्वासिद्धेः, उपसर्गस्योपाधित्वाच्च। चो हेत्वर्थः। यत उपसर्गस्योपाधित्वं ततो व्याप्यत्वासिद्धिरिति। तथा च प्र, परा इत्यादीनां द्योतकत्वमुपसर्गत्वञ्चोभयविधत्वं परन्तु "अथ" इति निपातस्य द्योतकत्वेऽपि नोपसर्गत्वम्। तेन "यत्र यत्र द्योतकत्वं (साध्यं) प्र, परा इत्यादिषु तत्र तत्रोपसर्गत्वम् = साध्यव्यापकत्वम्, यत्र यत्र निपातत्वम् (अथेत्यादौ) तत्र नोपसर्गत्वम् = साधनाव्यापकत्वम्" इत्यायातम्। तेन सोपाधिकत्वाद् व्याप्यत्वासिद्धेः "अथ" शब्दो न द्योतक इति। पुनः द्योतकतावादी सिद्धान्तं विघटयितुं प्रयतते। तत्खण्डयति ग्रन्थकारः – "न च शबादा" वित्यादिना।

अत्र पूर्वपक्षिणोऽयमाशयः

त्वदुक्तरीत्या व्याप्यत्वासिद्धिरूपदोषो वक्तुं न शक्यते। उपसर्गत्वस्योपाधित्वेऽपि शप्श्यनादिषु साध्याव्यापकत्वमेव, तेन उभयोर्द्योतकत्वेन तुल्यत्वादुपसर्गत्वस्यापि नोपाधित्वमिति। अर्थात् साध्यं = द्योतकत्वं तच्च यथा प्र, परा–इत्यादिषु तद्वच्छप्श्यनादि-

In Public domain. Digitization Muthulakshmi Research Academy

विकरणप्रत्ययेष्वपि, तेषां पृथगर्थाभावात्। एवञ्च यत्र यत्र द्योतकत्वं शृप्श्यनादिषु तत्र तत्रोपसर्गत्वन्तु न, तस्मात् साध्याव्यापकत्वादुपसर्गत्वस्य नोपाधित्वम्। यत उपसर्गत्वस्य नोपाधित्वं ततो व्याप्यत्वासिद्धिरूपदोषोऽपि न। इति चेन्न। अत्रायं सिद्दान्तिन आशयः – साधनविशिष्टसाध्यव्यापकत्वस्योपाधित्वेनाङ्गीकृतत्वाद् दोषतदवस्थ एव। तथा हि – निपातत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वं हि उपाधित्वम्। तेन निपातत्वरूपद्योतकत्वं यत्र प्रपरादि, तत्रोपसर्गत्वमस्त्येवेति, शबादौ तु न तथा। अतोऽस्योपाधित्वेनाङ्गीकृत-त्वाद्व्याप्यत्वासिद्धिरूपदोषस्तथैव वर्तते।

पुनरत्र पूर्वपक्षी

"अथ" शब्दे द्योतकत्वं मास्तु, वाचकत्वाभाव एव स्वीक्रियताम्। तेन वाचकत्वाभावस्य साध्यत्वेनाङ्गीक्रियमाणे साधनावच्छिन्नसाध्याधिकरणे पादपूरणार्थके तुहीत्यादौ साध्याव्यापकत्वान्न पूर्वोक्तदोष तत्रोपसर्गत्वस्याभावात्। तद्धि यत्र यत्र वाचकत्वाभावः (साध्यं) तुहीत्यादौ, तत्र तत्रोपसर्गत्वं नेति साध्याव्यापकत्वादुपाधि-त्वाभावाद्व्याप्यत्वासिद्धेरभावः। तेन "अथ" शब्दस्य द्योतकत्वे न काचित् क्षतिः। इति चेन्न। शक्तिप्रमापकाभावस्योपाधित्वाद्, विभक्तिप्रतिरूपकनिपाते व्यभिचाराच्च।

अयं भावः

अस्माभिः शक्तिप्रमापकाभाव उपाधिरिति स्वीक्रियते अर्थादस्य शब्दस्यात्रार्थे शक्तिरिति न किमपि प्रमाणं तत्रेत्येतादृगुपाधिः। तेन यत्र यत्र निपातत्वविशिष्टवाचकत्वाभावः तुहीत्यादौ, तत्र तत्र शक्तिप्रमापकाभावः, साधनविशिष्टसाध्यव्यापकत्वम्। यत्र यत्र निपातत्वम् "अथ" इत्यादौ, तत्र तत्र शक्तिप्रमापकाभावाभावः, साधनाव्यापकत्वम्। कोशादौ "अथ" शब्दस्य यत्रार्थे शक्तिरित्युक्तत्वात्। अतः शक्तिप्रमापकाभावस्योपाधित्वेनाभिमतत्वात् "अथ" शब्दे वाचकत्वाभावरूपसाध्यत्वं न घटते। किञ्च विभक्तिप्रतिरूपकनिपातेषु व्यभिचारदोषोऽपि स्यात्। तथा हि "अस्ति" इति विभक्तिप्रतिरूपकनिपातः, तत्र वाचकत्वाभावो नास्तीति। व्यभिचारस्योदाहरणं – पर्वतो वह्निमान् धूमात्, यत्र यत्र धूमस्तत्र तत्र वह्निरित्यनुमानात्। तद्वदयोगोलकं धूमवद्वह्नेः, यत्र यत्र वह्निस्तत्र तत्र धूम इत्यनुमानं तु कर्त्तुं न शक्यते। अयोगोलके वह्नौ सत्यपि तत्र धूमाभावस्य स्पष्टत्वात्। धूमस्य सत्त्वे वह्निश्चेद्वह्नेः सत्त्वे धूमोऽपि स्यादिति निर्बन्धस्तु न। धूमवह्न्योः सहचरितदृष्टयोरपि महानसे, अयोगोलके तद्व्यभिचाराच्च।

In Public domain. Digitization Muthulakshmi Research Academy

इत उत्तरमथशब्दो वाचक एवेति स्वमतं द्रढयितुं मिश्रमतं प्रस्तौति – "मिश्रास्तु इत्यादिना"। अत्र मिश्राः – यदि निपातमात्रस्य वाचकत्वमेव तर्हि वाचकत्वे अर्थवदादिसूत्रेणैव प्रातिपदिकसंज्ञायां सिद्धायां "निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा" इति वार्तिकस्य तेषां द्योतकत्वे अर्थवत्त्वाभावाद्व्यावर्त्यं यत्किञ्चिन्नास्ति, ततः अनर्थकस्य विशेषणभागस्य व्यर्थता। अतश्चादयो वाचकाः प्रादयस्तु द्योतका इत्यभिप्रयन्ति।

समीक्षा

प्रकृत एतावत्यां कृतायां समीक्षायां वाचकत्वमेवाथशब्दस्येति निर्णयः। कैयटहरदत्तन्यासकृद् – भट्टोजिदीक्षितप्रमुखा निपातानां द्योतकत्वमेवाङ्गीकुर्वन्ति, अन्ये च भाष्यकैयटव्याख्यातारो विवरणकारः (रामचन्द्रसरस्वती), उद्योतकर्ता (अन्नम्भट्टः), नारायणीकारः (श्रीशास्त्रिनारायणः) इत्यादयोऽपि द्योतकत्वमेवाङ्गीचक्रुः, तथापि सिद्धान्तसुधानिधिकारो न्यायपक्षपातित्वेन स्वहेतुभिस्तन्मतं निराचख्यौ। वैयाकरणप्रामाणिकाग्रगण्यो नागेशोऽप्येतदेवाभिप्रैति। न च "अथ शब्दानुशासनम्" इत्यत्र "अथ" शब्दस्य प्रारम्भक्रियाक्षेपकत्वं कैयटादावुक्तम्"[13] इति मञ्जुषायामुक्तत्वात् स्ववचोविरोधो नागेशस्येति वाच्यम्। कैयटादाविति नामग्रहणेनारुचिसूचनात्। अत्रारुचिबीजन्तु उद्योते "प्रारम्भक्रियाविषयत्वद्योतकस्यापि" इत्यादिकैयटमतमनूद्य तदुत्तरग्रन्थे "परे तु अत्र वाचकत्वमेवेच्छन्ति, अधिकृतश्च तदर्थं वदन्ति"[14] इत्युक्तमित्यवधेयम्। स्वयं सिद्धान्तसुधानिधिकारोऽपि एतत् प्रमाणयितुमर्थवत्सूत्रस्थवार्तिकेन "निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या" इत्यनेन निपातानां वाचकत्वसम्मतं पक्षं मिश्रमतेन द्रढयति। अत्रापि "मिश्रास्तु" इति नामग्रहणेऽरुचिबीजं समेषाञ्च निपातानां वाचकत्वमापतेदिति। अन्यथा

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः।।

इति हरिसिद्धान्तस्यासङ्गत्यापत्तिः। केचिद् "निपातस्यानर्थकस्येति" वार्तिकम् "अधिपरी अनर्थकौ" (पा. सू. 1-4-13) इति सूत्रे भाष्ये प्रत्याख्यातं तर्हि ज्ञापकत्वं न घटत इत्याद्याक्षिपन्ति। एतत्सूत्रस्थं भाष्यकैयटमर्थतः सङ्गृह्य परमसिद्धान्तमुपस्थापयति। अथवा

---

13 वै. सि. ल. मञ्जूषा (निपातार्थनिर्णये पृ. 585)

14 महाभाष्यम् (उद्योते – ख. 1/ पृ. 8)

In Public domain. Digitization Muthulakshmi Research Academy

नेमावनर्थकावित्युत्तरभाष्येण तत्संज्ञाविधानावश्यकत्वाच्च।

अत्रायं सारः

"अधिपरी अनर्थकौ" (पा. सू. 1-4-83) इत्यनेन अधिपर्योः संज्ञा नेति योजना। तर्हि पञ्चमीविधानमत्र प्रयोजनमिति पञ्चम्याङ्परीभिरिति चेत् सिद्धाऽत्र पञ्चम्यपादाने इत्येव। एवं तर्हि सिद्धे सति आरम्भः अनर्थकानामप्येषामर्थवत्कृत्कार्यज्ञापनार्थं तत्संज्ञारम्भः "निपातस्यानर्थकस्य प्रातिपदिकत्वम्" इति वार्तिकं न कर्त्तव्यम्। परन्तु तदुत्तरभाष्येण "नेमावनर्थकौ अपि तु अनर्थान्तरवाचिनावनर्थकौ" इत्यादिना कर्मप्रवचनीयसंज्ञा-विधानावश्यकत्वमुक्तम्। अनेनार्थवत्सूत्र एतद्वार्त्तिकप्रत्याख्यानमपि नेति तात्पर्यं ध्वनितम्। तल्लिखति अर्थवत्सूत्रभाष्यस्थोद्योते नागेश "आनर्थक्यञ्च निपातस्य धातुनिपातयोः साधारणार्थतयाऽधिकद्योत्यार्थाभावादुच्यते, न तु सर्वात्मनार्थाभावात्" इति प्रतीकमुद्धृत्य – न तु – तथा च प्रयोगो व्यर्थः स्यादिति भावः। एतेन ज्ञापकं शिथिलमिति ध्वनयति। धात्वर्थानुवादकरूपयोगस्यापि ग्रहीतुं शक्यत्वादिति बोध्यम्। ध्वनितश्चेदमधिपरी इति सूत्रे भाष्ये।[15] एवञ्चात्राथेति निपातो वाचक इति निरूपितम्। अत्रांशे निरुक्तग्रन्थस्योद्धरणानि प्रस्तौति सुधानिधिकारः – "न निर्बद्धा उपसर्गाः" इत्यादि। एतच्च व्याख्यातं निपातार्थनिर्णये नामके ग्रन्थ आचार्यहरिश्चन्द्रमणित्रिपाठिना महाशयेन। तथा हि निरुक्तविश्लेषेण द्वौ पक्षौ सनायातौ। प्रथमपक्ष आचार्यशाकटायनस्य, अपरस्तु गार्ग्यस्य। शाकटायनो द्योतकतावादी, गार्ग्यस्तु वाचकतावादी। "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति" (निरुक्तम् 1-1-4) इति शाकटायनमतम्। उच्चावचाः पदार्था भवन्ति इति गार्ग्यस्तु एषु पदार्थः प्राहुरिमे तं नामाख्यतयोरर्थविवरणम् इति गार्ग्यमतम्। अर्थाच्छाकटायनो ब्रवीति यन्नामाख्यातयोर्यत् कर्म = अर्थः तत्रैवोपसंयुज्य कश्चिदर्थविशेषं द्योतयन्ति उपसर्गाः। गार्ग्यो ब्रवीति यद् उच्चावचाः = बहुप्रकाराः, पदस्य निपातोपसर्गाख्यस्य, अर्थाः = अभिधेयाः प्रकर्षादयः सन्ति। आचार्ययास्कस्तु उत्तरपक्षेण गार्ग्यमतमेवाङ्गीकरोति।[16] भगवान् पाणिनिरपि वाचकतापक्षपातीति विज्ञायते। तथा हि –

पाणिनिश्चाह भगवानर्थनिषां बहूंस्तथा।

---

[15] महाभाष्यम् (प्रदीपे – अर्थवत्सूत्रभाष्ये)

[16] निपातार्थनिर्णयः पृ. 79-80

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणमेतेषां बाहुल्यान्न प्रदर्शितम्।।[17] इति।

अस्याः कारिकायास्त्वयमर्थः – भगवान् पाणिनिरपि एषां निपातानां बहूनर्थान् कथयति। तर्हि कुतस्तत्सर्वं सोदाहरणं न प्रत्यपीपददिति चेदुच्यत उदाहरणानां बाहुल्यादिति। अनेन पाणिनिर्भगवान् अर्थानाह इत्येतद्वाक्यस्य निपातानां वाचकत्वे पर्यवसानम्। द्योत्यार्थत्वे तु न ते पृथगर्थमभिदधतीति योजना। एवञ्च बहुभिः प्रमाणैः "अथ शब्दानुशासनम्" इत्यत्र "अथ" शब्द आरम्भस्य वाचक इति निश्चप्रचम्।

परिशीलिता ग्रन्थाः

1) ऋग्वेदसंहिता, स्वाध्यायमण्डलम्, वारदी, गुजरात् , 1975
2) काशिकावृत्ति [(भा. 1) न्यासपदमञ्जरीसहिता], जयादित्यवामनाचार्यौ, सं. – नारायणमिश्रः, रत्नापब्लिकेशन् , वाराणसी, 1985
3) तर्कसङ्ग्रहः(नवटीकाविभूषितः), अन्नम्भट्टः, चौखम्बा-संस्कृत-संस्थान, वाराणसी, 2006
4) नागेशभावप्रकाशः (लघुमञ्जूषायां धात्वर्थनिपातार्थयोर्व्याख्या) – पेरि सूर्यनारायणशास्त्री, विजयप्रॅस्, चित्तुरु, आन्ध्रप्रदेशः, 1987
5) निपातार्थनिर्णयः, डॉ. हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1990
6) ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीशङ्कराचार्यप्रणीतम्, निर्णयसागरप्रॅस् , मुम्बई, 1934
7) महाभाष्यसमीक्षणम्, डॉ. गिरीशचन्द्रत्रिपाठी, श्रीबटुकाप्रकाशनम्, हरिद्वार, 1987
8) वाक्यपदीयम् (वाक्यकाण्डम्), भर्तृहरिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1980
9) वैयाकरणप्रबन्धमुक्तावली, आचार्यः अशोकचन्द्रगौडशास्त्री, नागपब्लिशर्स, नई दिल्ली, 2005
10) वैयाकरणभूषणसारः(तत्त्वदर्शिनीयुतः), श्रीपेरि सूर्यनारायणशास्त्री, राजमहेन्द्रि (आ. प्र.) 1987
11) व्याकरणमहाभाष्यम् (नवाह्निकम्, छायासहितम्), चौखम्बा-संस्कृत-प्रतिष्ठान, दिल्ली, 1987
12) व्याकरणसिद्धान्तसुधानिधिः (प्रथमो भागः), आचार्यविश्वेश्वरसूरिः, सं. – सत्यप्रकाशदुबे, राजस्थानपत्रिका, जयपुर, 1995
13) शब्दकौस्तुभः (भा. 1), भट्टोजिदीक्षितः, चौखम्बा-संस्कृत-सीरीज्-ऑफिस्, वाराणसी, 1991

---

17 ऋग्वेदानुक्रमणी 7/16

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतवाङ्मयम् – शास्त्रकाव्यम्

के. आञ्जनेयुलु

प्राचीनकालादारभ्य रांजसभासु विद्वत्परिषत्सु च सर्वत्र वेदवेदाङ्गदर्शन-पुराणेतिहासादिभिः सह काव्यनाटकादीनां चिन्तनं, विचारश्च भवति स्मेति विद्वांसः जानन्त्येव। तत्र शास्त्रचर्चायाः विशेषस्थानमासीत्। तमेव सम्प्रदायमनुसृत्य संस्कृतवाङ्मये वैदिकसाहित्यानन्तरं महर्षिव्यासवाल्मीक्यादिभिः रामायणमहाभारतादीनि विरचितानि, एवमेव भास–कालिदास–अश्वघोष–भवभूत्यादिभिः महाकविभिः महाकाव्यानि नाटकानि च लोकहिताय सहृदयमनोरञ्जनाय प्रणीतानि वर्तन्ते। तथैव दण्डी–बाण–सुबन्धुसदृशैः लोकप्रसिद्धानि गद्यकाव्यानि, भोजराज–वेङ्कटाध्वरिप्रभृतिभिः चम्पूकाव्यानि विरचितानीति संस्कृतलोकः जानात्येव।

इमामेव परिपाटीमनुसृत्य केचन विद्वत्कवयः स्व–स्व काव्येषु इतिवृत्तेन सह दर्शनशास्त्रव्याकरणशास्त्रादीन् विषयान् प्रकटीकर्तुं सर्वथा प्रायतन्त। एतान्येव शास्त्रकाव्य नाम्ना प्रसिद्धिमवाप। तर्हि किं वा शास्त्रकाव्यम् ? इति चेदुच्यते –

शास्त्रकाव्यम्

काव्यवस्तुना सह शास्त्रसम्बद्धनियमोदाहरणज्ञापनाय काव्यलक्षण-निर्देशानुसारं लिखितं काव्यं "शास्त्रकाव्यम्" इत्युच्यते। राजशेखरः काव्य–मीमांसायाम् काव्यभेदान् प्रस्तुवन् शास्त्रकाव्यस्यापि परिचयं प्रददाति। यथा–

शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च कैश्चन।
चतुः प्रकारभेदोऽयं वाङ्मयस्य च प्रकीर्तितः।। इति। (भट्टिकाव्यम्–प्रस्तावना)

एवमेव क्षेमेन्द्रेण संस्कृतसारस्वतं चतुर्धा निरूप्यते। यथा–

शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः।
चतुःप्रकारः प्रसरः सतां सारस्वतो मता।।
शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्।
भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते।। (सुवृत्ततिलकम्–तृतीयविन्यासः)

तेन संस्कृतवाङ्मयं शास्त्रं, काव्यम्, शास्त्रकाव्यम्, काव्यशास्त्रम् इति चतुर्धेति ज्ञायते।

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वोक्तनिर्देशानुसारं बहूनि शास्त्रकाव्यानि विरचितानि बहुभिः शास्त्रपारङ्गतैः। परं शास्त्रचिन्तनात्मकानि नैषधादीनि काव्यानि अपि शास्त्रकाव्यानि भवन्ति वा इत्यस्य प्रश्नस्य नेति समाधानम्। यतः तत्काव्यं स्वकाव्यवस्तुना सह शास्त्रसम्बद्ध-नियमोदाहरणपुरस्सरं काव्यलक्षणनिर्देशानुसारं लोकं प्रत्यवगमनाय विद्वद्भिः रचितं भवेत्, लक्षणानुसारेण यानि शास्त्रकाव्यानि विरचितानि तान्येव शास्त्रकाव्यानि भवन्ति नत्वन्ये।

शास्त्रकाव्यानामुद्भवः विकासश्च -

संस्कृतसाहित्यकाव्यजगति शास्त्रकाव्यानां विकासः कदा प्रभृत्यभूदिति तु निश्चयेन वक्तुं न पार्यते। भट्टिकवेः रावणवधम् प्रायः शास्त्रकाव्येषु आदिममिति प्रतीयते। भट्टिकाव्यादेव शास्त्रकव्यस्य परम्परा विकसिता। ततः एव अन्यानि शास्त्रकाव्यानि समभवन्निति ज्ञायते। सम्प्रति तेषां शास्त्रकाव्यानां परिचयः क्रियते।

शास्त्रकाव्यानि -

क्रमसङ्ख्या	कवेर्नाम	ग्रन्थनाम	शास्त्रविषयः
1	भट्टिः	रावणवधम्	व्याकरणम्
2	हेमचन्द्राचार्यः	कुमारपालचरितम्	व्याकरणम्
3	हलायुधः	कविरहस्यम्	व्याकरणम्
4	भीमकः	रावणार्जुनीयम्	व्याकरणम्
5	वासुदेव	वासुदेवविजयम्	व्याकरणम्
6	नारायणः	धातुकाव्यम्	व्याकरणम्
7	विनयप्रभासूरी	श्रेणिक चरितम्	व्याकरणम्
8	श्रीनारायणः	सुभद्राहारणम्	व्याकरणम्
9	शाकल्यमल्लकविः	उदारराघवम्	व्याकरणम्
10	वेदान्तदेशिकः	यादवाभ्युदयम्	दर्शनशास्त्रम्
11	म० म० गङ्गाधरशास्त्री	अलिविलाससंलापकम्	व्याकरणम्

तानि विस्तरेण यथा-

1. रावणवधम् - शास्त्रकाव्येषु प्रथमोदाहरणत्वेन षष्टशतके विरचितं भट्टिकाव्यमुपतिष्टते। शास्त्रकाव्यप्रणेतृषु भट्टिराद्यः। अयं सौराष्ट्रस्य शासिति श्रीधरसेनाख्ये नृपे काव्यमिदं

In Public domain. Digitization Muthulakshmi Research Academy

प्रणीतवान्। भट्टिकाव्यं २२ सर्गेषु विभक्तमस्ति। स्वरूपेण काव्यमिदं व्याकरणप्रयोगदृष्ट्या गुम्फितत्वात्तत्र सर्गाणां विभाजनमपि व्याकरणदृष्ट्यैव कृतं दृश्यते। अस्मिन् शास्त्रकाव्ये एकतः काव्योचितसरसगुणाः भ्राजन्ते, अपरतश्च व्याकरणसम्मतप्रयोगाणाम् आपणमपि विलसति। यतः ते २२ सर्गाः काण्डैः विभक्ताः। तत्र प्रकीर्णके कृत्प्रयोगाः, अनभिहितेऽधिकारः एवमेव तिङ्न्तकाण्डे नवानां लकाराणां विषये चर्चा विहिता, स्वयं कविरयं काव्यस्यौन्नत्यं प्रतिपादयति यथा –

दीपतुल्यं प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
हस्तामर्ष इवान्धानां भवेद्व्याकरणादृते।। (भट्टिकावम्)

एवमेव मल्लिनाथः भट्टिकाव्यव्याख्याने अस्यकाव्यस्यौन्नत्यमुट्टङ्कयति–

व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया।। (भट्टिकावम् प्रस्तावना) इति।

2. कविरहस्यम् – हलायुधस्य "कविरहस्यम्" इत्याख्ये शास्त्रकाव्ये धातुसम्बन्धिनियमानामुदाहरणानि प्रदत्तानि सन्ति, तत्र नानार्थानां धातूनां भिन्नेषु अर्थेषु प्रयोगस्य प्रपञ्चः दृष्यते। कविरसौ ईसवीय ९५०–९५३ तमे वर्तमानस्य राष्ट्रकूटकृष्णस्त्रुतीयस्य सभापण्डितः आसीत्।

3. रावणार्जुनीयम्– भीमकमहाकवेः 'रावणार्जुनीयम्', "अर्जुनरावणीयम्" वेति नाम्नैव महाकाव्यं दृश्यते। काव्यमिमम् अष्टाध्यायी सूत्रपाठक्रमेण पदानां निदर्शनेन च शास्त्रकाव्येष्वन्यतममिति मन्यते। सुवृत्तितिलको नाम ग्रन्थे क्षेमेन्द्रेण अयं विक्रमपञ्चशतके सन्निकर्षे एव आसीदिति सम्भाव्यते। अयं शारदादेशे वराहमूलस्य समीपे आसीत्।

4. श्रेणिकचरितम् – विनयप्रभासूरिणा कातन्त्रव्याकरणाधारेण "श्रेणिकचरितम्" इति नाम्ना काव्यं विरचितम्। अस्मिन् काव्ये एकादशसर्गाः विद्यन्ते। अयं काव्यारम्भादेव सन्धिविषयकानुपस्थाप्य तदनु समास, तद्धित, अव्ययान्तिकं च प्रस्तौति। अस्य कालस्थिती अज्ञाते।

5. कुमारपालचरितम् – ऐतिहासिककाव्यनिर्देशप्रकारेण निर्मितमिदं 'कुमारपालचरितम्' इति काव्यम्। हेमचन्द्राचार्येण विरचितं काव्यमिदं शास्त्रकाव्येषु वैलक्षण्यमावहति।

In Public domain. Digitization Muthulakshmi Research Academy

द्व्याश्रयकाव्यसंज्ञितं 'कुमारपालचरितं' संस्कृतप्राकृतमयञ्चेति द्वे काव्ये प्रथिते स्तः। सः गुर्जरनरेशस्य जयसिंहस्य(११४९-११९९) काले आसीदिति विश्रुतिः। असौ ११४५ मितवैक्रमाब्दे धुन्धकनगरे वणिक् गृहे जातः। कुमारपालचरितम् २८ सर्गात्मकं महाकाव्यम्। इदं द्व्याश्रयकाव्यमित्यप्युच्यते। काव्येऽस्मिन् २० सर्गाः संस्कृते, ८ सर्गाः प्राकृते निबद्धाः सन्ति। कुमारपालस्य जीवनवृत्तमधिकृत्य इदमैतिहासिकमपि भट्टिकाव्यमिव व्याकरणनियमविवेचकं जैनमतप्रचारकञ्चेति प्रतीतिः।

6. वासुदेवविजयम् (धातुकाव्यम्) – मालवारस्य वेदाख्याननामके स्थाने निवसता वासुदेवकविना "वासुदेवविजयम्" इति काव्यं सर्गत्रये पूर्वार्थम्, उत्तरार्थं सर्गत्रये "धातुकाव्यम्" इति नाम्ना विरचितम्। शेषं नारायणभट्टेन पूरितम्। अस्मिन् काव्ये पूर्वार्थसर्गत्रये पाणिनिसूत्राधारितशब्दानामुपस्थापनमभूत्। उत्तरार्थे वृकोदरोक्तप्रकारेण धातूनां प्रयोगः विद्यते।

7. सुभद्राहरणम् – हेमचन्द्राचार्यविरिचतकुमारपालचरितमित्यस्य द्विशतकात्परम् श्रीनारायणमहाकविना १६ सर्गेषु महाभारतसम्बद्धं "सुभद्राहारणम्" इत्येकं काव्यं विरचितम्। अयं वैय्याकरणमहाकविः व्याकरणसूत्रोदाहरणान् काव्ये उपस्थापनामकरोत्।

एवमेव शाकल्यमल्लकवेः "उदारराघवम्", वेदान्तदेशिकस्य दर्शनशास्त्रसम्बद्धं "यादवाभ्युदयम्", अर्वाचीनकालस्य म०म० गङ्गाधरशास्त्रिणः "अलिविलाससंलापकम्" इत्यादीनि शास्त्रकाव्यानि समुपलभ्यन्ते।

शास्त्रकाव्यस्य वैशिष्ट्यम्

संस्कृतकाव्यसंसारे शास्त्रकाव्येषु शास्त्रविषयानां प्राधान्यात् विशिष्टाः गुणाः परिलक्ष्यन्ते। अतः एतेषां वैशिष्ट्यं किमिति विशदीक्रियते।

रावणवधमहाकाव्ये "व्याकरण" शब्देन "पाणिनीयाष्टकम्" (अष्टाध्यायीग्रन्थः) अभिप्रेतोऽस्ति। यतो हि प्रकीर्णाधिकार-प्रसन्न-तिङन्तेति काण्डचतुष्टयात्मकं, प्रसाद-गुणगुम्फितं कोशालङ्कार-ध्वनिविशिष्टं, रामकथामृतप्लावितं, राजनीति-समाजनीतिबोधकं, रावणवधाभिधमिदं महाकाव्यशास्त्रं पाणिनीयाष्टकमेवाधिकृत्य निबद्धं विद्यते।

In Public domain. Digitization Muthulakshmi Research Academy

भट्टिकाव्ये प्रारम्भतः पञ्चमसर्गस्य षण्णवतिपद्यान्तं प्रकीर्णं ततो नवमसर्गावधिः अधिकारस्ततो दशमसर्गतस्त्रयोदशावधिकेऽस्मिन् प्रसन्ने काव्यवर्णनच्छटाद्भुता विद्यते।

चतुर्दशसर्गतो द्वाविंशसर्गावधिं ग्रन्थसमाप्तिं यावत् तिङन्तकाण्डं चलति। तत्र हि – महाकविः सर्वेषां तिङन्तपदानां प्रयोगवैचित्र्यं दधत् "काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिवृतये"(काव्यप्रकाशः) इति लक्षणं सङ्गमयन् लकारवैचित्र्यं निबध्नाति। अत्र महाकवेरस्य महत्वं स्फुटं स्फुरितं विद्यते। लकाराणां प्रयोगशिक्षा सहैव राजनीति-व्यवहारनीति-समाजनीति-धर्मनीतिशिक्षां च चातुर्य-प्राचुर्यं च तत्सर्वत्र तिङन्तकाण्डे सम्भृतं महाकविना। अत्र तिङन्तकाण्डे सर्वतोपि सौविध्यमिदमस्ति यदेक एव लकारः सर्गान्तं चलति। तत्र तल्लकार प्रत्ययानां ज्ञापनं कृत्वा धात्वर्थं ज्ञापयन् धातु-प्रत्यययोगेन काव्यत्वं स्थापयति। अत एवोच्यते भट्टिकाव्येऽस्मिनुत्तरोत्तरं वाग्वैदग्ध्यमस्तीति।

चतुर्दशे लिटः, पञ्चदशे लुङः, षोडशे लुटो विलासे रावणविलापेन सर्वमपि व्यवहारमविवेकिनां शिक्षयन् महाकवी रामवद् व्यवहर्तव्यं न रावणावदिति स्फुटमाख्याति।

तदैवाग्रे सप्तदशतो विंशतिसर्गान्तं लङ्, लिङ्, लोड्लकाराणां सार्वधातुकानां सन्निवेशेन सर्वमपि गुणकृत्यं शबादिविकरणशिक्षया बोधयन् लोकव्यवहारमपि विभीषणविलापेन शिक्षितवान्। आशीर्लिङि आर्द्धधातुकस्य सार्वधातुकेन सहैव प्रयोगान् दर्शयन् आर्द्धधातुकप्रयोगाः अनायाससाध्या इत्यपि प्रत्यक्षं प्रदर्शितवान्। एकविंशे लृङ्, द्वाविंशे लुट् विलासं दर्शयन् सर्वान् सार्वधातुकार्द्धधातुकप्रयोगान् प्रदर्शयन् तिङन्तकाण्डं लकारविलसितं समापितवान्।

"वासुदेवविजयमि"ति शास्त्रकाव्ये वासुदेवकविना सर्गत्रयात्मकेनैव सकलाष्टाध्यायी कृतार्थी कृता। तेन काव्यारम्भे "गिरः शोधयामि" इति स्वकृत "पदचन्द्रिका" इति व्याख्ययाम् एवमकथयत्- "अहं तं वसुदेवनन्दनं हृदा दधत् तच्चरितोर्मिभिः गिरः पुने शोधयामि" (वासुदेविवजयम्-प्रस्तावना) इति। व्याकरणदृष्ट्या इदं काव्यं चतुर्था कृता। टीकायाम् –

"इह पाणिनीय सूत्रे चत्वारोभागाः परिकल्पिताः ताः यथा प्रथमद्वितीयात्मको आद्यः, तृतीयात्मको द्वितीयः, चतुर्थपञ्चमाध्यायात्मकस्तृतीयः, अवशिष्टात्मको चतुर्थः इति"

In Public domain. Digitization Muthulakshmi Research Academy

(वासुदेवविजयम्-प्रस्तावना) दर्शयन् तदुद्दिश्य एकस्मिन् श्लोके प्रत्ययानां प्रयोगवैलक्षण्यं द्योतयति। यथा-

मितम्पचं किञ्चिदरुन्तुदं ता प्रसूतिजं दुखमायां बभूव।
चक्रं ललाटन्तपभास्कराभं दधानमीशं भरणं गता सा।। (वासुदेवविजयम् 3-5)

इत्यत्र मितम्पच "मितनखे च"(अष्टाध्यायी 3.2.34), अरुन्तुद "विध्वरूषोस्तुदः"(अष्टाध्यायी 3.2.35), ललाटन्त "असूर्यललाटयोदृशितपोः" (अष्टाध्यायी 3.2.36) इति क्रमेणोक्तसूत्रैः साधितखश् प्रत्ययोदाहरणानां प्रयोगो साध्यते। "धातुकाव्यम्" इति शास्त्रकाव्यम् वासुदेवकविविरचितस्य वासुदेवविजयाभिधस्य काव्यरत्नस्य शेषपरिपूरणाय चिकीर्षितं प्रतिजानीते-

उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः।
उदाहरत्यद्य वृकोदरोदितान्धातून्क्रमेणैव हि माधवाश्रयात्।। (धातुकाव्यम् 1-1)

वासुदेवेन प्राक् पाणिनिसूत्रमण्डलमुदाहृतम्। अपरतः अयं धातूनुदाहरति। टीकायां - अस्ति तावद्दुर्लभप्रयोगाणामखिलधातूनां क्रमेणप्येकमात्रावगमे जिज्ञासूनां महानुपयोगः (धातुकाव्यम् प्रस्तावना) इति। अमुं विषयमधिकृत्य काव्ये एकस्मिन् श्लोके प्रायशः एव दशाधिकधातवः प्रयुक्तत्वात् शास्त्रकाव्यत्वम् साध्यते। यथा-

वनाद्वनं सानुममन्द्रमन्गृहं व्याधोत्करोऽहमतिमीमिताशयः।
चान्तामिषश्छान्त जलः फलावली जान्त्वा झमञ्जेमनमक्रमीत्।। (धातुकाव्यम्)

इत्यत्र वनाद् वनं सानु चामन् - सञ्चरन्, गृहं द्रमन् - प्राप्नुवन्, व्याधोत्करः चान्तमिषः - भक्षितं मिषं येन सः, छान्तजलः - पीतं जलं येन सः, फलावली जान्त्वा - भुक्त्वा, जेमन् लेह्यम् - आहारम्, झमन् - अदन्, अखादन्, गृहम् अक्रमीत् - प्रविवेश इति दशाधिकाः धातवः प्रयुक्ताः।

अर्थात् वन-षण-सम्भक्तौ, अम-हम्म-मीमृ-गतौ, चमु-छमु-जमु-झमु-अदने, क्रमु-पादविक्षेपे इति दशधातवः द्योत्यन्ते। अन्यत्र-

मनोज्ञगण्डं तमनिन्दितानन्नं नन्दात्मजं शारदचन्द्रशीतलम्।
पराक्रमत्रन्दनक्रन्दितासुरं संक्रन्दनक्लन्दितमीक्षितास्महे।। इति (धातुकाव्यम् 1-10)

श्लोकेऽस्मिन् गण्डम् इति गडि-वदनैकदेशे, अनिन्दिता इति णिदि-कुत्सायाम्,

In Public domain. Digitization Muthulakshmi Research Academy

नन्देति टु नदि–समृद्धौ, चन्द्रेति चदि–आह्लादौ, त्रन्देति त्रदि–चेष्टायाम्, कन्दितेति कदि क्रदि क्लादि–आह्वाने रोदने च इत्यादि धातुभिः प्रसङ्गानुसारं काव्यत्वमुपदिश्यते।

धातुकाव्ये कथा वस्तुना व्याकरणशास्त्रसिद्धनामधातुरूपाणां प्रयोगस्तु यथायोग्यमभूत्। भू-सत्तायामित्यारभ्य काव्यान्तं महावैय्याकरणोऽयं प्रायः २००० धातवः प्रयुज्य शास्त्रत्वं काव्यस्वरूपं च सम्पादयति।

यदि धातोः कथं कस्मिन्नर्थे लकाराः प्रयोक्तव्याः इति विचार्यते तर्हि एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति इति विलसितमुपलक्ष्यते।

भीम-भट्टि-हलायुधैः च व्याकारणलक्ष्यसिद्धये प्रणीतकाव्यानां पाणिनीय–सिद्धनामाधातुरूपाणां विशदीकरणमेव परमं प्रयोजनम्।

आधारग्रन्थसूचिः

१. A History of classical Sanskrit literature - M Krishnamachariar
२. संस्कृत वाङ्मय का बृहदितिहास – आचार्य बलदेवोपाध्यायः
३. संस्कृत व्याकरण का इतिहास – युधिष्ठिर मीमांसक्
४. काव्यमाला (१० गुच्छम्) – वासुदेवविजयम् एवं धातुकाव्यम् – (निर्णयसागर प्रेस्–Mumbai)
५. भट्टिकाव्यम् – चौखम्बा सुरभारती प्रकाशन्
६. काव्यमीमांसा - राज़शेखरः
७. संस्कृतसाहित्येतिहासः — रामचन्द्रमिश्रः

In Public domain. Digitization Muthulakshmi Research Academy

Aspects of Social Welfare in Five Mahayajnas, Sixteen Samskaras and Srauta Yajnas

Lt Col N.V.S.S.S. Prakasa Rao

In a Hindu Society, rituals of Sanatanadharma are ordained to be performed by different classes of Society. There are four distinct classes of Society, namely, Brahmin, Kshatriya, Vaisya and Sudra, collectively called Chaturvarnya according to Varnashrama Dharma (originally based on colour, hence the term Varna).

Bhagavan Srikrishna in Bhagavadgita stated that he created these four classes (castes) according to their qualities (Gunas) and duties.

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।[1]

These four classes of people have distinct duties to perform.

(a) Brahmin to study and teach (Adhyayana, Adhyapana)
(b) Kshatriya to protect and rule (Prajarakshana)
(c) Vaisya to till the land, trade and lend the money (Krishi, Gorakshana, Vanijyam)
(d) Sudra to serve the other three classes (Susrusha)

This is stated in Manusmriti as under:

अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणामकल्पयत्।।[2]

प्रजानां रक्षणं दानमिज्याध्ययनमेवच। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।[3]

पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च।।[4]

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्। एतेषामेव वर्णानां शुश्रूषामनसूयया।।[5]

The same has been stated in Bhagavadgita as under:

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप। कर्माणि प्रविभक्तानि स्वभाव प्रभवैर्गुणैः।।[6]

---

[1] *Bhagavadgeeta,* 4. 13.
[2] *Manusmriti,* 1.88.
[3] *ibid.,* 1.89
[4] *ibid.,* 1.90.
[5] *ibid.,* 1.91.
[6] *Bhagavadgeeta,* 18.41.
[7] *ibid.* 18.42.
[8] *ibid.* 18. 43.
[9] *ibid.,* 18.44.

In Public domain. Digitization Muthulakshmi Research Academy

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्म कर्म स्वभावजम्।।7
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धेचाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।8
कृषिगौरक्ष्यवाणिज्यम् वैश्य कर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।।9

While Varna describes the four castes, Ashrama discusses the four stages of a Hindu, namely Brahmacharya, Grihastha, Vanaprastha and Sanyasa Ashramas. A child is not a member of the society or a caste until ritual of initiation (Upanayana), which is not undergone by a Sudra. Apart from physical birth, this ritual is called second birth. After Upanayana and wearing sacred thread (Yajnopavita) he enters the stage of celibacy (Brahmacharyashrama) leading an austere life of a student in his teacher's home (Guru's Ashram) learning Vedas and eating handouts from generous neighbours (Bhiksha) and doing service to teacher (Susrusha). After studies are completed, he marries and enters Grihasthashrama, and becomes head of a household. After middle age, when he firmly establishes lineage of his family with grand children, he leaves home to become a hermit and meditates in a forest to free his soul from material things and this stage is called Vanaprasthashrama. When very old, he breaks earthly ties and enters the fourth and last stage i.e., Sanyasashrama.

Panchamahayajnas

Once married, the householder (Grihastha) might devote himself to three ends of life Dharma, Artha, Kama. Dharma is the gaining of religious merit through following the Sacred Law. Artha is gaining wealth through honest means and Kama is the gaining of various kinds of pleasures. These are of descending order of importance. One who follows these three ends of life right throughout his life, with devotion, will attain liberation/Salvation (Moksha).

In Public domain. Digitization Muthulakshmi Research Academy

Performance of numerous religious duties consists of proper following of one's Dharma. These are the bounden or obligatory karmas of a Hindu. Yajna is such a ritual prescribed by Vedas where offerings of ghee, yoghurt, flowers, fruits, cloth and money are poured into fire (Agni). Agni is considered a Purohita, a courier to carry them to the Gods "Agnimile Purohitam"[10]. The fire in which daily offerings are offered is of three kinds, Garhaspatya, Ahavaniya and Dakshina known as Tretagni. The first one is meant for oblation without desire 'Nishkama', second to lead to the path of Gods (Devayana) and the third to the manes (Pitriyana). Yajnas are classified as 'Srauta' performed as per Sruti and Grihya (domestic) by a house holder (Grihastha) depending up on the beneficiary of the rite, i.e., the receiver (Gods etc.,) or the sacrificer (Karta) himself. Again these are classified as daily obligation (Nityakarma) and occasional and elaborate called Srautayajnas. As a daily ritual, there are five great sacrifices (Panchamahayajnas) to be performed by a house holder (Grihastha) for purification from the sin arising from five kinds of animal killing places (Pasu Himsasthanani) like a hearth, a grinding stone, a broom, a mortar and a water pot.

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।।[11]

These are to be performed thrice daily at Sunrise, noon and Sunset. They consist of:

(a) Brahmayajna, the worship of the Brahma the World Spirit, by reciting the Vedas. Veda means knowledge. Besides reciting hymns, knowledge has to be imparted to others. By doing so, apart from the sacrificer (Karta), others also will be benefited and in turn the entire society transforms into knowledgeable. This is considered Brahmayajna in the present day context of ignorance and wipes out resultant misery (Klesa).

(b) **Pitruyajna,** the worship of the ancestors, by libations of water

---

[10] *Rigveda*, 1.1.1.1
[11] *Manusmriti*, 3.68,69.

In Public domain. Digitization Muthulakshmi Research Academy

(Tarpana) and periodical Sraddha. It is believed that water and food offered in the name of manes to a Brahmin or an animal (cow) or bird (crow) as also in the fire reaches to them and they are satisfied. Besides, the Brahmin, animal or bird also enjoy the offering which falls under Bhutayajna and Purushayajna also.

(c) **Devayajna**, the worship of the gods, by pouring ghee in the sacred fire (Homa). Initially, the Creator (Prajapati) was embodiment of sacrifice and gradually emerged as being dominated by fourfold Godhead viz., Indra, Agni, Soma, and Surya. Depending upon goals, offerings are made to one of these gods in the daily Agnihotra, to Sun and Prajapati at Sunrise and to Agni and Prajapati at Sunset.

(d) **Bhutayajna (Bhutabali)**, the worship of all living beings, by scattering grains and food for the animals, birds and all creatures. Rearing cattle and scattering grains to birds, ants etc., come under this.

(e) **Purushayajna**, the worship of men, by showing hospitality (Atithi Puja). Feeding poor people and caring old besides giving food to unexpected guests fall under this category. It is enjoined on a house holder (Grihastha) that a guest is fed first before he himself partakes his food. This is considered a social welfare measure in today's context as it removes inequality and enhances universal brotherhood.

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनम्।।
पञ्चैतान्यो महायज्ञान्न हापयतिशक्तितः। स गृहोपि वसन्नित्यं सूनादोषैर्न लिप्यते।।[12]

Shodasa Samskaras

The ultimate goal of every Hindu is to attain Moksha. This can only come through Atmavidya, which is knowing one's self, through thought and introspection. To attain this, the scriptures give some guidelines. The first step is to master eight characteristics. These, called Atmagunas are: Compassion (Daya), Forgiveness or patience (Kshanti), Absence of jealousy (Anasuya) Cleanliness (Saucham), Not feeling mental strain or doing work with effortless ease (Anayasa), Auspiciousness (Mangala), Non-miserliness (Akarpanya) and Non-grasping or non-desiring nature (Aspriha).

Towards cultivation of these characteristics, the Vedas also give guidelines as to the rituals to be performed during one's lifetime.

---

[12] *Manusmriti*, 3.70,71.

In Public domain. Digitization Muthulakshmi Research Academy

Sixteen such rituals are collectively called Shodasa Samskaras. Samskara denotes purification ritual. Starting from the time when the child is in the womb, these sixteen rituals end in the final journey of the body into the afterlife. They can be divided into those performed during five different stages of life i.e., prenatal, childhood, student life, adult life and old age or wisdom years. Forty rituals are discussed but sixteen are still in practice. They are Garbhadhana, Pumsavana, Simantonnayana, Jatakarma, Namakarana, Niskramana, Annaprasana, Karnavedha, Vidyarambha, Upanayana, Samavartana, Vivaha, Panchamahayajna, Vanaprastha, Antyeshti. Elsewhere, in place of Nishkramana, Karnavedha, Vidyarambha, Panchamahayajna and Vanaprastha, another five namely, Prajapatyam, Saumyam, Agneyam, Vaisvadevam and Godanam are included. These additional five are performed by the teacher (Guru) for well being of the student during student life. The first three are performed before child birth by the father. Jatakarma, Namakarana, Niskramana, Annaprasana, Karnavedha, Vidyarambha and Upanayana are performed by parents after birth of the child before marriage (Vivaha). Samavartana and Vivaha are performed by self and last one, i.e., Antyeshti is performed by the son after death for attaining heaven/Salvation (Moksha).

1. **Garbhadhana:** This ritual is performed by a married couple when conceiving a child. This important Samskara raises the act of conception to a sacred occasion, and is powerfully purifying and uplifting for the unborn child. It is also called 'Nisheka.

वैदिकैः कर्मभिः पण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।[13]

2. **Pumsavana:** This is usually performed between the second and fourth month of pregnancy. Its purpose is, first, to promote the birth of a male child (for perpetuation of the family line and tradition); second, to ensure the good health of the foetus and the proper formation of its organs, regardless of gender. As per Muhurta Martanda it is to be performed in the second or third month. According to the scripture, this can be performed along with Simantonnayana "Dvitiyeva Tritiyeva Masi Pumsavanam Bhavet, Vyaktegarbhe Bhavet, Karyam Simantena Sahathava".

---

[13] *Manusmriti,* 2.26.

In Public domain. Digitization Muthulakshmi Research Academy

3. **Simantonnayana**: In the fourth or fifth month of pregnancy, the mind of the foetus begins to develop. This is when Simantonnayana Samskara is performed. Its purpose is to protect the foetus, especially its newly forming mind, from all negative influences, and also to stimulate the development of the unborn child's intellect. It is stated that this ritual can be performed any time before delivery "Garbhalambhanamarabhyayavannaprasavastada" In practice at present, both Pumsavana and Simantonnayana are performed together in the fifth, seventh or ninth month. Though these are Vedic rituals, these are nowadays being celebrated as Laukika customs.

4. **Jatakarma**: It is the ritual performed at the birth of a child. It awakens the child's intellect, gives it strength and promotes long life for the child.

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते।

मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम्।।[14]

As per Muhurta Darpana this can be done either immediately after birth or after the Jatasaucha.

तसमिन् जन्ममुहूर्तेपि सूतकान्तेथवा शिशोः। कुर्याद्वैजातकर्माख्यं पितृपूजनि तत्परः।।

As per Muhurta Chintamani this can be done on 11th day or 12th day.

तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोन तिथे शुभेह्नि।

एकादश द्वादशकेपि घस्रेमृदुध्रुव क्षिप्रचरोडुषुस्यात्।।

Dharmasindhu, prescribes the following Sankalpa for this ritual:

"स्नातोलंकृतः पिता अकृतनालच्छेदं अपीतस्तन्यं अन्यैरस्पृष्टं प्रक्षाळितं कुमारं मातुरुस्तङ्गेकारयित्वा.... अस्य कुमारस्य गर्भाम्बुपानजनित दोष निबर्हणायुर्मेधाभिवृद्धि बीज गर्भ समुद्भ्रवैनो निबर्हण द्वारा श्री परमेश्वर प्रीत्यर्थं जातकर्म करिष्ये"

5. **Namakarana**: On the 11th day after the child's birth, Namakarana Samskara is performed. In this ceremony, the child receives its name with suffixes such as 'Sharma' for a Brahmin, 'Varma' for a Kshatriya, 'Gupta' or 'Bhuti' for a Vaisya and 'Dasa' for a Sudra.[15]

---

14 *Manusmriti*, 2.29.

15 *ibid.*,2.32.

In Public domain. Digitization Muthulakshmi Research Academy

नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।।[16]

In some places it is performed on the 12th day and 21st day in some places. If it is delayed, it is performed during odd month in an auspicious time (Subhamuhurta). In practice, it is observed that both Jatakarma and Namakarana are performed together on 11th, 21st, 29th day or in an odd month. In some places it is done on 21st day along with cradle ceremony (Dolarohana) and drawing up of water from the well by the newly delivered mother.

6. **Nishkramana:** The baby's first outing into the world, beyond the confines of the home, is the occasion of Nishkramana Samskara, performed in the 4th month.

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्।[17]

7. **Annaprasana:** The first feeding of solid food to the baby, usually in the sixth month after birth for a male and fifth month for a female, is the occasion of Annaprasana Samskara.

षष्ठेन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले।।[18]

8. **Karnavedha:** This ritual is usually performed in the sixth month for a male or seventh month for a female child after birth which consists of the piercing of ear lobes, so that earrings may be worn. This ritual is usually performed along with Chaula or Kesakhandana. As per Dharmasindhu, it is to be performed on 12th or 16th day or in the 6th, 7th, 8th, 10th, 12th month of the first year or in the third year or during odd years later but not in even years.

दशमे द्वादशेवाह्नि षोडशे कर्ण वेधनं। मासे षष्ठे सप्तमेवा अष्टमे दशमेपिवा।।
द्वादशे वाततोब्देच प्रथमेवा तृतीयके। नकर्तव्यं समेवर्षे स्त्रीपुंसोः श्रुतिवेधनम्।।

9. **Chaula:** During even month for a male and odd month for a female in the first year, or during the third year, the child's hair is

---

16 *ibid.,* 2.30.
17 *Manusmriti,* 2.34.
18 *ibid.,* 2.34.

In Public domain. Digitization Muthulakshmi Research Academy

shaved. Usually Karnavedha is also performed along with this ritual. It is also called Chudakarma.

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥[19]

10. **Vidyarambha**: This ritual is usually performed in the 5th year of a child, (5th year, 5th month and 5th day) during Uttarayana which begins a student's primary education by ceremonially introducing the child to the alphabet. This ritual is also called Aksharabhyasa and Aksharasvikara. As per Dharmasindhu, it is to be done in the 5th year. "Panchamevarshe Aksharalekhanarambhah". Nowadays it is being performed in the third year itself as the child starts going to Nursery School.

11. **Upanayana**: Upanayana initiates the formal study of the Vedas. It is one of the most important and esteemed of the Samskaras. Upon performance of Upanayana, a boy traditionally moves from home to live in the ashram of the Guru. The initiation ceremony called the Upanayana or the second birth is a very ancient practice. It is prescribed to be performed during 8th year from conception for a Brahmin, 11th year for a Kshatriya, and 12th year for a Vaisya.

गर्भाष्टमेब्दे कुर्वीति ब्राह्मणस्तोपनयनम्। गर्भादिकादशे राज्ञो गर्भात्तु द्वादशे विशः॥[20]

गर्भाष्टमेषु ब्राह्मणमुपनयीत[21]

According to Manusmriti, a Brahmin seeking Vedadhyayana is to be initiated in the 5th year, a Kshatriya desirous of strength in the 6th year and a Vaisya aspiring to acquire material wealth in the 8th year.

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थनोष्टमे॥[22]

It is also said by Apastamabḥa Maharshi that Upanayana is to be performed in the 5th year for those desiring Brahmajnana (Brahmavarchasakamam), 8th for Longevity (Ayushkamam), 9th for prowess (Tejaskamam,) 10th for food etc., (Annadyakamam, 11th for Sensual desires (Indriyakamam) and in the 12th year for those desiring

---

19 *Manusmriti,* 2.35
20 *ibid.,* 2.36.
21 *Apastambhasutra.*
22 *Manusmriti,* 2.37

In Public domain. Digitization Muthulakshmi Research Academy

cattle wealth (Pasukamam). Manu stated that it can be performed up to 16th year for a Brahmin, from 11th to 22nd year for a Kshatriya and up to 24th year for a Vaisya. Dharmasindhu prescribes 12th or 16th year for a Vaisya "Dvadase Shodase Va Vaisyasya". It is to be performed during Uttarayana, in the months of Magha, Phalguna, Vaisakha and Jyeshtha. Spring season (Vasantaritu) is ideal for Brahmins, Grishmaritu for Kshatriyas and Saradritu for Vaisyas. While selecting a (Muhurta) the strength of the planet Jupiter (Gurubala) is to be seen. Nowadays, this ritual is being performed just before marriage without consideration of age of the boy. It starts with the following Sankalpa by the father.

"एतावन्तकालमनोश्रमिणोस्य कुमारस्य, आश्रमाधिकार सिद्ध्यर्थं, अध्ययन संपादनार्थं, आयुस्तेजो यशश्श्री पुष्टिकाम्याभिवृद्ध्यर्थं साङ्गोपाङ्ग सकल वेदाध्ययनाध्यापन तत्तत्प्रतिपादनार्थं, चतुर्विंशत्यश्क्षरमनत्रोच्चार द्विजाश्रमाधिकार योग्यता फल सिद्ध्यर्थं इमं कुमार मुपनेष्ये"

The boy (Vatu) who undergoes the ceremony is said to be 'twice born (Dvija)'. The ritual consists of wearing a sacred thread called Yajnopavita with the utterance of the sacred Mantra, which goes as follows:

"ओम् यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं। यज्ञोपवीतं बलमस्तु तेजः।।"

Meaning: 'The sacred thread is great and pure. It came to existence along with the birth of Brahma. It is as old as He is. May it, which is blessed by celestials, give us long life, strength and radiance?'

The sacred thread is hung over the left shoulder and under the right arm. The cord is not to be removed once placed unless it is defiled by death or birth in the family. The cord is made of three cotton threads, each of nine twisted strands. At this ceremony the boy (Vatu) is taught the sacred Gayatri Mantra, containing 24 syllables, whispered in his ear by his father and Guru, this occasion is called Brahmopadesa. Only the higher classes can recite this mantra. It is as follows:

"ओं भूर्भुवः स्वः। तत्सवितुर्वरेण्यम् भर्गोदेवस्य धीमहि। धियोयोनः प्रचोदयात्।।"

Meaning: 'Om Earth, Om Sky, Om Heaven, Om Middle Region, Om

In Public domain. Digitization Muthulakshmi Research Academy

Place of Births, Om Mansion of the Blessed, Om Abode of Truth, Let us think of the lovely splendour of God Savitur (Sun) that he may inspire our minds'

The Gayatri Mantra can also be translated as 'That Eternal God or Creator, Independent Reality, the Worshipful, One who has no Beginning, Light of Wisdom and Truth. That Lord, who manifests through the Sun (Savitur), propitiated by the highest Gods; who bestow wisdom, bliss and everlasting life; we meditate on that Light. May that Light of God illuminate our intellect?'

A long time ago, most Kshatriyas and Vaisyas ceased to perform the Initiation ceremony in its full form. The term 'twice born (Dvija)' came to be applied more and more to the Brahmin class only.

12. **Samavartana**: With Samavartana Samskara the disciple graduates from his Vedic studies and returns from the house of his Guru. Thereafter, the disciple will, with the permission of the Guru, marry and raise a family and so enter the stage of householder, Grihasthashrama.

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्।।[23]

13. **Vivaha**: It is a traditional Hindu wedding ceremony. It is considered by many to be the most important of all the Samskaras. It is intended to get progeny to fulfill ancestral obligation (Pitr rina), performance of Grihasthashrama Dharma and prosperity. Vedas state - a man becomes complete by progeny only "Prajayahi manushyah purnah" and accordingly, Sankalpa "Dharmapraja Sampatyartham Striyamudvahe" is administered to the Vara before wedding. It can be performed during the months of Magha, Phlaguna, Chaitra, Vaisakha and Jyeshtha. Some consider the months of Shravana, Asvayuja, Kartika, Margasira also suitable. It should not be performed during Ashadha, Bhadrapada and Paushya months. As per Muhurta Darpana, Chaitra is also not suitable and it is a practice to start marriages during a year only after 'Sitarama Kalyana' in the month of Chaitra.

14. **Panchamahayajnas**: A married couple performs these five great

[23] *Manusmriti*, 3.4.

In Public domain. Digitization Muthulakshmi Research Academy

sacrifices daily. In this Samskara, one honours, in turn, the Rishis (ancient seers of Truth), the gods, the ancestors, humankind and all created beings, as stated earlier.

15. **Vanaprastha**: According to the Vedic tradition, Vanaprastha is the third stage of life, following Brahmacharya (Vedic student/disciple) and Grihastha (householder) Ashramas. Here, a man leaves behind his life in the world and retires to the forest (with or without his wife), to live an ascetic life devoted to study of the scriptures and meditation.

16. **Antyeshti**: The final sacrament, the funeral rites are performed by the son to enable attainment of heaven (Uttamalokas) and salvation (Moksha).

Srautayajnas

The basic Srautayajna involves participation of four priests Hota, Adhvaryu, Udgata and Brahma all chanting Vedic hymns, with specific duties to perform during a sacrifice (Yajna). Hota chants Rigveda Mantras performing oblation into the fire, Adhvaryu chants hymns from Yajurveda, Udgata from Samaveda while Brahma, a most learned acts as Supervisor chanting hymns from Atharvaveda. Adhvaryu is the central figure in measuring the ground, building the Agnikunda, kindling the fire and preparing other materials used for offering. These are classified into five viz., Agnihotra, Darsapurnamasa, Chaturmasya, Pasu and Soma.[24] These are, in general, classified as Pakayajnas, Haviryajnas and Somayajnas to be performed at least once in a life time of a Dvija.

1. **Pakayajnas**: Pakayajnas are minor sacrifices and performed at home. On every first day of a lunar month (Sukla Pratipat/Padyami), it is performed in the Grihyagni, in which rice cooked (Charu) in a vessel called 'Sthali' is offered and it is called Sthalipaka (Homa) Yajna. This is initiated to the newlywed couple during wedding ceremony (Vivaha Samskara).

2. **Haviryajnas**: These are more elaborate and are performed on every first of lunar fortnight i.e., Sukla Pratipat as well as Krishna Pratipat, the day following new moon (Amavasya) and full moon (Purnima) in which offerings of milk, butter (ghee), rice, barley and other grains are made helped by the four priests, Hota, Adhvaryu, Udgata and Brahma.

---

[24] Aitareyaaranyaka 11.33.

In Public domain. Digitization Muthulakshmi Research Academy

It is called Darsa-Purnamasa-Ishti or merely 'Ishti', a Prakriti (archetype) for Haviryajnas. There are total seven such Yajnas: Agnyadhana, Agnihotra, Darsa-Purnamasa, Agrayana, Chaturmasya, Niruddha - Pasubandha and Sautramani. The first four are performed at home while the last three in a Yagasala.

3. **Somayajnas:** The name Somayajna is derived from the fact that the essence of the Soma plant, Somarasa relished by celestials (Devas) is offered. Agnishthoma is 'Prakriti', the word 'Sthoma' also meaning sacrifice. In these Soma sacrifices, Samaveda Mantras are sung and full complement of priests - the Hota, Adhvaryu, Udgata and Brahma, each assisted by three more others, sixteen priests in all, take part. There are seven Somayajnas viz., Agnishthoma, Atyagnishthoma, Ukthya, Shodasi, Vajapeya, Atiratra, Aptoryama. The first, Agnishthoma, also known as Jyotishthoma, is 'Prakriti' (archetype) while remaining six are 'Vikriti'. Among these seven, Vajapeya is considered important. The sacrificer (Yajamana) comes after ritual bath (Avabhrithasnana) on conclusion of the sacrifice when the king himself holds up a white umbrella for him. "Vaja" means rice (food) and "Peya" means drink. As the name suggests, the 'Vajapeya' sacrifice is believed to bring in bountiful crop and plenty of water. It is significant in another sense that it consists of offering (Homa) of Somarasa, Pasu (23 animals) and Anna or Vaja. The sacrificer is bathed in the rice left over, i.e., rice being poured over him, and hence the term "Vjapeya" to this sacrifice is apt. Somayajnas are divided into 'Ekaha' lasting for one day (Sutya i.e., day for pressing Somarasa) like Agnishtoma and all its archetypes mentioned above; those lasting for two to twelve days are called 'Ahina' like Angirasa, Chaitraratha, Kapivana etc. Somayajnas lasting twelve days to one thousand years are called 'Sattras' or sacrificial sessions such as Rajasuya, Vjapeya, Asvamedha etc.

Conclusion

Thus above Samskaras including Panchamahayajnas, Shodasa Samskaras and Srautayajnas are intended to purify (refine) a man, fulfill his desires, wipe out sins, realise soul and above all propitiate celestials for blessings and attain heaven and ultimately the liberation/salvation (Moksha) the fourth Parurashartha.

Besides, the sacrifices contribute in cleansing the environment by eradicating pollution by vibration and vapours from the various

In Public domain. Digitization Muthulakshmi Research Academy

articles (Dravyas) used in offerings such as Arka, Bilva, Trina, Kusa, Sami and so on.

By sacrifices, the deities are pleased to bestow mankind, with bountiful of crops and plenty of water. Kalidasa in 'Raghuvamsam' described King Dilipa reaping rich harvests by propitiating Indra in Yajna by a barter method (Paraspara Vinimaya).

दुदोह गां स यज्ञाय सस्याय मघवादिवम्।
सम्पद्विनिमये नोभौ दधतुर्भुवनद्वयम्।।[25]

This is relevant even today, as we could get good rains by propitiating lords Indra, Varuna and Parjanya. In Bhagavadgita, Bhagavan Srikrishna emphasised the significance of Yajna thus-

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः।।[26]

He classified Yajna into three kinds, Sattvika without desire, Rajasa aiming at desire and Tamasa without regard to Sastra and Tyaga (charity).[27] Sattvika Yajnas will refine man with good qualities and thus eradicate terrorism and help restore universal peace and tranquility.

By performing Yajnas like Putrakameshti one can get progeny, as King Dasaratha did in the epic Ramayana and by certain types of Yajnas like Ganapati Homa, Chandiyaga, we can eradicate evils, diseases, epidemics and ward off natural calamities thus restoring peace, tranquility and harmony leading to enhancement of social welfare in a big way.

---

[25] *Raghuvansham*, 1.26.
[26] *Bhagavadgeeta*, 3.14
[27] *Bhagavadgeeta*, 17.11.13.

In Public domain. Digitization Muthulakshmi Research Academy

CONCEPT OF ŚAKTI IN ŚAIVASIDDHĀNTA
